MSS No. 152 Subject Philosophy

Name of MSS पंचदशी Panchdasi

Author - -

Period - - Folios 163 (Various Pagination)

Script Sanskrit Source Prithipal Singh

Missing Folios - -

३ कोष्ठविवेक॥पत्रे॥१०॥

पं॰ को॰
वि॰ ३॥
त

वस्ततस्तुजीवत्वमीश्वरत्वंचब्रह्मणोनास्तीत्येतत्स्पष्टयितुंतमाह पुत्रादेरिति॥४२॥ इदानीमुक्तज्ञानस्यफलमाह यएव
मिति यः साधनचतुष्टयसंपन्न एवमुक्तेनप्रकारेणपंचकोशविवेकपुरःसरंब्रह्मप्रत्यक् अभिन्नंसत्यादिलक्षणं
वेदसाक्षात्कारंकरोति एषस्वयंब्रह्मैवभवति सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवति ब्रह्मविदाप्नोतिपरमित्यादिश्रु
तिभ्यः ततोपिकिमित्यतआह ब्रह्मणः इति नजायतेम्रियतेवाविपश्चिदित्यादिश्रुतेर्ब्रह्मणःस्वजन्मनास्तिअतएव

पुत्रादेरविवक्षायांनपितानपितामहः तद्वन्नेशोनापिजीवः प्राक्कोशाविवक्षाया॥४२॥
यएवंब्रह्मवेदैवब्रह्मैवभवतिस्वयं ब्रह्मणोनास्तिजन्मातःपुनरेषनजायते॥४३॥ =॥
इतिपंचकोशविवेकःसमाप्तः॥ ३॥ =॥रामरामराम॥

सविद्वानपिस्वात्मनस्तद्रूपत्वावगमान्नैवजायतेनसपुनरावर्ततइतिश्रुतिसिद्धः॥४३॥ इतिश्रीमत्परमहंसपरि
व्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचितापंचकोशव्याख्यासमा ख्या
प्ता॥=॥ ३॥=॥ इतिश्रीगणेशायनमः॥ रामरामरामराम रामरामरामरामराम॥ रामरामरामरामरामरामरा

भवित्वेवंत्रिविधः प्रतिबंधस्ततः किमित्यत आह अधीतेति॥ अत एव प्रतिबंधसद्भावादेवेत्यर्थः सति प्रतिबंधे ज्ञानं नो
देतीत्येतद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विदेयुः एवमेवेमाः सर्वाः प्रजा अहरहर्हंव्र
लगच्छंति एनं ब्रह्मलोकं न विंदंति अनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह॥ हिरण्येति॥ २०॥
नन्वतीतस्य प्रतिबंधकत्वं न दृष्टमित्याशंक्याह अतीतेनेति॥ अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्ये दशायां कस्यं
चिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासानंतरं श्रवणे प्रवृत्तोपि तेनैव स्नेहेन जनितात्प्रतिबंधात्तत्त्वं गुरुणोदि
अधीतवेदवेदार्थोप्यत एव न मुच्यते हिरण्यनिधिदृष्टांतादिदमेव हि दर्शितं॥ ३०॥ अतीतेनापि महिषी
स्नेहेन प्रतिबंधतः॥ भिक्षुस्तत्त्वं न वेदेति गाथा लोके गीयते॥ ३१॥ अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान्॥
ततो यथावद्वेदैष प्रतिबंधस्य संक्षयात्॥ ३२॥ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः॥ प्रज्ञामांद्यं कुतर्कश्च विपर्य
यदुराग्रहः॥ ३३॥ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयं नीतेऽस्मिन्प्रतिबंधेऽतः स्वस्य ब्रह्मत्वमश्नुते॥ ३४॥

नन्वयं योऽयं विचारेणापि इह साक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह ॥ विचारयन्निति ॥ ३३ ॥ नन्वि
दं कुतोऽवगतमित्याशंक्य बृहस्पत्र कृतावास्ते नैव हि कामुष्मिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनादित्यस्मिन्नर्थे त्रैभि
धानादित्याह ॥ इह वेति ॥ सति प्रतिबंधे इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति ॥ अ एवं तद्धति ॥ ३४ ॥ इह ज
न्मनि श्रवणादिकर्तुर्जन्मांतरे ति ॥ परोक्षज्ञानं भवतीत्यत्रागर्भेनु सन्नन्वेषाम् जन्मानि विश्वे
त्यादिकां श्रुतिमर्थतः पठति ॥ गर्भ एवेति इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालांतरे उत्पत्तौ दृष्टांतमाह ॥ यद्धिदिति
विचारयन्नामरणं नैवात्मानं लभते चेत् जन्मांतरे लभते नैव प्रतिबंधक्षये सति ॥ ३५ ॥ इह वामुत्र वा विद्येत्येवं स्व
त्रे कृतो दतम् अ एवं तत्पत्र वह वो पन्न विद्या रिति श्रुतेः ॥ ३६ ॥ गर्भ एव शयानः सन्वामदेवोऽवबुद्धिमान्
पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ॥ ३७ ॥ बहुवारमधीतेऽपि तदा नायाति चेत्पुनः दिनांतरे नधी
त्यैव पूर्वाधीतं स्मरेत्सुमान् ॥ ३८ ॥ कालेन परिपच्यंते कृषिगर्भादयो यथा तद्वदात्मविचारेऽपि शनैः काले
न पच्यते ॥ ३९ ॥ पुनः पुनर्विचारेऽपि त्रिविधप्रतिबंधतः । न वेत्ति तत्त्वमित्येतद्वार्त्तिके सम्यगीरितं ॥ ४० ॥
कुतस्तद्ज्ञानमिति चेत्तद्धि बंधपरिक्षयात् असावपि च भूतो वा भावी वा वर्त्तते ऽथवा ॥ ४१ ॥
३५ ॥ दृष्टांतं विवृणोति बहुवारमिति ॥ ३६ ॥ आदिशब्देन परिगृहीतानि दृष्टांतरापयाह ॥ कालेनेति दार्ष्टां
तिके योजयति ॥ तद्वदिति ॥ ३९ ॥ बहुवारं विचारितेऽपि तत्त्वे प्रतिबंधबलात्साक्षात्कारो न जायते इत्येत

ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यत इत्याशंक्य न तेषां तत्त्वज्ञानफलमपि तु तपःफलमित्या
ह व्यासादेरपीति॥ ननु तर्हि तपसा ब्रह्मजिज्ञासस्वेति श्रुतेस्तपोरहितस्य तत्त्वज्ञानमपि न घटत इत्याशंक्य शापा
दिकारणादन्यस्य तपसः सत्वान्नैवमित्याह॥ शापादिकारणादिति॥१०९॥ तर्हि तेषां व्यासादीनां तत्त्वज्ञानित्वं
शापादिकारणत्वं कथं दृश्यत इत्याशंक्योभयविधतपसः सद्भावादित्याह॥ द्वयमिति॥११०॥ ननु यः शापा

व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात् शापादिकारणादन्यत्तपो ज्ञानस्य कारणं॥१०९॥
द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानतापयोः एकैकं तु तपः कुर्वन्नेकैकं लभते फले॥११०॥
सामर्थ्यहीनो निंद्यश्चेद्यतिभिर्विधिवर्जितः निंद्यंते यतयोप्यन्यैरनिशं भोगलंपटैः॥१११॥
भिक्षावस्त्रादि रक्षेयुर्यद्येते भोगतुष्टये अहो यतित्वमेतेषां वैराग्यभरमंथरं॥ = १११२॥
वर्णाश्रमपरान्मूढा निंदंत्वित्युच्यते यदि देहात्ममतयो बुद्धं निंदंत्वाश्रममानिनः॥ =११३॥

दिसामर्थ्यरहितस्तस्य विध्यभावेपि विहितानुष्ठानात्‌ भिक्षुभिर्निंद्यत्वं स्यादित्याशंक्य तेषामपि विषयलंपटैर्निंद्यत्वं
स्यादित्याह॥ सामर्थ्येति॥१११॥ एतेपि भोगतुष्ट्यर्थं विषयान्संपादयेयुरित्याशंक्य तथा तेषां यतित्वमेव हीयते इत्यभिप्रायेणोपहसति॥ भिक्षावस्त्रादिति॥११२॥ विषयलंपटैः पामरैः क्रियमाणया निंदया किंपाप

॥ ध॥ महाविवेक॥ पत्रे॥ ३॥

म.वि.

॥ ३ ॥

प

केमब्रह्मस्वार्थंवर्णवेदान्तस्यायमात्माब्रह्मेतिवाक्यस्यार्थंव्याचिकीर्षुरादावयमात्मेतिपदद्वयेनविवक्षितमर्थंक्रमेण
दर्शयति स्वप्रकाशेति अयमित्युक्तितोयमितिशब्देन स्वप्रकाशापरोक्षत्वे स्वयंप्रकाशत्वेनापरोक्षत्वे मतमभिमतं
अहमादिवन्नित्यपरोक्षत्वे घटादिवद्दृश्यत्वे च व्यावर्तयितुं विशेषणद्वयमिति बोध्यं देहादिष्वप्यात्मशब्दप्रयोगद
र्शनादत्रात्मशब्देन किं विवक्षितमित्याकांक्षायामाह अहंकारेति अहंकार आदिर्यस्याहंकारप्राणमनइंद्रियदेहसंघात
स्य सोहंकारादिः तथा देहः अंतो यस्य सोहंकारसंघातस्य स देहांतः अहंकारादिश्चासौ देहांतश्चेति तया तस्मात्प्रत्यगधिष्ठानतया

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतं अहंकारादिदेहांतात्प्रत्यगात्मेति गीयते ॥ ३ ॥ दृश्यमानस्य सर्वस्य जगतस्त
त्वमीर्यते ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकं ॥ ४ ॥ इति वाक्यविवेकः समाप्तः ॥ ५ ॥ रामरामराम ॥

साक्षितया चांतरात्मेति गीयते अस्मिन्वाक्ये इत्यर्थः ॥ ३ ॥ ब्रह्मण्यत्वादिष्वपि ब्रह्मशब्दस्य प्रयोगदर्शनात्तद्व्यावर्तनाया
त्र विवक्षितमर्थमाह दृश्यमिति दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतया तद्बाधावधि
त्वेन च पारमार्थिकं सच्चिदानंदलक्षणं यद्रूपमस्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः वाक्यार्थमाह तद्ब्रह्मेति यदु
क्तलक्षणं ब्रह्म स्वप्रकाशात्मा रूपं स्वरूपं यस्य तत्स्वप्रकाशात्मरूपकं स एवेत्यर्थः ॥ ४ ॥ इति श्रीमहाविवेक

न

म॰ला॰ ॥वि॰२॥

ब्रह्मस्वरूपमाह स्वत इति स्वतः परिपूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः पूर्णोऽतः परमात्मात्रास्मिन्महावाक्ये ब्रह्मश
ब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोक्त इत्यर्थः एतद्वाक्यगतेनास्मीतिपदेन पदद्वयसमानाधिकरण्यं लब्धं
जीवब्रह्मणोरैक्यं परामृश्यत इत्याह अस्मीति फलितमाह तेनेति ॥४॥ इदानीं छांदोग्यश्रुतिगतस्य तत्त्वमसी
तिवाक्यस्य अर्थप्रकाशनाय तत्पदलक्ष्यार्थमाह एकमेवेति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति वाक्ये
न सृष्टेः पुरस्तादागतादिभेदशून्यं नामरूपरहितं यत्सद्वस्तु प्रतिपादितमस्ति अस्य सद्वस्तुनोऽधुनापि सृष्टेरुत्तरका

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहं ॥४॥
एकमेवाद्वितीयं सन्नामरूपविवर्जितं सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते ॥५॥
श्रोतुर्देहेंद्रियातीतं वस्त्वत्र त्वंपदेरितं एकता ग्राह्यतेऽसीति तदैक्यमनुभूयतां ॥६॥

लेऽपि तादृक्त्वं विचारदृष्ट्या तथात्वं तदितिपदेनेर्यते लक्ष्यत इत्यर्थः ॥५॥ त्वंपदलक्ष्यार्थमाह श्रोतुरिति श्रोतुः श्र
वणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेंद्रियातीतं देहेंद्रियोपहितस्थूलादिशरीरत्रयसाक्षि तथा तच्चिल्लक्ष
णं सद्वस्त्वत्र त्वंपदेरितं वाक्यगतेन त्वमितिपदेन तत्र त्वंपदसामानाधिकरण्यं लब्धं पदार्थद्वयैक्यं शिष्यं
प्रति प्रत्याय्यत इत्याह एकतेति सिद्धमर्थमाह तदैक्यमिति तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धमे

ल

॥३॥

देवादिषु मध्यमेषु १

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दस्यार्थमाह चतुर्मुखेति उत्तमेषु मनुष्यादिषु अधमेषु अश्वगवादिषु देहधा-
रिषु आकाशादिभूतेषु च जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः अनेन च एष ब्रह्मैष इन्द्र इत्यादेः प्रज्ञा-
प्रतिष्ठेत्यंतस्यावांतरवाक्यस्यार्थः संक्षिप्य दर्शितः इत्थं पदार्थमभिधाय वाक्यार्थमाह अत इ[...]ज्ञानं ब्रह्म मय्यपीति
व
यतः सर्वात्मस्थितं प्रज्ञानं [...]ब्रह्मातो मय्यपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्वविशेषादित्यर्थः ॥१२॥ एवं ऋक्शाखागतं
महावाक्यार्थं निरूप्य यजुःशाखास्थमध्ये बृहदारण्यकोपनिषद्गतस्याहं ब्रह्मास्मीति महावाक्यस्यार्थं विस्तरेणाय

चतुर्मुखेंद्रदेवेषु मनुष्याश्वगवादिषु चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥१२॥=॥ १२
परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥१३॥

अहंशब्दस्यार्थमाह परिपूर्ण इति स्वभावतो देशकालवस्तुभिरपरिच्छिन्नः परमात्मा अस्मिन्मायाकल्पिते जगति विद्या-
धिकारिणि शमादिसाधनसंपन्नत्वेन विद्यासंपादनयोग्ये अस्मिन् श्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरेषु बुद्धेर्बुद्ध्यु- न
पलक्षितस्य सूक्ष्मशरीरस्य साक्षितया विकारित्वेनावभासकतया स्थित्वा अवस्थाय स्फुरन् प्रकाशमानो अहमितीर्यते र
लक्षणया पदेनोच्यते इत्यर्थः ॥=॥१३॥=॥ रामरामरामराम रामरामरामराम॥ ५ रामरामरामरामरामराम

इति परिपूर्णः

पं चित्र ॥ १ ॥ नी द

ॐ श्रीगणेशाय नमः ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ १ ॥ नत्वा श्री
भारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥ २ ॥ चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूह त्वा
परिसमाप्तये परमात्मनीति पदेनेष्टदेवतातत्वानुसंधानलक्षणं मंगलमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात्त
दीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधायाध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते इति न्यायमनुसृत्य परमात्म रो
न्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टांतं प्रतिजानीते ॥ यथेति चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्ट नु

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं ॥ = ॥ १ ॥ ष्ट
यथा धौतो घट्टितश्च लांछितो रंजितः पटः चिदंतर्यामिसूत्रात्मा विराट् चात्मा तथेर्यते ॥ २ ॥

यं तथैव परमात्मन्यपि वक्ष्यमाणमवस्थाचतुष्टयं ज्ञेयमिति ॥ १ ॥ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिक
२ योरुभयोरप्यवस्थाचतुष्टयं क्रमेणोद्दिशति यथेति धौतो घट्टितो लांछितो रंजित इत्येवं प्रकाराश्चत्वारो ऽ
वस्था यथा चित्रपटे उपलभ्यंते तथा परमात्मन्यपि चिदंतर्यामी सूत्रात्मा विराट् चेत्यवस्थाचतुष्टयं बोध्य
मिति यथार्थः ॥ २ ॥ श्रीरामाय नमः श्रीगणेशाय नमः ॥ रामरामराम ॥ रामराम

॥ १ ॥

व्रत्वाद्‌ स्पर्शो रूपाणीति त्रयो गुणाः ते क्रमेणाभिधीयंते वन्हौ भगभगध्वनिः उष्णस्पर्शः प्रभारूपमि
ति जलेषु शब्दादयो रसांतास्चत्वारो गुणास्तानाह जले चुलचुलध्वनिः शीतः स्पर्शः शुक्लरूपं रसो माधुर्य
मीरितं इति ॥८॥ भूमौ शब्दादिगंधांताः पंचगुणास्तानुदाहरति भूमौ कडकडशब्द इत्यादिना सुरभी
तरगंधौ द्वाविति तेन ॥ यय उक्तमर्थमुपसंहरति गुणा इति एवं गुणतो भेदमभिधाय कार्यतो भेदस्ताना

इंद्रियपंचकं०

उष्णस्पर्शः प्रभारूपं जले चुलुचुलध्वनिः शीतस्पर्शः शुक्लरूपं रसो माधुर्यमीरितं ॥४॥ भु
भूमौ कडाकडाशब्दः काठिन्यं स्पर्श इष्यते नीलादिकं चित्ररूपं मधुराम्लादिको रसः ॥५॥
सुरभीतरगंधौ द्वौ गुणाः सम्यग्विवेचिताः श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेंद्रियपंचकं ॥६॥
कर्णादिगोलकस्थं तच्छब्दादिग्राहकं क्रमात्‌ सौक्ष्म्यात्कार्यानुमेयं तत्प्रायो धावेद्बहिर्मुखं ॥७॥
यतत्कार्याणि तानींद्रियाणि तावदाह श्रोत्रमिति ॥६॥ तेषां स्थानानि व्यापारं च दर्शयति कर्णादीति इंद्रि
यसद्भावे किं प्रमाणमित्याकांक्षायां कार्यलिंगकानुमानमित्याह सौक्ष्म्यादिति तेषु रूपोपलब्धिकरणाज
न्यक्रियावात्‌ छिदिक्रियावदित्यादि द्रष्टव्यं सौक्ष्म्यादपंचीकृतभूतकार्यत्वेन दुर्लक्ष्यत्वादित्यर्थः एतेषां

अनुमानं

स्वाभावमाह प्राप इति पराञ्चि खानि
व्यतृणत्स्वयंभूरिति श्रुतेरित्यर्थः ॥७॥

पंचद॰प्र॰ वि॰॥२॥ २

प्रायः शब्देन तच्चित्तं क्वचित्करणानामांतरविषयग्राहकत्वं दर्शयति कदाचिदिति द्वाभ्यां कदाचित्कर्णास्य
पिधाने कृते सति प्राणवायौ जाठराग्नौ च विद्यमान आंतरः शब्दः श्रूयते ॥८॥ जलपानेन्नभक्षणे चांतरस्पर्शा
अभिव्यज्यंते अभिव्यक्ता भवंति नेत्रनिमीलने कृते आंतरं तम उपलभ्यते उद्गारे जाते रसगंधौ चैव गृह्येते इ
त्यनेन प्रकारेण ज्ञानानामांतरग्रहो ज्ञानामिति कर्तरि षष्ठी आंतरस्य विषयस्य ग्रहो ग्रहणमिंद्रियकर्तृकमां

कदाचित्पिहिते कर्णे श्रूयते शब्द आंतरः । प्राणवायौ जाठराग्नौ जलपानेन्नभक्षणे ॥८॥
व्यज्यंते ह्यांतरस्पर्शा मीलने चांतरं तमः । उद्गारे रसगंधौ चेत्यक्षाणामांतरग्रहः ॥९॥
पंचोक्त्यादानगमनविसर्गानंदकाः क्रियाः । कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंति हि ॥१०॥

तरविषयग्रहणं भवतीत्यर्थः ॥९॥ एवं ज्ञानेंद्रियव्यापारानभिधाय कर्मेंद्रियासत्त्ववादिनं प्रति तत्सद्भावस
मर्थनाय तल्लिंगभूतांतद्व्यापारानाह पंचेति उक्तिश्चादानं च विसर्गश्च गमनं च आनंदश्चेति द्वंद्वस
मासः उक्त्यादानगमनविसर्गानंदा: काः पंच क्रियाः प्रसिद्धाः इति शेषः ननु कृष्यादीनां क्रियाणां तत्र गणा
नपिसत्वात्कथं पंचेत्युक्तमित्याशंक्याह कृषीति ॥१०॥ भास्करायणनमः हरयेनमः रामायनमः ॥२॥

ननु मनोबुद्ध्योरंतःकरणत्वाविशेषान्मनोमयरूपेण कोशद्वयकल्पनानुपपन्नेत्याशंक्य कर्तृत्वकरणत्वाभ्यां
भेदसद्भावात् घटत एव मनोमयत्वादिभेद इत्याह कर्त्रित्वेति अंतरिंद्रियमंतःकरणं कर्तृत्वकरणत्वाभ्यां कर्तृरू
पेण करणरूपेण च विक्रियेत परिणमेत इत्यर्थः एते कर्तृकरणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भ
वतः एते च परस्परमंतर्बहिर्भावेन वर्त्तेते अतः कोशद्वयत्वमुपपद्यत इत्यर्थः ॥८॥ इदानीं भोक्तृशब्दवाच्यस्या
नंदमयस्यानात्मत्वं दर्शयितुं तस्य स्वरूपमाह कांचिदिति पुण्यभोगे पुण्यकर्मफलानुभवकाले कांचित्प्रियवृत्ति
रंतर्मुखा सती आनंदप्रतिबिंबभाक् आत्मस्वरूपस्यानंदस्य प्रतिबिंबं भजते सैव भोगशांतौ पुण्यकर्मफलभोगोप

कर्तृत्वकरणत्वाभ्यां विक्रियेतांतरिंद्रियं विज्ञानमनसी चैते तद्बहिष्ठे ते परस्परं ॥८॥
कांचिदंतर्मुखा वृत्तिरानंदप्रतिबिंबभाक् पुण्यभोगे भोगशांतौ निद्रारूपेण लीयते ॥९॥ भोग
कादाचित्कत्वतो नात्मा स्यादानंदमयोऽप्ययं बिंबभूतो य आनंद आत्मासौ सर्वदास्थितेः १०

रमे सति निद्रारूपेण लीयते विलीना भवति सा वृत्तिरानंदमय इत्यभिप्रायः ॥९॥ तस्यानात्मत्वमाह कादाचिदिति अ
यमानंदमयोऽपि कादाचित्कत्वादात्मा न स्यात् आदिपदार्थवदित्यर्थः ननु विद्यमानानंदमयादीनां सर्वेषामात्म
त्वनिरासेन नैरात्म्यं प्रसज्येतेत्याशंक्याह बिंबभूत इति बुद्ध्यादौ प्रतिबिंबतया वर्त्तमानस्य प्रियादिशब्दवाच्यस्य
आनंदमयस्य बिंबभूतः कारणभूतो आनंदो सावेवात्मा भवति कुत इत्यत आह सर्वदेति नित्यत्वादित्यर्थः विवा

नामा२ स्पि२ दे।

पं॰ भा॰ वि॰

॥३॥

च्चोदयति नन्विति अत्र मया घ्रानंदमयांतानां कोशानामुक्तैर्हेतुभिरनात्मत्वेन घटते चेन्मा घटि(ष्ट) ऽन्यस्त्वात्मानुपलभ्य मानत्वान्नैव संभवतीति ॥२१॥ परिहरति वाढमिति अत्र निद्राशब्देन निद्रानंदो लक्ष्यते निद्रादयो देहांता उपलभ्यंते ऽन्योनानुभूयत इति यदुक्तं तत्सत्यं कथं तर्हि तदतिरिक्तस्यात्मनोंगीकार इत्यत आह तथापीति अन्यस्यानुपलभ्यमानत्वेपि यद्वलादेतेषामानंदमयादीनां उपलभ्यमानता भवति सोनुभवः कथंनांगीक्रियत इत्यर्थः ॥२२॥ आनंदनरतैभ्यः कोशेभ्योन्य आत्मा यद्यविद्येत तर्हि उपलभ्येत नोपलभ्यते अतो नास्तीत्याशंक्याह स्वयमिति आनंद

ननु देहमुपक्रम्य निद्रानंदांतवस्तुषु मा भूदात्मत्वमन्यस्तु न कश्चिदनुभूयते ॥२१॥ यतः न उपलभ्यते य

वाढं निद्रादयः सर्वेऽनुभूयंते न चेतरः तथाप्येतेऽनुभूयंते येन तं को निवारयेत् ॥२२॥ येन

स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यता ज्ञातृज्ञानांतराभावादज्ञेयो न त्वसत्तया ॥२३॥

मयादीनां साक्षिणोऽनुभवरूपत्वादेवानुभाव्यत्वं नास्ति इति ननु अनुभवरूपत्वे [विज्ञानुभाव]प्यनुभाव्यत्वं कुतो नेत्यादित्याशंक्याह ज्ञात्रेति ज्ञाता च ज्ञानं च ज्ञातृज्ञाने अन्ये ज्ञातृज्ञाने ज्ञातृज्ञानांतरे तयोरभावः तस्मादज्ञेयो ज्ञानविषयो न भवतीति ज्ञात्राद्यभावाद्वा न ज्ञायते स्वस्यैवासत्वाद्वा किमत्र विनिगमनेकारणमित्यत आह न त्वसत्तयेति निद्रानंदादिसाक्षित्वेनासत्वस्य पूर्वमेव निराकृतत्वादिति भावः ॥२३॥ ॐ नमः शिवाः

॥३॥

तानि च सप्रपञ्चान्यपि कस्य साधारणमिति तदिदमेवास्य तत्साधारणमन्नं यदिदमद्यत इत्यादिनाऽयमात्मा वाङ्मयो
मनोमयः प्राणमय इत्यनेन वाक्यसंदर्भेण वन्नानकोडिकाद्यरूपेण दर्शितानीत्याह व्रीह्यादिकमिति ॥१६॥
ननु तेषां सप्रपञ्चानां जगदन्तःपातित्वेनेश्वरनिर्मितत्वाज्जीवनिर्मितत्वाभिधानमयुक्तमित्याशंक्य तत्स्वरूप
स्येश्वरनिर्मितत्वेऽपि भोग्यत्वाकारस्य जीवनिर्मितत्वान्नैवमित्याह ईशेनेति ज्ञानकर्मभ्यां ज्ञानं विहितं प्रति

व्रीह्यादिकं दर्शपूर्णमासौ तदीरितं तथा मनः वाक्प्राणाश्चेति सप्तान्नानामवगम्यतां ॥१६॥ राम त्व
ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नतां ॥१७॥
ईशकार्यं जीवभोग्यं जगद् द्वाभ्यां समन्वितं पितृजन्याऽभर्तृभोग्या यथा योषित्तथेष्यतां ॥१८॥

ब षिद्धं च [illegible] देवतापरयोषिदादिविषयं ज्ञानं कर्म च विहितं यज्ञादिरूपं प्रतिषिद्धं हिंसादिरूपं ताभ्यामित्यर्थः
तदन्नतां तेषां व्रीह्यादिप्राणान्तानां स्वभोगोपकरणत्वमित्यर्थः ॥१७॥ एतावता किमुक्तं भवतीति तत्राह ईशका
र्यमिति जगतः सप्रपञ्चत्वेनोक्तं व्रीह्यादिरूपं ईशकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां संबंधमित्यर्थः एकस्योभयसंब
न्धे दृष्टान्तमाह पितृजन्येति ॥१८॥ रामरामराम रामराम रामरामराम रामराम ॥

ईशजीवयोर्जगत्सर्जने किं साधनमित्याह मायेति ॥१९॥ नन्वीश्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्यत्वाकार एव ना
स्ति को जीवेन सृज्यत इत्याशंक्याह ईशनिर्मितेति एकस्मिन्नेव विषये बहुविधो भोग उपलभ्यमानस्तत्प्रयोजकं
भोग्याकारभेदं गमयतीत्यर्थः ॥२०॥ ननु सति भोगभेदे भोग्यभेदः कल्प्येत स एव नास्तीत्याशंक्य दृश्यमानत्वान्नै
वमित्याह हृष्यतीति एको मणिं प्रीतं लब्ध्वा हृष्यति अन्यस्तस्याविधस्तदलाभात् कुप्यति अत्र मणौ विषये विरक्तः

मायावृत्त्यात्मको हीशसंकल्पः साधनं जनौ मनोवृत्त्यात्मको जीवसंकल्पो भोगसाधनं ॥१९॥
ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते ॥२०॥
हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति ॥२१॥
प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु ॥२२॥

स्थितं मणिं पश्यत्येव लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः ॥२१॥ के ते भोगभेदा परक्ता जीवसृष्टा आकारभेदा
इत्याशंक्याह प्रिय इति मणिनिष्ठप्रियत्वाप्रियत्वोपेक्षत्वलक्षणा आकारभेदा जीवैः सृष्टाः त्रिष्वपि साधारणमनुसृ
तं यन्मणिरूपं तदीश्वरनिर्मितमित्यर्थः ॥२२॥ रामराम रामराम रामराम रामराम

४

ननु विदिताविदितातिरिक्तो बोधो नानुभूयत इत्याशंक्य विदितविशेषणे वेदनस्यैव बोधरूपत्वात्तद स्मा

नुभवाभावे विदितस्याप्यनुभवाभावप्रसंगात् बोधानुभवोऽवश्यमंगीकर्त्तव्य इति सोपहासमाह बोधेपीति

यस्य मंदस्य बोधेपि घटादिस्फुरणरूपेप्यनुभवः साक्षात्कारः कथंचन कथमपि न जायते नोत्पद्यते तं न

रसमाकृतिं नरसमाकारं लोष्टं लोष्टवज्जडं मनुष्यं शास्त्रैः कथं बोधयेत् न कथमपि बोधयेदित्यर्थः ॥१९

बोधो न बुध्यत इत्युक्तिरेव व्याहतेति मंदं प्रत्याह जिह्रेति मे ह्रास्ति न वेत्स्युक्तिर्भाषणं यथा लज्जायै केवलं जि

न बोधेप्यनुभवो यस्य न कथंचं जायते तं कथं बोधयेच्छास्त्रैर्लोष्टं नरसमाकृतिं ॥=१९॥=॥

जिह्रा मेऽस्ति न वेत्स्युक्तिर्लज्जायै केवलं यथा न बुध्यते मया बोधो बोधव्य इति तादृशी ॥२०॥

यस्मिन्यस्मिन्नस्ति लोके बोधस्तत्तदुपेक्षणे यद्बोधमात्रं तद्ब्रह्मेत्येवं धीर्ब्रह्मनिश्चयः ॥२१॥

लज्जाजननायैव भवति न बुद्धिमत्त्वज्ञापनाय जिह्रया विनाभावेनानुपपत्तेः एवं मया बोधो न बुध्यते इतः परं

बोद्धव्य इत्युक्तिरपि तादृशी लज्जाहेतुरेव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः ॥२०॥ भवत्येवं विधः स बोध

स्तथापि प्रकृते ब्रह्मावबोधे किमायातमित्याशंक्याह यस्मिन्निति लोके जगति यस्मिन् घटादिलक्षणे विषये बो

धो ज्ञानमस्ति तत्तदुपेक्षणे तस्य तस्य घटादिविषयस्योपेक्षणेऽनादरणे कृते सति यद्बोधमात्रं घटादिषुस

र्वत्रानुस्यूतं यत्स्फुरणं अस्ति तदेव ब्रह्मेत्येवंरूपा धीर्बुद्धिर्ब्रह्मनिश्चयो ब्रह्मावगतिरित्यर्थः ॥२१॥ ॥

॥ पंच॰ ॥ को॰ ॥ प्र॰ ॥

ननु घटादिविषयोपेद्यात् दर्थानुभवरूपं वृत्त्यावगम्यते चेत्तर्हि कोशपंचकविवेकैः किं प्रयोजनः स्यादित्या
शंक्य वृत्तलएः प्रत्यग्रूपतात्त्वज्ञानेन विना संसारानिवृत्तेस्तथ्यात्त्वावबोधोपयोगित्वान्न तस्यापि वैयर्थ्यमि
त्याह पंचकोशेति पंचानां कोशानामन्नमयादीनां परित्यागे बुद्ध्या नात्मत्वनिश्चये कृते तत्साक्षिरूपस्य
बोधस्याविशेषणात्तत्साक्षिरूपो बोध एव स्वस्वरूपं स्वनिजं वस्तु सैव स्यात् नन्वन्नमयादीनामनुभवसिद्ध
नां त्यागेप्यन्यपरिशेषः स्यादित्याशंक्याह शून्यत्वमिति तस्य साक्षिरूपबोधस्य शून्यत्वं दुर्घटं दुःसंपाद्य

पंचकोशपरित्यागे साक्षिबोधावशेषतः स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटं ॥२२॥

अस्ति तावत्स्वयं नाम विवादाविषयत्वतः स्वस्मिन्नपि विवादश्चेत्प्रतिवाद्यत्र को भवेत् ॥२३॥

स्वासत्वं तु न कस्मैचिद्रोचते विभ्रमं विना अत एव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः ॥२४॥

मित्यर्थः ॥२२॥ दुर्घटत्वमेवोपपादयति अस्तीति स्वयंशब्दवाच्यं स्वस्वरूपं लौकिकानां वैदिकानां च मते
तावदस्त्येव कुत इत्यत आह विवादेति स्वस्वरूपस्य विप्र ति विषयत्वाभावादित्यर्थः विपक्षे बाधकमा
ह स्वस्मिन्निति स्वात्मन्यपि विप्रतिपत्तौ सत्यामत्रास्यां विप्रतिपत्तौ कः प्रतिवादी स्यान्न कोपि इत्यर्थः ॥२३॥
ननु स्वासत्त्वं वाद्येव प्रतिवादी भविष्यतीत्याशंक्य तथाविधः कोपि नास्तीत्याह स्वासत्वमिति भ्रांतिमेकां
विना ... स्वासत्वाभावः केनापि नांगीक्रियत इत्यर्थः कुत ए

त्रि॰ १८

२२

प ५ धीनस्यैवजगतोवंहेतुत्वांगीकारेवाह्यार्था [illegible] पलापाद्यसिद्धांतापातःस्यादितिशं

कते विज्ञानेति परिहरति नहृदीतियद्यपिमानसप्रपंचस्यैववंधहेतुत्वेतथापितद्धेतुत्वेनवाह्यार्थस्यापिस्वीकारा

न्नविज्ञानवादप्रसंगइतिभावः॥२६॥ननुनहृद्याकारसमर्पणायवाह्यार्थोपेक्षणीयः पूर्वपूर्वमानसप्रपंचसंस्कारस्यै

नर वोत्तरोत्तरमानसप्रपंचहेतुत्वोपपत्तेरित्याशंक्यप्रौढवादेनतदंगीकरोति वैयर्थ्यमितितर्हिविज्ञानवादात्कोभेदइत्य

तआह वाह्यमिति विज्ञानवादिनोवाह्यार्थमेवापलापयंति वयंनतथेत्ययमेवभेदइत्यर्थः प्रयोजनमन्यत्वादभ्युपगमोप्यु

विज्ञानवादोवाह्यार्थवैयर्थ्यात्स्यादितिचेत् नहृद्याकारमाधातुंवाह्यस्यापेक्षितत्वतः॥२६॥

वैयर्थ्यमस्तुवावाह्यंनवारयितुमीश्महे प्रयोजनमपेक्ष्यतेनमानंनीतिहिस्थितिः॥२७॥

वंधश्चेत्मानसंद्वैतंतन्निरोधेनशाम्यति अभ्यसेद्योगमेवातोव्रह्मज्ञानेनकिंवद॥२८॥

ननु एवंतत्राशंक्याह प्रयोजनमिति मानाधीनावस्तुसिद्धिर्नप्रयोजनाधीनामानसिद्धस्यप्रयोजनमन्यत्वमात्रेणासत्वस्यलो

के कैर्वादिभिर्वानभ्युपगमादितिभावः॥२७॥ननुमानसद्वैतस्यैववंधहेतुत्वेतस्यमनोनिरोधात्मकयोगेनैवनिवृत्ति

संभवाद्व्रह्मज्ञानस्यवंधनिवर्तकत्वाभ्युपगमोविरुद्धइतिशंकते वंधश्चेदिति॥२८॥ [illegible]॥

वेदांतमते २ मानसप्रपंचस्य २

द्वै॰वि॰

येनेन किं द्वैतोपशमस्तात्कालिक उच्यते आत्यंतिको वेति विकल्पाद्यमंगीकृत्य द्वितीयं दूषयति तात्कालिकेति ज्ञात्वादे
वं मुच्यते सर्वपाशैः ज्ञात्वा शिवं शांतिमत्यंतमेति यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः तदा देवमविज्ञाय दुःखस्यां
तो भविष्यतीत्यादिश्रुतिष्वन्वयव्यतिरेकाभ्यां ब्रह्मज्ञानादेव बंधनिवृत्तिरभिधीयते इति भावः ॥३८॥ ननु वाह्यद्वैतनि
वारणमंतरेणाद्वितीयब्रह्मज्ञानमेव नोदीयादित्याशंक्य तन्निवारणाभावेपि तस्मिन्निष्पात्त्वज्ञानादेव पारमार्थिक
मद्वैतं वोढुमशक्यते इत्याह अनिवृत्तेपीति ॥४०॥ नद्वैतमस्मात्त्वज्ञानमद्वैतज्ञानप्रयोजकमपि तु तन्निवारणमेवेत्य

तात्कालिकद्वैतशांतावप्यागामिजनिक्षयः ब्रह्मज्ञानं विना न स्यादिति वेदांतडिंडिमः ॥३९॥
अनिवृत्तेपि बाह्येपि द्वैते तस्य मृषात्मतां बुद्ध्वाद्वयं वोढुं शक्यं वस्त्वैक्यवादिनः ॥४०॥=॥ ब्रह्मा
प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः विरोधिद्वैतहानेपि न शक्यं वोढुमद्वयं ॥४१॥=॥ दृ

भिनिवेशमानं प्रत्याह प्रलय इति प्रलये प्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यां तु विरोधिद्वैतहा
नेप्यद्वैतज्ञानविरोधित्वेन भवदभिमतस्य द्वैतस्य निवारणे सत्यपि गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य ज्ञा
नसाधनस्याभावात् हेतोरद्वयवस्तु वोढुं शक्यं न भवति अतस्तन्निवारणमप्रयोजकमिति भावः ॥४१॥ रामरामा॥

वाह्यद्वैतस्य वाह्यद्वैतस्य

अ

तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह बाधकमिति ईश्वरनिर्मितं द्वैतमबाधकं तन्मिथ्यात्वज्ञाने नैवाद्वैत
ज्ञानोत्पत्तेरुक्तत्वात्साधकं च गुरुशास्त्रादिरूपस्य [illegible] तस्य द्वैतस्य ज्ञानसाधनत्वात् आकाशादिरूपं द्वैतमस्मा
भिरपनेतुमशक्यं चेति हेतोस्तत् द्वैतमास्तां कुतः कारणात् द्विष्यत इत्यर्थः ॥४२॥ इदानीं जीवसृष्टं द्वैतं विभ
जते जीवेति किं तत् द्विविधमपि सदा हेयमेव नेत्याह उपाददीतेति आ तत्त्वस्यावबोधनात्तत्त्वस्यावबोधपर्यंत
मित्यर्थः ॥४३॥ किं तत् शास्त्रीयं द्वैतमित्याकांक्षायामाह आत्मेति प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं पञ्चदश्यादि

अबाधकं साधकं च द्वैतमीश्वरनिर्मितं अपनेतुमशक्यं चेत्यास्तां तत् द्विष्यते कुतः ॥४२॥ =॥
जीवद्वैतं तु शास्त्रीयं [अशास्त्रीय]मिति द्विधा उपाददीत शास्त्रीयमा तत्त्वस्यावबोधनात् ॥४३॥ =॥
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनं ॥४४॥ =॥ यर

कं तच्छास्त्रीयमानसं जगदित्यर्थः ननु आतत्त्वस्यावबोधनादित्युक्तमनुपपन्नं आसुप्तेरामृतेः कालं नयेद्वेदां
तचिंतयेत्युक्तत्वादित्याशंक्याह बुद्धे इति तत्त्वे ब्रह्मात्मैक्यत्वलक्षणे बुद्धे साक्षात्कृते सतीत्यर्थः तर्ह्यासुप्ते
रितिवाक्यस्य का गतिरिति चेत् दद्यान्नावसरं किंचित्कामादीनां मनागपीति पूर्वार्द्धेन कामाद्यवसरप्रदा
नस्य निषिद्धत्वात्तत्परत्वेनैवेति वदामः अतो न काप्यनुपपत्तिरिति भावः ॥४४॥ रामरामरामराम

कामनिषेधपरता

वै॰ वि॰ ॥ ३ ॥

तत्त्वबोधोत्तरकालं तद्धेयत्वप्रतिपादनपरा: श्रुतीरुदाहरति शास्त्राणीति ॥४४॥४६॥४७॥ तमेवैकं विजानीतेत्य
नेन तमेवैकं विजानीथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिरर्थत: पठिता ॥४८॥ अशा
स्त्रीयस्यापि द्वैतस्यावांतरभेदमाह अशास्त्रीयेति तत्र द्विविधमपि क्रमेणोदाहरति कामेति इतरत्तु मंद
मित्यर्थ: ॥४९॥ किमनयो: शास्त्रीयद्वैतस्यैव तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह उभयमिति प्रागिवारणं
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुन: पुन: परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥४५ ग्रंथमभ्यस्य
मेधावी ज्ञानविज्ञानतत्पर: पलालमिव धान्यार्थी त्यजेद् ग्रंथमशेषत: ॥४६ तमेव धीरो विज्ञाय प्रज्ञां कुर्वी
त ब्राह्मण: नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ॥४७ तमेवैकं विजानीयात् ह्यन्या वाचो विमुंचथ
यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्या: श्रुतय: स्मृतय: ॥४८॥ अशास्त्रीयमपि द्वैतं तीव्रं मंदमिति द्विधा कामक्रोधादिकं
तीव्रं मनोराज्यं तथेतरत् ॥४९ उभयं तत्त्वबोधात्प्राक् निवार्यं बोधसिद्धये शम: समाहितत्वं च साधनेषु श्रुतं यत:
किमर्थमित्यत आह बोधेति तत्र लिंगमाह शम इति यतस्तत्त्वबोधात् प्राक् तयोर्हेयत्वं तत एव नित्यानित्यवस्तुवि
वेकादिब्रह्मज्ञानसाधनेषु मध्ये शांतसमाहित इति पदाभ्यां शांतिसमाधी श्रूयेते इत्यर्थ: ॥५०॥ रामरामरामराम ॥
अशास्त्रीयद्वैतस्य बोधात् प्रागेव निवारणं २

॥ ३ ॥

ननुतत्त्वबोधात्प्राक् निवार्यमित्यभिधानादुत्तरकालमस्य स्वीकार्यता स्यादित्याशंक्याह बोधादिति उक्तमर्थं व्यतिरेकमुखे
न द्रढयति कामादीति कामादिरूपोयः क्लेशः स एव बंधस्तेन युक्तस्य बद्धस्य मुक्तता जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः
॥ ५१ ॥ ननु जन्मादिसंसारादुद्विग्नस्यात्यंतिकदुःखाभावरूपया विदेहमुक्त्यैवालं किमनया आपातिकया जीवन्मुक्त्येति शंक
ते जीवन्मुक्तीति ऐहिकभोगनिवृत्तिमयाज्जीवन्मुक्तित्यागस्तर्हि आमुष्मिकभोगनिवृत्तिमयात् विदेहमुक्तिरपि त्या
ज्या स्यादिति प्रतिबंद्या परिहरति तर्हीति ॥ ५२ ॥ प्रतिबंदीमोचनं शंकते तथेति दोषयुक्तत्वेन स्वर्गादेस्त्याज्यत्वेन सकलपुरुषा

बोधादूर्ध्वं च तद्धेयं जीवन्मुक्तिप्रसिद्धये कामादिक्लेशबंधेन युक्तस्य न हि मुक्तता ५१ जीवन्मुक्तिरियं माभूत् जन्माभा
वे त्वहं कृती तर्हि जन्मापि तेस्त्वेव स्वर्गमात्रकृती भवान् ५२ दयातिशयदोषेण स्वर्गो हेयो यदा तदा स्वयं दोषतमा
त्मायं कामादिः किं न हीयते ॥ ५३ ॥ तत्त्वं बुद्ध्वापि कामादीन्निःशेषं न जहासि चेत् यथेष्टाचरणं ते स्यात्कर्मशास्त्राति

र्थविघातकत्वेनातीवदोषरूपस्य कामादेः सुतरां त्याज्यत्वमित्याह तदा स्वयमिति ५३ ननु वैराग्यादिसंपादनेनात्यंतता
नर्थहेतोः कामादेः त्यक्तत्वात् ऐहिकभोगमात्रोपयोगिकामाद्यभ्युपगमे को दोष इत्याशंक्याह तत्त्वमिति तत्त्ववित्त्वाभिमा
नेन विधिनिषेधशास्त्रमतिक्रम्य कामाद्यधीनतया वर्तमानस्य तव यथेष्टाचरणं स्यादित्यर्थः ॥ ५४ ॥ रामराम ॥

मात्रपदेन विहितस्यैवानर्थानुत्पादकस्य कामादेर्ग्रहणं २

[Left margin:] नकेवलादिसाधनस्य शास्त्रविहितत्वप्रसंगात्
तदेतद्विषयप्रकामादिः ॥ २ ॥ तत्रतत ॥

दोषदृष्ट्यादीन् विज्ञाय ८

दोषदृष्ट्यादिना कामादित्यागहेतुत्वं १

अस्तु को दोषः इत्याशंक्य तदनिष्टत्वप्रतिपादनपरं सुरेश्वराचार्यवचनमुदाहरति बुद्धेति बुद्धमद्वैतस्वतत्वं अद्वैतस्वरू
पं ब्रह्मयेन स बुद्धाद्वैतस्वतत्वस्तत्ववित्तस्य यथेष्टाचरणं यदि स्यात् तर्हि अशुचिभक्षणादिकमपि स्यात् तथा स
ति शुनां तत्वदृशां चैव न कोपि विशेषः स्यादित्यर्थः ॥ ५४ ॥ एतावता किमनिष्टमायातमित्याशंक्य सोपहासमुत्तर
माह बोधादिति तत्वज्ञानोदयात्प्राक् कामक्रोधादिचित्तदोषैस्त्वं क्लेशोऽभूत् इदानीं तु सर्वलोकनिंदमपि सहस्व इ
ति क्लेशाद्वै गुण्यमिति भावः ॥ ५५ ॥ तर्हि किं कर्तव्यमित्यत आह विद्वतेति सर्वोत्कर्षहेतुज्ञानवांस्त्वं कामादित्यागाच्छ्ला
घ्यो भवेति शेषः ॥ ५६ ॥ बुद्धाद्वैतस्वतत्वस्य यथेष्टाचरणं यदि शुनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ ५४ ॥ बोधात्पुरा मनोमात्रदोषैः
क्लिष्टोऽस्यथाधुना अशेषलोकनिंदा चेत्यहो ते बोधवैभवं ॥ ५५ ॥ विद्वराहादितुल्यत्वं माकांक्षीस्तत्वविद्भवा
न् सर्वधीदोषसंत्यागाल्लोकैः पूज्यस्व देववत् ॥ ५६ ॥ कामादिदोषदृष्ट्याद्याः कामादित्यागहेतवः प्रसिद्धा मोक्ष
शास्त्रेषु तानन्विष्य सुखीभव ॥ ५७ ॥ रामराम ॥
तत्वेन सर्वोधर्मे विद्वराहादिसाम्यं माकांक्षीः किंतु कामादिलक्षणसकलमनोदोषहानेन सर्वजनैर्देववत्पूज्यस्वपूज्यो
भवेदित्यर्थः ॥ ५६ ॥ तत्त्यागोपायमाह कामेति काम्याः कामनाविषयाः स्त्र्यादय आदयो येषां द्वेष्यादीनां ते काम्यादय
स्तेषां ये दोषा अनित्यत्वसातिशयत्वादयस्तेषां दृष्टिरवलोकनमाद्यं येषां कामस्वरूपविचारादीनां ते तथोक्तास्तेषां का

॥ १ ॥

कामादिदोषदृष्ट्याद्याः १

कामादिदोषदृष्ट्यादीनां १

ननु कामादीनामनर्थहेतुत्वात्त्याज्यत्वमस्तु मनोराज्यस्य तु तथात्वात् तत्त्यागो नापेक्षित इति शंकते त्यज्यतामिति साक्षा
दनर्थहेतुत्वाभावेपि परंपरया तद्धेतुत्वात्त्याज्यत्वमेवेत्यभिप्रेत्य परिहरति अशेषेति ॥ परंपरयानर्थहेतु
त्वप्रदर्शनपरं भगवद्वाक्यमुदाहरति ध्यायत इति ॥ ६० ॥ तर्हि तस्य मनोराज्यस्य कः परिहारोपाय इत्यत आह
शाक्यमिति सोपि कुतः सिध्यतीत्याह सत्संपाद इति ६१ ॥ नन्वष्टांगयोगप्रवृत्तस्य तथात्वेन तदुद्दिष्टतस्य का गतिरि
त्यत आह बुद्धेति बुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्त्वस्तेन कामक्रोधादिबुद्धिदोषरहितेन एतेन शक्यं
त्यज्यतामेवं कामादिर्मनोराज्ये तत्कारणतः अशेषदोषबीजत्वात् इति भगवतेरिता ॥ ५८ ॥ ध्यायतो विषयान्पुं
सः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजायते ॥ ६२ ॥ शाक्यं जेतुं मनोराज्यं निर्विकल्पसमाधि
तः सत्संपादः क्रमात्सोपि सविकल्पसमाधिना ॥ ६३ ॥ बुद्धतत्त्वेन धीदोषशून्येनैकांतवासिना दीर्घप्रणवमु
च्चार्य मनोराज्यं विजीयते ॥ ६४ ॥ जिते तस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् एतत्पदं वसिष्ठेन रामाय बहुधेरि· ति
तवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घं बहुद्वादशादिमात्रोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं विजीय
ते निवार्यते इत्यर्थः ॥ ६४ ॥ मनोराज्यविजये किं भवतीत्यत आह जितेतस्मिन्निति यथा मूकः सकलवाग्व्यव
हाररहितस्तिष्ठत्येवं मनोपि सर्वव्यापाररहितं भवति तिष्ठत इत्यर्थः अत्र निकमनोवस्थानस्य पुरुषार्थत्वे प्रमाण

समाधिरष्टांगयोगः   मनोराज्यस्यानर्थहेतुत्वे ३

॥ वं॰ दृ॰ ॥ = वि॰ प्र॰ ॥ नि॰ यं॰ २

वशिष्ठश्लोकद्वयमुदाहरति दृश्यमिति नेह नानास्ति किंचनेत्यादिश्रुत्याऽद्वितीयब्रह्मातिरिक्तजगदभावज्ञानेन मनसः सकाशाद्दृश्यनिवारणं संपन्नं यदि तर्हि निरतिशयमोक्षसुखं निष्पन्नमिति जानीयादित्यर्थः ॥ ६३ ॥ श्रुत्वैत शास्त्रमत्यर्थं विचारितं तत्पापरस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं प्रत्यापितं च एवं कृत्वा किं निश्चितमि त्याह संत्यक्तेति सम्यक्परित्यक्तकामादिवासनानां मनसां तूष्णींभावादृतेऽधिकः पुरुषार्थो नास्तीति निश्चित

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनं संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ ६४ ॥ रामराम
विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं ॥ ६५ ॥ राम
विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना पुनः समाहिता सा स्यात्तदैवाभ्यासपाटवात् ॥ ६६ ॥
विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ॥ ६७ ॥ रामरा

मित्यर्थः ॥ ६५ ॥ एवं निवृत्तिकस्य चित्तस्य प्रारब्धकर्मणा बुद्धिविक्षेपे सति तत्प्रतीकारोपायः क इत्यपेक्षायामाह ॥ वि क्षिप्यत इति भोगप्रदेन प्रारब्धकर्मणा बुद्धिः कदाचिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासपाटवात्तदैव पुनरपि स माहितास्यादित्यर्थः ॥ ६६ ॥ सदा चित्तविक्षेपरहितस्य ब्रह्मवित्त्वमप्यौपचारिकमित्याह विक्षेप इति पारदर्शि नो वेदांतपारंगता ॥ = ॥ ६७ ॥ रामराम

॥ ९ ॥

एवं संसारापत्तिमभिधाय तन्निवृत्त्युपायं दर्शयितुं दृष्टांतेन तावदाह सत्कर्मेति ते कीटाः सत्कर्मपरिपाकात्पूर्वो
पार्जितपुण्यकर्मपरिपाकात्कृपालुना केनचित्पुरुषविशेषेण उद्धृताः नदीप्रवाहाद्बहिर्निःसारिताः संतस्तीरतरु
छायां प्राप्य सुखं यथा भवंति तथा विश्राम्यंति ॥३२॥ इदानीं दृष्टांतेन सिद्धमर्थं दार्ष्टांतिके योजयति उपदेशमिति एवम
नेन प्रकारेण पूर्वोपार्जितपुण्यकर्मपरिपाकवशाद्देवतत्त्वदर्शिनः प्रत्यगभिन्नब्रह्मसाक्षात्कारवंत आचार्याद्गुरोः
सकाशादुपदेशं तत्त्वमस्यादिवाक्यार्थज्ञानसाधनं श्रवणं वक्ष्यमाणमवाप्य संपाद्य पंचकोशविवेकेनान्नादीनां

व्रजंतो जन्मो जन्म लभंते नैव निर्वृतिं ॥३१॥ सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः प्राप्य तीरतरुच्छायां
विश्राम्यंति यथा सुखं ॥३२॥ उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः पंचकोशविवेकेन लभंते निर्वृतिं परां
॥३३॥ अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ॥३४॥ ॥

पंचानां कोशानां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृतिं मोक्षसुखं लभंते प्राप्नुवंति ३३ के ते अन्नादयः पंचकोशा
इत्याकांक्षायां तानुपदिशति अन्नं प्राण इति अन्नं प्राणो मनो बुद्धिरानंदश्चेति एते पंचकोशाः बुद्धिर्विज्ञानं ते
षामन्नादीनां कोश[illegible]भिधेयत्वे [illegible]कारणमाह तैरिति तैः कोशैरावृतस्त्वाच्छादितः स्वात्मा स्वरूपभूत आत्मा
विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं
जननादिप्राप्तिरूपं संसारं व्रजेत् स्पष्टं को

शः यथा कोशकारकृमेरावरकत्वेन क्लेश ॥
हेतुरेवमन्नादयो मयानंदा[illegible]वरकत्वे
नात्मनः क्लेशहेतुत्वात्कोश इत्युच्यते इत्यर्थः
॥ ३४ ॥

तेषां कोशानां स्वरूपाणि क्रमेण व्युत्पादयति स्यात्पंचीकृतेत्यादिना मोदादिवृत्तिभिरित्यंतेन सार्द्धश्लोकद्वयेन पंची
कृतेभ्योत्पन्नः स्थूलो देहोन्नसंज्ञकः अन्नमयशब्दितः कोशः स्यात् प्राणस्तु प्राणमयकोशस्तु लिंगे लिंगशरीरे वर्त्ति
मानैः राजसैः रजोगुणकार्यभूतैः प्राणैः प्राणापानादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सह दशभिः स्यात्
ऽथ विमर्शात्मा संशयात्मकं पंचभूतसत्वकार्यं यन्मनउक्तं तत्सात्विकैः प्रत्येकभूतसत्वकार्यभूतैर्धीन्द्रियैः श्रोत्रा
दिभिः पंचभिर्ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यात् इति पूर्वेणैव संबंधः निश्चयात्मिका धीस्तेषामेव स

स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः लिंगेस्तु राजसैः प्राणैः प्राणः कर्मेंद्रि ॥=॥
यैः सह ऽथ सात्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः तैरेव साकं विज्ञानमयो धीर्निश्चया
त्मिका ऽथ कारणे सत्वमानंदमयो मोदादिवृत्तिभिः तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो

त्वकार्यं रूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञानेंद्रियैरेव साकं सहिता सती बुद्धिर्विज्ञानमयो विज्ञानमयाख्यः कोशः स्यात् ऽथ
कारणे कारणशरीरभूतायामविद्यायां यन्मलिनसत्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यैरिष्टदर्शन
लाभभोगजन्यैः सुखविशेषैः सहितमानंदमयमानंदमयाख्यः कोशः स्यादिति ननु स्थूलशरीरादीनामन्नमया
दिशब्दवाच्यत्वे स वा एष पुरुषोऽन्नरसमयः इत्युपक्रम्य तस्माद्वा एतस्माद्वा अन्नरसमयादन्योंतर आत्मा प्राणमय

شست و یک

۹

पं. प्र.
॥ १ ॥

ॐ श्रीगणेशाय नमः श्रीगुरवे नमः श्रीरामाय नमः श्रीशंकराय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्य ती
तत्त्वविवेकस्य क्रियते पददीपिका १ आरिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरि
प्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मंगलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति अर्था
द्विषयप्रयोजने च सूचयति नम इति शं सुखं करोतीति शंकरः सकलजगदानंदकरः परमात्मैव एष ह्येवानंदयातीति
श्रुतेः आनंदः निरतिशयप्रेमास्पदत्वेन परमानंदस्वरूपः प्रत्यगात्मा शंकरश्चासावानंदश्चेति शंकरानंदः प्रत्य

श्रीगणेशाय नमः नमः श्रीशंकरानंदगुरुपादांबुजन्मने सविलासमहामोहग्राहग्रासैककर्मणे ॥१॥
तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां सुखबोधाय तत्त्वस्य विवेकोऽयं विधीयते ॥२॥ रामाय नमः ॥

गभिन्नः परमात्मा स एव गुरुः परिपक्वमलोपेतान् उत्पादनहेतुशक्तिपातेन योजयति परे तत्त्वे स दीक्षया चार्यमूर्तिस्थ
इत्यागमात् श्रीमांश्चासौ शंकरानंदगुरुश्चेति गंधर्वविद्वद्इत्यादिवत्समासः अनेन गुरो [illegible] रणमाहे
श्वर्यसंपन्नत्वं सूचितम् यद्वा श्रिया विभात्या शं करोतीति श्रीशंकरः रतेर्दातुः परायणमिति श्रुतेः अनेन श्रीगुरोरभे
दोऽपि संपादने सामर्थ्यं सूचितं भवति तस्य गुरोः पादावेवांबुजन्म चरणकमलं तस्मै नमः प्रह्वीभावोऽस्तु किंविधाय स
विलासमहामोहग्राहग्रासैककर्मणे विलासः कार्यवर्गः तेन सह वर्तत इति सविलासः एवंविधो यो महा

१

ऐतरेयोपनिषद्वाक्यमर्थतोनुसंक्रामति आत्मेति आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ऐक्षत लो
कान्नु सृजा इति स इमान् लोकानसृजतेत्यनेन वाक्येनाद्वितीयस्य परमात्मन एव जगत्स्रष्टृत्वं बह्वृचा ऋ
ग्वेदाध्यायिन आहुरित्यर्थः ॥३॥ ईश्वरस्य जगत्कारणत्वे तैत्तिरीयश्रुतिरपि प्रमाणमित्यभिप्रेत्य तद्वाक्य
मर्थतः पठति द्वाभ्यां स्वमिति ॥४॥ सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्या

आत्मा वा इदमग्रे भूत्वा ऐक्षत सृजा इति संकल्पेनासृजल्लोकान्स एतानिति बह्वृचाः ॥३॥=॥
त्रै ष खं वाय्वग्निजलोर्व्यौषध्यन्नदेहाः क्रमादमी संभूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलाः ॥४॥
बहु स्यामहमेवातः प्रजायेयेति कामतः तपस्तप्त्वासृजत्सर्वं जगदित्याह तित्तिरिः ॥ ॥५॥=॥

दिनान्नात्पुरुष इत्यंतेन वाक्येन गृहीतत्वेन प्रत्यगभिन्नाद्ब्रह्मण आकाशादिदेहपर्यंतं जगदुत्पन्नमित्यभिधा
योपरिष्टादपि सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेति वा
क्येन तस्यैव ब्रह्मणो जगत्सर्जनेच्छापूर्वकपर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिराहेत्यर्थः ॥५॥ रि रामरामराम

छांदोग्येपि ब्रह्मण एव जगत्सृष्टत्वं श्रुतमित्याह इदमिति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सद्रूप
मद्वितीयं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिना तस्यैवेक्षणपूर्वकं तेजोऽबन्नसृ
ष्टत्वमभिधाय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवंत्यंडजं जरायुजमुद्भिज्जमित्यादिना अंडजादि
शरीरनिर्मातृत्वं च सामगा वर्णयंतीत्यर्थः ॥६॥ मांडूक्योपि निबद्धं पितदेतत्सत्यं यथा सुदीप्तात्पावकाद्वि
स्फुलिंगाः सहस्रशः प्रभवंते सरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीत्यक्षरशब्द

इदमग्रे सदेवासीद्बहुत्वायतदैक्षत । तेजोऽबन्नांडजादीनि ससर्जेति च सामगाः ॥६॥=॥=॥
विस्फुलिंगा यथा वह्नेर्जायंतेऽक्षरतस्तथा । विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः ॥७॥
जगत्तव्याकृतं पूर्वमासीत्तव्याक्रियताधुना । दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ॥८॥

वाच्यात्तद्ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह विस्फुलिंगेति ॥७॥ एवं बृहदारण्यकेप्यव्याकृतशब्दवाच्या
द्ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतमित्याह जगदिति तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपा
भ्यामेव व्याक्रियतासौ नामायमिदं रूपमिति वाक्ये नरूढेः पुरा सृष्टेर्नामरूपत्वेनाव्याकृतशब्दवाच्या
न्मायोपाधिकाद्ब्रह्मणो नामरूपस्य स्पष्टीकरणलक्षणेन स्फुटीकृतात्तयोर्नामरूपयोर्विराडादिषु स्थूलका

तेच विराडादय आत्मैवेदमग्र आसीत्पुरुषविध इत्यादिना एवमेव यदिदं किंचन मिथुनमापिपीलिकाभ्य
स्तत्सर्वमसृजत ते त्वया नेन दर्शिता इत्यर्थः ॥९॥ उदाहृताभिः श्रुतिभिर्द्वैतसृष्ट्यभिधानानंतरं ब्रह्मणो जीव
रूपेण तत्र प्रवेशोप्यभिहित इत्याह कृत्वेति श्रुतयः जैवं जीवसंबंधिरूपांतरमविक्रियात् ब्रह्मणो विल
क्षणं विकारिरूपमित्यर्थः देहे देहे जाते जीवत्वं कुत इत्यत आह जीवत्वमिति प्राणादीनां स्वामित्वेन प्रेरक
त्वे प्राणधारणेन तस्मात् ॥१०॥ जीवरूपं कृत्वा प्रविष्टादित्युक्ते किं तद्रूपमपेक्षमाह चैतन्यमिति अधिष्ठानं लिंगदे
विराड्मनुर्नरा गावः खराश्वाजादयस्तथा पिपीलिकावधि द्वंद्वमिति वाजसनेयिनः ॥९॥ कृत्वा रूपांतरं
जैवं देहे प्राविशदीश्वरः इति तां श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ॥१०॥ चैतन्यं यदधिष्ठानं लिंगदेहश्च
यः पुनः चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते ॥११॥ माहेश्वरी तु या माया तस्या निर्माणशक्तिवत्
देहकल्पनाधारभूतं यद्वैतन्यमस्ति यश्च तत्र कल्पितो लिंगदेहो या पुनश्चिच्छाया लिंगदेहस्था यश्च तस्मिन् लिंग
देहे वर्तमानश्चिदाभासस्तत्संघस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्यर्थः ॥११॥ नन्वीश्वरस्यैव जीवरूपे
ण प्रविष्टत्वे तस्याज्ञानत्वदुःखित्वादिविरुद्धधर्मवत्वं कुत इत्याशंक्याह माहेश्वरीति माहेश्वरी मायिनं
तु महेश्वरमिति श्रुत्युक्ता महेश्वरसंबंधिनी या माया शक्तिस्तस्या निर्माणशक्तिवज्जगत्सर्जनसामर्थ्यवन्मोहश

पं॰दे॰ ॥ दे ॥ ३

अत्रैतौ मोहनशक्तिसंपन्नावुक्ते जीवं मोहयति चिदानंदादिस्वरूपज्ञानरहितं करोति ॥ १२ ॥ ततोऽपि किमित्यत आह मोहादिति मोहात्स्वरूपज्ञानादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसामर्थ्यं प्राप्य वपुषि मग्नः शरीरेतादात्म्याभिमानं गतः शोचति दुःखित्वाभिमानं करोति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्यर्थः वक्ष्यमाणसांकर्यपरिहाराय वृत्तं निगमयति ईशेति समासतः संक्षेपेणोत्पद्यते इत्यर्थः ननु जीवस्य द्वैतस्य च त्वे किं मानमित्याशंक्याह सत्यान्वेति कथं तत्र प्रपंचितमित्याशंक्य सत्यान्त शब्दार्थे वा

वेदभागे विद्यते मोहशक्तिश्रुतं जीवं मोहयत्यसौ ॥ १३ ॥ मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ईशस्य मिदं द्वैतं सर्वमुक्तं समासतः ॥ १३ ॥ सत्यान्त ब्राह्मणे द्वैतं जीवस्य च प्रपंचितं अन्नानि सप्त ज्ञानेन कर्मणा

चत जनयत्पिता ॥ १४ ॥ मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं तृतीयकं अन्नत्रितयमाध्यात्मिकानां विनियोजनं ॥ १५ ॥ ० मा सर्वप्रतिपादकं यत्सप्तान्नब्राह्मणं तन्मेधया तपसाजनयत्पितेति वाक्यमर्थतः संगृह्णाति अन्नानीति पिता स्वाहुरण्यगर्भजगदित्यादनेन सर्वलोकपालको जीव इत्यर्थः ॥ १४ ॥ नन्वन्नसप्तकमर्जितं किमर्थमित्याशंक्य तद्विनियोगोऽप्येकमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्मने कुरुत पशुभ्य एकं प्रायच्छदिति वाक्ये नोक्त इत्याह मर्त्यान्नमिति विनियोजनमुक्तमिति शेषः ॥ १५ ॥ रामरामरामराम ॥ ॥ ३ ॥

अनुभवरूपस्यात्मनोऽनुभाव्यत्वाभावे दृष्टान्तमाह माधुर्यादीति आदिशब्देनाम्लादयो गृह्यन्ते माधुर्यादयः स्वभा वाः सहजा धर्मविशेषा येषां ते माधुर्यादिस्वभावाः गुडादयस्तेषामन्यत्र स्वस्मात्स्वस्मादन्यपदार्थेषु चणकादिषु गुणा र्पिणां स्वगुणान्माधुर्यादीनर्पयन्तीति स्वगुणार्पिणस्तेषां स्वस्मिन्स्वस्वरूपे गुडादिलक्षणे तदर्पणापेक्षा तेषां माधुर्यादीनामर्पणे संपादनेऽपेक्षा आकांक्षा माधुर्यादिकं केनचित्पदार्थेन संपादनीयमित्येवंरूपा नो नैव विद्य

माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पिणां स्वस्मिंस्तदर्पणापेक्षा नो न चास्त्यन्यदर्पकं ॥२४॥
अर्पकान्तररहितत्वेऽप्य[illegible]षां तत्स्वभावता मा भूत्तथानुभाव्यत्वं बोधात्मा तु न हीयते ॥२५॥ स्वे
स्वयंज्योतिर्भवत्येष पुरोऽस्माद्भासतेऽखिलात् तमेव भान्तमन्वेति तद्भासा भास्यते जगत् ॥२६॥

ते किं चान्यदर्पकं नास्ति गुडादीनां माधुर्यादिप्रदं वस्त्वन्तरं नास्तीत्यर्थः ॥२४॥ सदृष्टान्तं फलितमाह अर्पकमि ति माधुर्यादिसमर्पकवस्त्वन्तराभावेऽपि येषां गुडादीनां माधुर्यादिस्वभावता यथा विद्यते एवमात्मनोऽप्यनुभववि षयत्वं मा भूदनुभवरूपता तु भवत्येवेत्यर्थः ॥२५॥ उक्तार्थे प्रमाणमाह स्वयमिति अत्रायं पुरुषः स्वयंज्योति र्भवति अस्मात्सर्वस्मात्पुरतः सर्वं विभाति तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुतयः आत्मनः स्वप्रकाशत्वं बोधयन्तीत्यर्थः ॥२६॥ रामरामराम सर्वाय नमः ॥ ॥

(margin) विभाति

॥ पं.चे. ॥
के.
॥ ६ ॥

येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति वाक्यमर्थतः पठति येनेदमिति येन साक्षि
चैतन्यरूपेणात्मनेदं सर्वं दृश्यजातं जानते प्राणिनस्तं साक्षिणमात्मानमन्येन केन साधनभूतेन जडेन जानताम
वगछेयुः प्रमातारः इति शेषः अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारमिति दृश्यजातस्य ज्ञातारं केन दृश्यभूतेन
विंद्याद्विजानीयान्न केनापि जानातीत्यर्थः ननु मनसा ज्ञास्यतीत्याशंक्याह शास्त्रमिति साधनं ज्ञानस्य साधनं
तन्मनः वेद्ये ज्ञातव्ये विषये शाक्तं समर्थं न तु ज्ञातर्यात्मनि नैव वाचा न मनसेत्यादिश्रुतेः स्वस्यापि ज्ञेयत्वे कर्मकर्तृ

येनेदं जानते सर्वं तत्केनान्येन जानतां विज्ञातारं केन विंद्याच्छक्तं वेद्ये तु साधनं ॥ १७ ॥ ॥
स वेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदिता विदिताविदिताभ्यां तत्पृथग्बोधस्वरूपकं ॥ १८ ॥

त्वविरोधाच्चेति भावः ॥ १७ ॥ आत्मनः स्वप्रकाशत्वं च दर्शयति स वेत्ति वेद्यं न च तस्यास्ति वेत्ता अन्यदेव तद्विदि
तादथो अविदितादधीति वाक्यद्वयमपि प्रमाणमिति मत्वा तत्तद्वाक्यद्वयमर्थतः पठति स वेत्तीति स आ
त्मा यत् यद्वेद्यं तत्तत्सर्वं वेत्ति तस्यात्मनो विदिता ज्ञातान्यो नास्ति तद्बोधस्वरूपकं ब्रह्म विदिताविदिताभ्यां
विदितं ज्ञातं ज्ञानेन विषयीकृतं अविदितमज्ञातमज्ञानेनावृतं ताभ्यां पृथग्विलक्षणं बोधस्वरूपत्वादेवेत्य
र्थः ॥ १८ ॥ रामरामरामराम रामरामरामराम ॥ रामरामराम ॥ ॥ ६ ॥

दी॰ टि

उक्तं जीवस्य ज्ञाकारभेदमुदाहरणान्तरेणास्पष्टयति भार्येति ननन्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृस्वस्रादिलक्षणप्रतियोगिगोचरया बुध्या तत्तद्‍पेक्षयेत्यर्थः ॥२३॥ ननु योषिद्‍द्विषया णिभार्यास्तु वेत्यादि ज्ञानान्येवाभिन्नान्युपलभ्यन्ते न तु तद्विषयभूता या योषितः स्वरूपभेदो दृश्यते अतः प्रतियोगिधिया योषिद्भिद्यत इत्युक्तमयुक्तमिति शंकते नन्विति ॥२४॥ ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्याविनाभूतत्वात् ज्ञेयाकारभे

भार्यास्नुषाननन्दा च याता मातेत्यनेकधा प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः ॥२३॥
ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः ॥२४॥
मैवं मांसमयी योषित्काचिदन्या मनोमयी मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी ॥२५॥
भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयं जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् ॥२६॥

दो भौतिकत्वमेवेत्याशयेन परिहरति मैवमिति ॥२५॥ ननु भ्रान्त्यादिस्थले बाह्यविषयाभावात्तत्र वस्तु मनोमयम्। मानप्रमितिस्थले तु तदनुपपन्नं बाह्यवस्तुनः सत्त्वादिति शंकते भ्रान्तीति मानेन चक्षुरादिप्रमाणेन मेयस्य प्रमेयस्ये त्यर्थः ॥२६॥ = ॥ ओम् ओम् ओम् ओंनमः ओंनमः ओंनमः ॥ रामरामरामरामरामराम॥

च
प

वे॰ पं॰ वि

॥ ५ ॥

प्रमितिस्थले बाह्यविषयसत्त्वमंगीकरोति बाढमिति कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह मानेत्वि
ति माने विषयाकृतिस्तु तस्य मेयेन योगात्संबंधात्स्यात् नन्विदं स्वकपोलकल्पितमित्याशंक्याह भाष्येति ॥२७॥
तत्र तावद्दृष्टान्तकारवचनमुदाहरति मूषेति यथा द्रुतं ताम्रं मूषायां सिक्तं सत् तन्निभं जायते तत्समानाकारवद्भ
वति तथा रूपादीन्विषयान्व्याप्नुवद्विषयीकुर्वच्चित्तं ध्रुवमवश्यं तन्निभं दृश्यते उपलभ्यत इत्यर्थः ॥२८॥ ननु
ताम्रादेरग्निसंपर्कात् द्रुतस्य मूषानिषिक्तस्य कठिनमूषाभिघातेन शैत्यापत्तौ मूषाकारापत्तावपि बुद्धेरमू घा

बाढं माने तु मेयेन योगात्स्याद्विषयाकृतिः। भाष्यवार्त्तिककाराभ्यामयमर्थ उदीरितः ॥२७॥
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा। रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवं ॥२८॥
गप व्यंजको वा यथालोको व्यंग्यस्याकारतामियात्। सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते ॥२९॥

र्त्तायास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशंक्य दृष्टांतांतरमाह व्यंजक इति य
था व्यंजकः प्रकाशक आलोक आतपादिर्व्यंग्यस्य प्रकाश्यस्य घटादेराकारतामाकारवत्तामियात् प्राप्नुया
देवं धीरपि सर्वार्थस्य व्यंजकत्वात्सकलपदार्थप्रकाशकत्वादर्थाकारा अर्थस्य आकार इव आकारो यस्याः सा
तथा प्रदृश्यते प्रकर्षेणोपलभ्यत इत्यर्थः ॥२९॥ रामराम॥

॥ ५ ॥

आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वलक्षणमाह सत्यत्वमिति बाधशून्यत्वं सत्यत्वं सत्यमबाध्यं बाध्यं मिथ्ये
ति तद्विवेक इति पूर्वाचार्यैरुक्तत्वात् अस्त्वेवमुक्ते किमायातमित्यत आह जगदिति जगतः स्थूलसूक्ष्मशरीरा
दिलक्षणस्य यो बाधः सुप्तिमूर्छासमाधिषु अविद्यमानता तत्साक्षित्वेनैव वर्तमानस्यात्मनो बाधः किंसा
क्षिकः कः साक्षी अस्य बाधस्यास्ति किंसाक्षिकः न कोपि साक्षी विद्यत इत्यर्थः असाक्षिकोप्यात्मबाधः किं
न स्यादित्याशंक्याह नत्विति साक्षिरहितो बाधो नाभ्युपगंतव्योऽन्यथातिप्रसंगादिति भावः ॥२३॥ उक्तमर्थं दृ

सत्यत्वं बाधराहित्यं जगद्बाधैकसाक्षिणः बाधः किंसाक्षिको ब्रूहि न त्वसाक्षिक इष्यते ॥ = ॥२३॥
अपनीतेषु मूर्तेषु ह्यमूर्तं शिष्यते वियत् शक्येषु बाधितेष्वंते शिष्यते यत्तदेव तत् ॥ = ३० ॥ = ॥

ष्टांतेन स्पष्टयति अपनीतेष्विति मूर्तेषु गृहादिगतेषु घटादिष्वपनीतेषु गृहादिभ्यो निःसारितेषु सत्सु यथापने
पि तमाकाशमेवावशिष्यते एवं स्वव्यतिरिक्तेषु मूर्तामूर्तेषु देहेंद्रियादिषु निराकर्तुं शक्येषु नेति नेतीति श्रुत्या नि सु
राकृतेषु तस्य अंते अवसाने सर्वनिराकरणसाक्षित्वेन यो वा बाधो वशिष्यते स एव बाधरहित आत्मेत्यर्थः ॥२३॥
रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम
रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम ॥

पं०चि०वि०
॥३॥

नन्वप्रतीयमानस्य सर्वस्यापि निषेधे किंचिन्नावशिष्यते अतः कथं शिष्यते यत्तदेव तदित्यवशिष्टस्यात्मत्वमुच्य
त इति शंकते सर्ववाध इति न किंचिदवशिष्यत इति वदतापि तथा प्रयोगसिद्ध्ये सर्वाभावविषयं ज्ञान
मवश्यमभ्युपेतव्यं अतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परिहरति यन्नेति न किंचिदिति शब्दे
न यच्चैतन्यमुच्यते तदेव ब्रूहीत्यर्थः ननु न किंचिदिति अभाववाचकेन किंचिच्छब्देन कथं चैतन्यमुच्यत इ
त्याशंक्य बाधसाक्षिणो वश्यमभ्युपेयत्वादभिधायकशब्देष्वेव विप्रपत्तिर्नाभिधेय इति परिहरति भाषेति

सर्ववाधेन किंचिच्चेद्यन्न किंचित्तदेव तत् भाषा एवात्र भिद्यंते निर्वाधं तावदस्ति हि ॥३१॥ ते

अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्यदः स एव नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ॥३२॥

चि
न
वि
य

अत्र बाधसाक्षिणि प्रत्यगात्मनि भाषा एव न किंचित्सादीत्यादिभाषा एव भिद्यंते एवेत्यर्थः ॥३१॥ उक्तमर्थं श्रुत्या
रूढं करोति अत एवेति यतः साक्षिचैतन्यमबाध्यमत एव स एव नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतो नात्मप
दार्थं निराकरणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्मवस्तुजातं बाधित्वा निराकृत्य अदो निराकर्तुमश
क्यं प्रत्यक्स्वरूपं शेषयत्यवशेषयति ॥३२॥ श्रीगणेशाय नमः रामरामरामरामरामराम रामराम॥ रामरामराम॥ ॥३॥

नेति नेति इति श्रुतिर्बाधयेत्सर्वं बाधितुं बाधितुमशक्यं अवशेषयतीत्युक्तं तत्र कीदृशं बाधितुं शक्यं कीदृशमबा
धितुं शक्यं इति विविदिषायां तदुभयं विभज्य दर्शयति इदं रूपमिति इदमित्येवं रूपं दृश्यत्वेनानुभूयमानं रूपं स्वरूपं
यस्य देहादेस्तदिदं रूपं तु शब्दोऽवधारणे यद्यावदिति पदद्वयं सर्वदृश्योपसंग्रहार्थं एवं च सति यद्दृश्यं तदखिलं
त्यक्तुं शक्यत एवेत्यर्थः अनिर्देश्यरूपः प्रत्यक्त्वेनेदं तया वक्तुमयोग्यः साक्षी अशक्यस्त्यक्तुमित्यर्थः हिनिपातेन प्रसि
द्धिद्योतकेन त्यक्तुः स्वरूपत्वेन त्यागायोग्यतां सूचयति फलितमाह स आत्मेति यो बाधरहितः साक्षी स एवात्मा ना
हंकारादिरित्यपते इत्यर्थः ॥ २३ ॥ भवत्वात्मनोऽबाधत्वं प्रकृते किमायातमित्यत आह सिद्धमिति ब्रह्मणो ब्रह्मलक्ष्य

इदं रूपं तु यद्यावत्तत्त्यक्तुं शक्यतेऽखिलं अशक्यो ह्यनिर्देश्यरूपः स आत्मा बाधवर्जितः ॥ २३ ॥ सिद्धं ब्रह्मणो
सत्यत्वं ज्ञानत्वं तु पुरेरितं स्वयमेवानुभातित्वादित्यादिवचनैः स्फुटं २४ न व्यापित्वाद्देशतो नो नित्यत्वान्नापि कालतः

णो यत्सत्यत्वमभिहितं तदात्मनि सिद्धं भवतु सत्यत्वं ज्ञानत्वं कथमित्याकांक्षायां तत्पूर्वमेवोपपादितमित्याह ज्ञा
नत्वमिति स्वयमेवानुभातित्वाद्विद्यते नानुभाव्यता इत्यादिभिर्वचनैर्ज्ञानरूपत्वं पूर्वमेव सम्यगभिहितमित्यर्थः ॥ २४ ॥
ननु सत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेऽप्यानंत्यं न घटते ब्रह्मण उपचितस्यात्मनि सिद्धेरित्याशंक्य ब्रह्मणि तावत्तत्सा
धयति न व्यापित्वादिति नित्यं विभुः सर्वगतं सुसूक्ष्मं आकाशवत्सर्वगतश्च नित्यः नित्यानां चेतनश्चेतनानां

इदंसर्वंयदयमात्मात्मासर्वं ह्येतद्ब्रह्मैवेदंसर्वमित्यादिश्रुतिषुव्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनाद्ब्रह्मणस्त्रिविध
मप्यानंत्यंदेशकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यमित्यर्थः॥२४॥ नकेवलंश्रुतितः किंतुयुक्तितोपी
त्याह देशकालेति परिच्छेदहेतूनां देशकालान्यवस्तूनांमायया कल्पितत्वाद्गंधर्वनगरादिभिर्गगनस्येव
नदेशादिभिः कृतः पारमार्थिकः परिच्छेदोब्रह्मणोनसंभवति यतोऽतोब्रह्मणपानंत्यंतावद्युक्तमेवतदेत
तत्सत्यमात्माब्रह्मैवब्रह्मात्मैवात्रह्येवंनविचिकित्स्यमित्येवंसत्यमात्मैवब्रह्मसिंहोदेवोब्रह्मभवतिअयमात्मा
ब्रह्मेत्यादिश्रुतिभिरात्मनोब्रह्माभेदप्रतिपादनात् तस्याप्यानंत्यसिद्धमितितात्पर्यं २६॥ ननुजडस्यजगतोब्र
ह्मवत्तेपिसर्वात्म्यादानंत्यंब्रह्मणस्त्रिधा २५॥ देशकालान्यवस्तूनांकल्पितत्वाच्चमायया नदेशादिकृतोंतोस्ति
ब्रह्मानंत्यंस्फुटं ततः २६॥ सत्यंज्ञानमनंतंयद्ब्रह्मतद्वस्तु तस्यतत् ईश्वरत्वंचजीवत्वमुपाधिद्वयकल्पितं २७॥
स॰ आरोपितत्वेनब्रह्मणः परिच्छेदकत्वाभावेपिचेतनयोर्जीवेश्वरयोस्तदसंभवात्तत्कृतपरिच्छेदवत्वेनानंत्यंब्रह्म
णोनसंगच्छतइत्याशंक्यतयोरप्यौपाधिकरूपत्वेनपारमार्थिकत्वाभावान्नतयोरपिवास्तवपरिच्छेदहेतुत्वमि
त्यभिप्रायेणाह सत्यमिति यत्सत्यादिरूपंब्रह्मतद्वस्तु तदेवपरमार्थिकं तस्यब्रह्मणोयल्लोकप्रसिद्धमीश्वरत्वं
जीवत्वंचतद्द्वयमुपाधिद्वयेनकल्पितं अतः कल्पितत्वादेवजडवज्जीवेश्वरयोरपितत्परिच्छेदकत्वाभावइ
तिभावः॥२७॥रामरामरामरामरामरामरामराम॥

आरोपितत्व

मा

एवंसूक्ष्मंशरीरमभिधायतदभिमानित्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थांतरं दर्शयति प्राज्ञ इति प्राज्ञोमलिन

सत्वप्रधानाविद्योपाधिकोजीवस्तत्रतैजः शब्दवाच्यांतःकरणोपलक्षितलिंगशरीरेभिमानेनतादा

त्म्याभिमानेनतैजसत्वंतैजसनामकत्वंप्रपद्यते प्राप्नोति ईशः विशुद्धसत्वप्रधानमायोपाधिकःप

रमेश्वरः तत्रशरीरेऽहमित्यभिमानेनहिरण्यगर्भतांहिरण्यगर्भसंज्ञकत्वंप्रपद्यतइत्यन्वयः तैजस

हिरण्यगर्भयोर्लिंगशरीराभिमानित्वेसमानेसतितयोः परस्परभेदः किंनिबंधनइत्यतआह तयो

प्राज्ञस्तत्राभिमानेनतैजसत्वंप्रपद्यते हिरण्यगर्भतामीशस्तयोः [illegible]ः किं व्यष्टिसमष्टि

दा

ता॥४६॥ समष्टिरीशः सर्वेषांस्वात्मतादात्म्यवेदनात् तदभावात्ततोन्येतुकथ्यंतेव्यष्टिसंज्ञयाऽस्य

रिति तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वंसमष्टित्वंचयद्भवतिअतएवभेदः इत्यर्थः ४६॥ ईश्वरस्यस

मष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमाह समष्टिरिति ईशः ईश्वरोहिरण्यगर्भः सर्वेषांशरी

रोपाधिकानांतैजसानांस्वात्म[illegible]तादात्म्यवेदनात् स्वात्म[illegible]तादात्म्यस्यैकत्वस्यवेदनाज्ज्ञानात्समष्टि

र्भवति ततईश्वरादन्येजीवास्तुतदभावात्तस्यतादात्म्यवेदनस्याभावाद्व्यष्टिसंज्ञयाव्यष्टिशब्देनकथ्यंते४७

पं॰ ॥ टी॰ ॥

एवं लिंगशरीरं तदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीराद्युत्पत्तिसिद्धये पंचीकरणं निरूप
यितुमाह तद्भोगायेति भगवानैश्वर्यादिगुणषट्कसंपन्नः परमेश्वरः पुनः पुनरपि तद्भोगाय तेषां जी
वानां भोगायैव भोग्यभोगायतनजन्मने उत्पत्तये वियदादिकमाकाशा भोग्यस्यान्नपानादेर्भोगायत
नस्य जरायुजादिचतुर्विधशरीरजातस्य च जन्मने उत्पत्तये वियदादिकं आकाशादिभूतपंचकं प्रत्येकमेकै
कं पंचीकरोति अपंचात्मकं पंचात्मकं संपद्यमानं करोतीत्यर्थः ॥२६॥ कथमेकैकस्य पंचपंचात्मकत्व

दिकं

मा॰ का॰ ४

तद्भोगाय पुनर्भोग्यभोगायतनजन्मने पंचीकरोति भगवान्प्रत्येकं वियदादिकं ॥ २६ ॥
द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते २७॥

मित्यत आह द्विधेति वियदादिकमेकैकं द्विधा द्विधा तंत्रेणोच्चारितो द्विधाशब्दः विधाय कृत्वा भाग
द्वयोपेतं कृत्वेत्यर्थः पुनश्च पुनरपि प्रथमं प्रथमं भागं चतुर्धा भागचतुष्टयोपेतं विधायेत्यनुषज्य
ते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेषां चतुर्णां भूतानां यो यो द्वितीयस्थूलो भागस्तेन तेन
सह प्रथमप्रथमभागांशानां चतुर्णां मध्ये एकैकस्य योजनात्ते वियदादयः प्रत्येकं पंचपंचात्मकं भवंति २७॥

॥ टी॰ ॥

एवं पंचीकरणमभिधाय तैर्भूतैः कृतमाद्यं कार्यवर्गं दर्शयति तैरंड इति तैः पंचकृतैर्भूतैरुपादानकारण

भूतैरंडो ब्रह्मांडः उत्पद्यते तत्र ब्रह्मांडांतर्भुवनान्युपरि उपरि भागे वर्त्तमानानि भूरादयः सप्त लोका भू

मेरधः स्थितान्यतलादीनि सप्त पातालानि तेषु च भुवनेषु तैस्तैः प्राणिभिर्भोक्तुं योग्यान्यन्नादीनि तत्तल्लो

कोचितशरीराणि च तैरेव पंचीकृतैर्भूतैरीश्वराज्ञया जायंते एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरी

तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः हिरण्यगर्भः स्थूलेस्मिन् देहे वैश्वानरो भवेत् ॥२८

तैजसा विश्वतां याता देवतिर्यङ्नरादयः ॥२९॥ रामराम रामराम रामराम ॥=॥

रेषु अभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वे एकैकस्थूलशरीराभिमानवतां रूपा व्यष्टि

णां तैजसानां विश्वसंज्ञकत्वं च भवतीत्याह हिरण्यगर्भ इति अस्मिन् स्थूलदेहे वर्त्तमाने हिरण्यगर्भो वैश्वा

नरो भवेत् ॥२८॥ तत्रैव वर्त्तमानास्तैजसा विश्वा भवंति तेषामवांतरभेदमाह देवतिर्यगिति २९ इदानी

संज्ञां तेषां विश्वसंज्ञां प्राप्तानां जीवानां तत्त्वज्ञानरहितत्वेन संसारे त्रिप्रकारं सदृष्टांतं श्लोकद्वयेनाह। त्प

पं २८ ॥ ३ ॥

तेपराग्गिति तेदेवादयः पराग्दर्शिनः बाह्यनेवशब्दादीनिपश्यंतोनतुप्रत्यगात्मानंपरांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यंतिनांतरात्मनः इतिश्रुतेः ननुतार्किकादयोदेहव्यतिरिक्तमात्मानंजानंतीत्याशंक्ययद्यप्यात्मानंतेजानंति तथापिश्रुतिसिद्धतत्वेनजानंतीत्याशयेनोक्तंतस्मादाह प्रत्यगितितएवभोगायसुखाद्यनुभवायमनुष्यादिशरीराण्यपेक्षणीयकर्मतत्तच्छरीरोचितानिकर्माणिकुर्वते

तेपराग्दर्शिनः प्रत्यक्तत्वबोधविवर्जिताः। कुर्वतेकर्मभोगायकर्मकर्त्तुंच भुंजते॥३॥ नद्यांकीटाइवावर्त्तादावर्त्तांतरमाशुते॥ रामराम रामराम॥

जातावेकवचनंपुनश्चकर्मकर्त्तुंदेवादिशरीरैस्तत्तत्फलंभुंजतेचफलानुभवाभावेतत्तत्सजातीयेच्छानुपपत्तौतत्तत्साधनानुष्ठानानुपपत्तेः ३ एवंवर्त्तमानास्तेजीवानदीप्रवाहपतिताः कीटाश्चावर्त्तादावर्त्तांतरमाशुव्रजंतोयथानिर्वृतिसुखंनलभंते एवमाशुजन्मनोजन्मव्रजंतः सुखंनैवलभंतइति३२

१०

४ द्वैतविवेक॥ पत्रे १९॥ =॥

पं० दै० वि० ॥ ३२ ॥

अत्रापि वसिष्ठवाक्यमुदाहरति दर्शनेति यो ब्रह्म जानामि न जानामीति व्यवहारद्वयं परित्यज्य स्वयमद्वितीयचैत
न्यमात्ररूपेणावतिष्ठते स स्वयं ब्रह्मैव न ब्रह्मविदित्यर्थः ॥६९॥ सकलं द्वैतविवेचनमुपसंहरति जीवन्मुक्तेरि
ति असावुक्तप्रकारा जीवन्मुक्तेः पराकाष्ठा निरतिशयपर्यवसानम् मिं जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात् अदि

दर्शनादर्शने हित्वा स्वयं केवलरूपतः । यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयं ॥६९॥
जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् । लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्विवेचितं ॥७०॥
इति द्वैतविवेकः समाप्तः ॥४॥ =॥ रामरामरामराम रामरामराम रामरामराम राम॥

त्यागात् लभ्यते प्राप्यते अतः कारणादिदं जीवद्वैतमीशद्वैतादीश्वरसृष्टद्वैताद्विवेचनं विविच्य प्रदर्शितमित्यर्थः ॥७०॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनीवर्यकिंकरेण रामकृष्णाख्यविरचिता द्वै
तविवेकपदयोजना समाप्ता चतुर्थप्रकरणं ॥४॥ रामरामराम रामरामराम रामरामरामरामराम॥ =॥

॥ ३२ ॥

त्मनः आत्मनस्तु तेन तेन कोशेन सहतादात्म्याभिमानादित्याह तत्तदिति आत्मा प्रत्यगात्मा तत्तत्कोशैस्तैर्न तेन को-
शेन सहतादात्म्याभिमानात्तत्तन्मयस्तत्तत्कोशमयः स्याद्धव हास्यकालेऽन्नमयादिकोशप्राधान्यादन्नमयादिश-
ब्दवाच्य इत्यर्थः तच्छब्द आत्मनः कोशेभ्यो विलक्षणपद्योतनार्थः ॥३७॥ कथं तर्ह्येवंविधस्यात्मनो ब्रह्मत्वं भव-
तीत्याशंक्य कोशविवेचनाद्भवतीत्याह अन्वयेति अन्वयव्यतिरेकाभ्यां वक्ष्यमाणलक्षणाभ्यां पंचकोशविवेक-
तः पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्बोधनेन यद्वा पंचकोशेभ्योऽन्नमयादिभ्यः

अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते ॥३८॥
अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः सोऽन्वयो व्यतिरेकस्तद्भानेऽन्यानवभासनं ॥३९॥

आत्मनः पृथक्करणेन स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्यः उद्धृत्य बुद्ध्या निष्कृष्य चिदानंदस्वरूपं निश्चि-
त्य परं ब्रह्म सर्वान्तरलक्षणं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः ॥३८॥ इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति अभा-
ने इति स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतौ सत्यां आत्मनः प्रतीतौ यद्भानं स्वप्नसाक्षि-
त्वेन यत् स्फुरणमस्ति स आत्मनोऽन्वयस्तस्यामेव स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति अन्यानवभासन-
मन्यस्य स्थूलदेहस्यानवभासनमप्रतीतिर्व्यतिरेकः स्थूलदेहस्येति शेषः अस्मिन् प्रकरणे अन्वयव्यतिरेकशब्दा-

पं॰ १२

एवंस्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगमकौ तौ दर्शयति लिंगेति सुषुप्तौ
सुषुप्त्यवस्थायां लिंगाभाने लिंगस्य सूक्ष्मदेहस्याभाने ऽप्रतीतौ आत्मनो भानं तदवस्थासाक्षित्वेनात्मनः स्फुरणमा
त्मनोऽन्वयः स्यात्तद्भाने आत्मभाने लिंगस्याभानं लिंगदेहस्यास्फुरणं व्यतिरेकः इत्युच्यते ॥४०॥ ननु पंचकोशविवे
चनमुपक्रम्य लिंगदेहविवेचनं प्रकृतासंगतमित्याशंक्य प्राणमयादिकोशत्रितयस्य तत्रैवांतर्भावान्न प्रकृतासंग
तिरित्याह तद्विवेकादिति तस्य लिंगशरीरस्य विवेकाद्विवेचनात् प्राणमनोधिय एतन्नामकाः कोशा विविक्ता आत्मनः
पृथक्कृतास्युः कुतः इत्यत आह ते हीति हि यस्मात्कारणात्ते प्राणमयादयस्त्रयस्तस्मिन् लिंगशरीरे गुणावस्थाभेदमा

लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः व्यतिरेकस्तु तद्भाने लिंगस्याभानमुच्यते ॥४०॥ तद्विवेकाद्विविक्ताः स्युः कोशाः
प्राणमनोधियः ते हि तत्र गुणावस्थाभेदमात्रात्पृथक्कृताः ॥४१॥ सुषुप्त्यभाने भानं तु समाधावात्मनोन्वयः ॥ व्यतिरेकस्त्वा
त्मभाने सुषुप्त्यनवभासनम् ॥४२॥

त्राद्गुणयोः सत्त्वरजसोरवस्थाभेदमात्रात् गुणप्रधानभावेनावस्थानविशेषादेव पृथक्कृताः भेदेन निर्दिष्टा इत्यर्थः ॥४१॥ इदा
नीमानंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्य विवेचनोपायमाह सुषुप्तीति समाधौ वक्ष्यमाणलक्षणायां समाध्य
वस्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहरूपस्य अज्ञानस्याप्रतीतौ आत्मनस्तु तच्छब्दावधारणे आत्मन
एव भानं स्फुरणं यदस्ति स आत्मनोऽन्वयः [illegible] आत्मनः स्फूर्तौ सत्यां सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञान
नस्याप्रतीतिरेव व्यतिरेकस्तस्येति। अत्रायं प्रयोगः प्रत्यगात्मा अन्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्तमानेषु

१२

एवमन्वयव्यतिरेकाभ्यां कोशपंचकाद्विविक्तस्यात्मनो ब्रह्मप्राप्तिर्भवतीत्युक्तं तत्प्रतिपादिकामंगुष्ठमात्रपुरुषोंत
रात्मेत्यादिकां तेविद्याच्छुक्रममृतमित्यंतां कठश्रुतिमर्थतः पठति यथेति यथा येन प्रकारेण मुंजादेस्तन्ना
मकात्तृणविशेषाद्यथा इषीकागर्भस्थकोमलतृणं युक्त्या वहिरावरकत्वेन स्थितानां स्थूलपत्राणां विभजन
लक्षणोपायेन समुद्ध्रियते एवमात्मापि युक्त्यान्वयव्यतिरेकलक्षणोपायेन शरीरत्रितयात्पूर्वोक्तात् शरीरत्रि
तयाद्धीरैः ब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिः समुद्धृतः पृथक्कृतश्चेत्स परंब्रह्मैव जायते चिदानंदरूपत्वसा
लक्षण्यस्योभयोरविशिष्टत्वादित्यभिप्रायः ॥४३ एतावता ग्रंथसंदर्भेण सफलस्य तत्वज्ञानस्य निरूपितत्वादुत्तर

यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः परंब्रह्मैव जायते ॥ ४३ ॥
परापरात्मनोरेवं युक्त्या संभाविनैकता तत्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ॥ ४४ ॥
जगतो यदुपादानं मायामादाय तामसीं निमित्तं शुद्धसत्वां तामुच्यते ब्रह्म तद्गिरा ॥ ४५ ॥

ग्रंथभागस्यानारंभप्रसंग इत्याशंक्य तदारंभसिद्धये वृत्तानुकीर्तनपूर्वकमुत्तरग्रंथस्य तात्पर्यमाह परापरेति एव
मुक्तेन प्रकारेण परापरात्मनोस्तत्त्वंपदार्थयोः परमात्मजीवात्मनोरेकताभिन्नता युक्त्या लक्षणसाम्यप्रदर्शना
द्युपायेन संभाविता अंगीकारिता सा एकता तत्वमस्यादिवाक्यैः स्वार्थभागत्यागेन विरुद्धांशपरित्यागेन लक्ष्यते ल
त्यागेन

पं०द०
॥२२॥

गुणप्रधानां मायामादाय उपाधित्वेन स्वीकृत्य जगत आरोपात्मकस्य कार्यवर्गस्य उपादानमध्यासाधिष्ठानं शुद्धस
त्त्वो विशुद्धसत्त्वप्रधानां तामुपाधित्वेन स्वीकृत्य निमित्तमुपादानाद्यभिन्नकर्तृ भवति तदुभयनिमित्तोपा
दानोभयरूपं ब्रह्म तद्द्वारा तत्त्वमसिवाक्यस्थेन तत्पदेनोच्यते॥४४॥ त्वंपदवाच्यार्थमाह यदेति तदेव ब्र
ह्म यदा यस्यामवस्थायां मलिनसत्त्वां ईषद्रजस्तमोमिश्रणमलिनसत्त्वप्रधानां अत एव कामकर्मादिदूषि
तां तामविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्यते॥४६॥ एवं तत्त्वंपदार्थावभिधा

यदा मलिनसत्त्वां तां कामकर्मादिदूषितां आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते॥४६॥ ग्रम१॥

त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते॥४७॥ =॥

सोऽयमित्यादिवाक्येषु विरोधात्तदिदन्तयोः॥ त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा॥४८॥

एवं वाक्यार्थमाह त्रितयीमिति त्रितयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधान
त्वभेदेनोक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्य अखण्डं भेदरहितं सच्चिदानन्दं ब्रह्म महावा
क्येन लक्ष्यते इत्युक्तं॥४७॥ नन्वेवं लक्षणया त्वावाक्यार्थबोधनं क्व दृष्टमित्याशंक्याह॥ सोऽयमिति सोऽयं देव
दत्त इत्यादिवाक्येषु तदिदन्तयोस्तदेतद्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांश

१३

एवं दृष्टांतमभिधाय दार्ष्टांतिकमाह मायाविद्ये इति एवं सोयं देवदत्त [illegible] दा [illegible] देवदत्तस्य रूपमेक

मेव लक्ष्यते तद्वत् परजीवयोरुपाधी उपाधिभूते माया ऽविद्ये प्रवी[illegible] [illegible] नंदं परं

ब्रह्मैव महावाक्येन लक्ष्यते ॥४९॥ ननु किं महावाक्येन लक्ष्यते सविकल्पकमिति निर्विकल्पकं [illegible] विकल्प

प्रथमे पक्षे दोषमाह पूर्ववादी सविकल्पकस्येति सविकल्पस्य विकल्पेन विपरीततत्वेन कल्पितेन नामजात्या

मायाविद्ये विहायैवमुपाधी परजीवयोः ॥ अखण्डं सच्चिदानंदं परं ब्रह्मैव लक्ष्यते ॥ ४९ ॥

सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्यादवस्तुता ॥ निर्विकल्पस्य लक्ष्यत्वेन दृष्टं न च संभवि ॥

दिरूपेण सह वर्तत इति सविकल्पं तस्य लक्षत्वे वाक्येन बोध्यत्वे लक्ष्यस्य वाक्यार्थं तया लक्ष्यस्यावस्तुता स्या

न्मिथ्यात्वं स्यात् द्वितीये दोषमाह निर्विकल्पस्येति निर्विकल्पस्य नामजात्यादिना रहितस्य लक्ष्यत्वं न दृ

ष्टं लोके न क्वापि दृष्टं न च संभवि उपपद्यमानमपि न भवति लक्ष्यत्वं घटमेव [illegible] निर्विकल्पकत्वव्याघातादिति पूर्ववत् प॰

ब पं८
॥१६॥

सिद्धांती जात्युत्तरत्वान्नेदं चोद्यमिति विकल्पपूर्वकं दोषमाह विकल्प इति सविकल्पस्य वा निर्विकल्पस्य वा
लक्षणत्वमिति यो विकल्पस्त्वया कृतः स किं निर्विकल्पस्य उत सविकल्पस्य वा भवेत् आद्ये प्रथमे पदे व्याहतिः
स्वयोक्तो व्याघात एव अन्यत्र द्वितीये पदे ऽनवस्थादयः तथा हि सविकल्पस्य विकल्प इत्यत्र विकल्पेन स
वर्तेत इत्यत्र तृतीयांतविकल्पपदेन प्रथमांतविकल्पपदेन चैक एव विकल्पोऽभिधीयते द्वौ वा एक एव चेत्स्व

विकल्पो निर्विकल्पस्य वि सविकल्पस्य वा भवेत् आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः ५१

यमेक एव विकल्पाश्रयविशेषणतयाश्रयस्तदाश्रितो विकल्पश्चेत्तदात्माश्रयता द्वौ चेत्तदा तृतीयांतशा
ब्दनिर्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात्तदाश्रयस्यापि सविकल्पत्वात्तद्विशेषणीभूतो विकल्पः किं
प्रथमांतशब्दनिर्दिष्ट उत तेभ्यो ऽन्य एव विकल्प उत ताभ्यामन्यः आद्ये ऽन्योन्याश्रयता द्वितीये विधर्मिविशे
षणीभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट उत तेभ्यो ऽन्यः आद्ये चक्रकापत्तिः द्वितीये तस्याप्यन्य इत्यन

नकेवलमंत्रेवेदंदूषणामपितुसर्वत्रैवंविधविकल्पपूर्वकं [illegible] प्रसरतीत्याह इदमिति इदंविकल्पदूष
णजातंगुणक्रियाजातिद्रव्यसंबंधवस्तुषुगुणादिसंबंधोतिचुर्दश [illegible] समंतात् तथाहि गुणः किंनिर्गु
णेवर्त्तते॑ऽथवागुणवतिक्रियापिक्रियारहितेवर्त्तते क्रियावतिवा आद्येव्याघातस्तत्रान्यत्रात्माश्रयादयइति
सर्वत्रैवेवमूह्यं नन्विदमसदुत्तरंचेत्किंसदुत्तरमित्याशंक्याह तेनेति तेनैवंविकल्पस्यासंगतत्वेनैतद्गुण

इदंगुणक्रियाजातिद्रव्यसंबंधवस्तुषु समंतेनस्वरूपस्यसर्वमेत
दिष्यतां॥५१॥ विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि॥ ॥

दिकंसर्वंस्वरूपस्येति इष्यतांगुणादयःसर्ववस्तुस्वरूपेवर्त्तंतइत्यभिप्रायः॥५१॥भवत्वेवमन्यत्रप्रकृतेकि
मायातमित्यतआह विकल्पेति विकल्पतदभावाभ्यांविकल्पेनविकल्पाभावेनचासंस्पृष्टात्मवस्तुनिसं
स्पर्शरहितेपरात्मवस्तुनिविकल्पितत्वंसंबंधाद्यास्तत्रविकल्पितत्वंनामसविकल्पस्यवानिर्विकल्प
स्यवेतिपूर्वोक्तेननविषयीकृतत्वंलक्षितंलक्षणाव्यासाप्त्याप्यत्वंसंबंधः॥ ग्रामाम सूर्यायनमः ग्रामाम

२२त

पंद ॥ ॥२५॥ ले

संयोगादितादिशब्देन द्रव्यादयो गृह्यंते तु शब्देवधारणे तत्र द्रव्यं नाम गुणानामाश्रयो द्रव्यं समवायिकारणं मात्र
द्रव्यमिति वा तार्किकैर्लक्षितं कर्मव्यतिरेकत्वे सति जातिमानाश्रयो गुणः नित्य[illegible]मेकमनेकवृत्ति सामा
न्यमिति लक्षिता जातिः संयोगविभागयोरसमवायिकारणं जातीयं कर्मेति लक्षिता क्रिया एते सर्वे
स्वरूपे कल्पित एव इत्यर्थः ॥५८॥ एतावता ग्रंथसंदर्भेण किमुक्तं भवतीत्याकांक्षायां फलितमाह इत्यमि

विकल्पितत्वलक्ष्माच संबंधाद्यास्तु कल्पिताः ॥५९॥ इत्येवाक्यैस्तदर्थानु
संधानं श्रवणं भवेत् युक्त्या संभावितत्वानुसंधानं मननं तु तत् ॥६०॥ ॥

ति इत्थं जगतो यदुपादानमित्यादिग्रंथसंदर्भेणोक्तप्रकारेण वाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसं[illegible]
तेषां वाक्यानामर्थस्य जीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानं श्रवणं भवेत् युक्त्या शब्दस्यार्थस्य बोधो वेद्या
इत्यादिना परापरात्मनोरेवं युक्त्या संभावितैकत्वेन तेन ग्रंथसंदर्भेणोक्तप्रकारतया संभावितत्वानुसं
धानं यत्तस्यार्थस्योपपद्यमानत्वज्ञानं यदस्ति तत्तु मननमित्युच्यते ॥६०॥ रामरामरामरामायनमः राम

इदानीं निदिध्यासनमाह ताभ्यामिति ताभ्यां श्रवणमननाभ्यां निर्विचिकित्सेर्थे निर्गता विचिकित्सा संशयो
यस्मादसौ निर्विचिकित्सः तस्मिन्नर्थे विषये स्थापितस्य धारणाविषये वर्तमानस्य चेतसः देशबंधश्चि
त्तस्य धारणेति पतंजलिनोक्तत्वाद्यदेकतानत्वमेकाकारवृत्तिप्रवाहवत्वमेतन्निदिध्यासनमुच्यते [illegible]
हं योगशास्त्रे तत्र प्रत्ययैकतानता ध्यानमिति ॥ ५४ ॥ तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधि

ताभ्यां निर्विचिकित्सेर्थे चेतसः स्थापितस्य यत् एकतानत्वमेतद्धि निदिध्यासनमुच्यते ५४ ॥
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरं निर्वातदीपवच्चित्तं समाधिरभिधीयते ॥ ५५ ॥

माह ध्यातृध्याने इति निदिध्यासने ध्याता ध्यानं ध्येयं चेति त्रितयं भासते तत्र यदा चित्तमभ्यासवशेन
ध्यातृध्याने ध्यातारं ध्यानं च क्रमात्परित्यज्य ध्येयैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तत्तथावि
धं भवति तदा समाधिरित्युच्यते तत्र दृष्टांत निवातेति वायुरहितप्रदेशे वर्तमानो दीपो यथा निश्चलो भव

ननुसमाधौवृत्तीनामनुपलब्धौध्येयैकगोचरत्वमपिनिश्चेतुंनशक्यतेइत्याशंक्यवृत्तिसद्भावस्यानुमानम
स्यत्वात्तैवमित्याह वृत्तयइति आत्मगोचराः आत्मागोचरोविषयोयासांतावृत्तयस्तुतदानींसमा
धिकालेअज्ञाताअपिव्युत्थितस्यसमाधेरुत्थितस्यसमुत्थितादुत्पन्नात्स्मरणात् एतावंतंकालंसमाहि
तोऽभवमित्येवंरूपादनुमीयंते यद्यत्स्मर्यते तत्तदनुभूतमितिव्याप्तेर्लोकसिद्धत्वादित्यर्थः॥५१॥ननुत
दानींवृत्त्युत्पादकप्रयत्नाभावात्कथंवृत्त्यनुवृत्तिरित्याशंक्यतात्कालिकप्रयत्नाभावेपिप्राथमिकादेवप्रय

वृत्तयस्तुतदानीमज्ञाताअप्यात्मगोचराः स्मरणादनुमीयंतेव्युत्थितस्यसमुत्थितात्॥५१॥
वृत्तीनामनुवृत्तिस्तुप्रयत्नात्प्रथमादपि अदृष्टाभ्याससंस्कारसचिवाद्भवेत्॥५२॥ प्र

त्नाददृष्टादिसहकारिसहिताद्भवतीत्याह वृत्तीनामिति ध्येयैकगोचराणांवृत्तीनामनुवृत्तिस्तुप्रवाहरूपेणा
नुगतिस्तुप्रथमादपि प्रयत्नात्समाधिपूर्वकालीनादपिअदृष्टेः शुक्लाकृष्णकर्मजन्योयः पुण्यविशेषः।
कर्माऽशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषामितिपातंजलिनासूचितत्वात् अभ्यासहेतुरभ्याससंस्कारः पु
नःपुनःसमाध्यभ्यासेनजनितोभावनाख्यःसंस्कारविशेषःताभ्यांसहकारिकारणाभ्यांसहवर्तमानोद्भव

पं८
॥१६॥

ना
१६

152

न त्वयं समाधिः पूर्वाचार्यैर्न निरूपितो ऽस्तीत्याशंक्य सर्वगुरुणा श्रीपुरुषोत्तमेन निरूपितत्वमेवमित्याह यथे

ति यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकधा नानाप्रकारैर्भगवान् ज्ञानैश्वर्यादिसं

पन्न इममेव निर्विकल्पकं समाधिरूपमर्थमर्जुनाय निरूपितवान् ५८॥ अस्य समाधेरवांतरफलमाह अना

दाविति अनादौ स्पष्टं इहास्मिन् संसारे संचिताः संपादिताः कर्मकोटयः कर्माणि पुण्यापुण्यलक्षणानि कोटय

यथा दीपो निवातस्थ इत्यादिभिरनेकधा भगवानिममेवार्थमर्जुनाय निरूपितवान् ॥५८॥

अनादाविह संसारे संचिताः कर्मकोटयः अनेन विलयं यांति शुद्धो धर्मो विवर्द्धते ॥५९॥

इत्युपलक्षणं अपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं यांति विनश्यंति क्षीयंते चास्य कर्माणि

ज्ञानाग्निः सर्वकर्माणीति श्रुतेः स्मृतेश्च शुद्धो धर्मः सविलासाविद्यानिवर्तकतत्त्वसाक्षात्कारसाधनभू

तो धर्मो विवर्द्धते स्पष्टं ॥५९॥ शिवाय नमः रामाय सूर्याय नमः प्रभाकराय नमः दिनकराय नमः ॥

29

वे३

६५ ॥६२॥

तत्र किं प्रमाणमित्याह धर्मेति योगवित्तमाः श्रुतिप्रायेन योगज्ञा ब्रह्मसाक्षात्कारवंत इतियावत् इमं निर्विकल्पसमाधिं धर्ममेघं प्राहुः स्वयं एनं उत्पादयति वर्षतीति यतः कारणादेष निर्विकल्पकसमाधिः [illegible] धर्मामृतधाराः धर्मलक्षणा अमृतधारा सहस्रशो वर्षति लक्षणमेकं कृतं शतस्यापीति श्रुतेः अतो धर्ममेघं प्राहुरिति पूर्वेणान्वयः ६०. इदानीं समाधेः परमप्रयोजनमाह अमुनेति अमुना समाधिना वासनाजाले अहंकारममकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धे संस्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्म-

धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ॥६०॥
अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ॥६१॥
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासते करामलकवद्बोधमपरोक्षं प्रसूयते ॥६२॥

संचये समूलोन्मूलिते मूलसहितं यथा भवति तथोन्मूलिते उच्छित्ते विनाशिते इतियावत् ॥६१॥ फलितमाह वाक्यमिति वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिबद्धं सत्कं एवासनाख्यप्रतिबंधरहितं सत् तद्वाक्यं परोक्षावभासि ते पूर्वं परोक्षतया प्रकाशितेन तत्त्वं करामलकवत् हस्तस्थितामलकगोचरमिवापरोक्षमपरोक्षतया तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते जनयति ॥ ॥

१ तत्वविवेक॥ व्रे १८

६५
॥ऐ॥

तत्र किं प्रमाणमित्याह धर्मेति योगवित्तमाः श्रुतिप्रायेन योगज्ञा ब्रह्मसाक्षात्कारवंत इति यावत् इमं निर्विकल्पस
माधिं धर्ममेघं प्राहुः स्यपेक्षेण तदुपपादयति वर्षतीति यतः कारणादेष निर्विकल्पकसमाधिः धर्मामृतधा
रा धर्मलक्षणा अमृतधारा सहस्रशो वर्षति लक्षणमेकं कृत्वा शतस्यापीति श्रुतेः अतो धर्ममेघं प्राहुरिति पूर्वेणान्व
यः ६० इदानीं समाधेः परमप्रयोजनमाह अमुनेति अमुना समाधिना वासनाजाले अहंकारममकारकर्तृत्वाद्य
भिमानहेतुभूते ज्ञानविरुद्धे संस्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्म

धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ॥६०॥
अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६१॥
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासते करामलकवद्बोधमपरोक्षं प्रसूयते ॥६२॥

संचये समूलोन्मूलिते मूलसहितं यथा भवति तथोन्मूलिते उच्छित्ते विनाशिते इति यावत् ॥६१॥ फलितमाह
वाक्यमिति वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिबद्धं सत्कमेवासनाद्यां प्रतिबंधरहितं सत् प्राक् परोक्षावभासि
ते पूर्वं परोक्षतया प्रकाशिते तत्त्वे करामलकवत् हस्तस्थितामलकगोचरमिवापरोक्षमपरोक्षतया तत्त्वावभा
सनसमर्थं बोधं ज्ञानं प्रसूयते जनयति ॥ ॥

१ तत्वविवेक॥ पत्रे १८

वे॰ १५

इदानीं परोक्षज्ञानस्य फलमाह परोक्षमिति दैशिकपूर्वकं सद्गुरुमुखाच्छ्रवणं तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकृतं ज्ञानपूर्वकं यथा भवति तथा कृतं कृत्स्नं समस्तं पापं वह्निवद्दहतीति ॥६३॥ अपरोक्षज्ञानफलमाह अपरोक्षेति प्राग्वद्दैशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानमपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितं यत्तज्ज्ञानं तत्संसारकारणाज्ञानतमसः संसारकारणं यदज्ञानमस्ति तदेव तमस्तस्य चंडभास्करः मध्याह्नकालीनसूर्यः वा तमसश्चंडभास्कर इवाज्ञानतमसो निवर्तकमित्यर्थः ॥६४॥ ग्रंथाभ्यासफलमाह

परोक्षं ब्रह्मविज्ञानं शाब्दं दैशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥६३॥
अपरोक्षात्मविज्ञानं शाब्दं दैशिकपूर्वकं संसारकारणाज्ञानतमसश्चंडभास्करः ॥६४॥
इत्थं तत्त्वविवेकं विधाय विधिवन्मनः समाधाय विगलितसंसृतिबंधः प्राप्नोति परं
पदं नरो न चिरात् ॥६५॥ इति तत्त्वविवेकः समाप्तः ॥१॥ रामरामरामरामराम श्रीसूर्याय नमः

इत्थमिति नर इत्यनुक्तेन परेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं कोशपंचकादिविवेचनं विधाय कृत्वा तस्मिंस्तत्त्वे विधिवदुक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबंधो परोक्षज्ञानेन निवृत्तसंसारबंधः सन् परं परमं तिष्ठायानंदरूपं मोक्षं न चिराद् विलंबेन प्राप्नोति सत्यज्ञानानंदलक्षणं ब्रह्मैवम

वर्तीतिभावः ॥६५॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भारतीतीर्थविद्यारण्य
मुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा
विरचिता तत्त्वविवेकदीपिका समाप्ता ॥१॥

इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति ॥ बहुजन्मेति सार्द्धेन ॥ विपरीतभावनानिवर्तकं यदैकाग्र्यं तत्कुतो जा
यते इत्याशंक्याह ॥ तत्त्वोपदेशादिति एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागेव सगुणब्रह्मोपासनाद्भवेदित्यर्थः ॥१३॥१४॥
ननु तत्कुतो वगम्यमित्याशंक्य उपासनाविचारस्य वेदांतशास्त्रे कृतत्वादित्याह ॥ उपास्तय इति ब्रह्मतोपा

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनःपुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥१३॥
विपरीता भावनेयमैकाग्र्यात्सा निवर्तते ॥ तत्त्वोपदेशात्प्रागेव भवत्वेतदुपासनात् ॥१४॥
उपास्तयोऽत एवात्र ब्रह्मशास्त्रेपि चिंतिताः ॥ प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥१५॥
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥१६॥ ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ ॥

स्तिकस्य कुतः तज्जन्मेत्यत आह ॥ प्रागिति ॥१५॥ ब्रह्माभ्यासश्च कीदृश इत्याकांक्षायामाह ॥ तच्चिंतनमिति ॥१६॥
एतदेकपरत्वं विशदयितुं श्रुतिमाह ॥ तमेव धीरो वीति ॥ धीरो ब्रह्मचर्यादिसाधनसंपन्नो ब्राह्मणो ब्रह्मभवितुमिच्छु
रेकदः तमेव प्रत्यक्रूपं परमात्मानमेव विज्ञाय संपाद्य भावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसं
तति रूपमेकाग्र्यं कुर्वीत संपादयेत् ॥ ॥

वं.८

॥१५॥

इदानीं परोक्षज्ञानस्य फलमाह परोक्षमिति दैशिकपूर्वकं सत् गुरुमुखाच्छास्त्रश्रवणं तत्र मननाद्यागमजन्यं परोक्षं ब्र
ह्मविज्ञानं बुद्धिपूर्वकृतं ज्ञानपूर्वकं महापापं भवति तत्पापं कृतं कृत्स्नं समस्तं पापं वह्निवत् दहति ॥६३॥ अपरोक्षज्ञानफल
माह अपरोक्षेति शास्त्रदैशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानमपरोक्षस्यात्मनो विज्ञानं संशयविपर्यय
रहितं यत् ज्ञानं तत् संसारकारणाज्ञानतमसः संसारकारणं यदज्ञानमस्ति तदेव तमस्तस्य चंडभास्करः
मध्याह्नकालीनसूर्यः वा भूतमसश्चंडभास्कर इवाज्ञानतमसो निवर्तकमित्यर्थः ॥६४॥ ग्रंथाभ्यासफलमाह

परोक्षं ब्रह्मविज्ञानं शास्त्रदैशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥६३॥
अपरोक्षात्मविज्ञानं शास्त्रदैशिकपूर्वकं संसारकारणाज्ञानतमसश्चंडभास्करः ॥६४॥
इत्थं तत्वविवेकं विधाय विधिवन्मनः समाधाय विगलितसंसृतिबंधः प्राप्नोति परं
पदं नरो न चिरात् ॥६५॥ इति तत्वविवेकः समाप्तः ॥१॥ रामरामरामराम श्रीसूर्याय नमः

इत्थमिति नर इत्थमुक्तेन प्रकारेण तत्वविवेकं तत्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं कोशपंचकादिविवेचनं विधा
य कृत्वा तस्मिंस्तत्वे विधिवत् शास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबंधः परोक्षज्ञानेन निवृ
त्तसंसारबंधः सन् परं पदं निरतिशयानंदरूपं मोक्षं न चिरादविलंबेन प्राप्नोति सत्यज्ञानानंदलक्षणं ब्रह्मैव भ

१८

इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति ॥ बहुजन्मेति सार्द्धेन ॥ विपरीतभावनानिवर्तकं यदैकाग्र्यं तत्कुतो जा
यते इत्याशंक्याह ॥ तत्त्वोपदेशादिति एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागेव सगुणब्रह्मोपासनाद्भवेदित्यर्थः ॥ १०३ ॥ १०४ ॥
नन्वेतत्कुतोवगतमित्याशंक्य उपासनाविचारस्य वेदांतशास्त्रेकृतत्वादित्याह ॥ उपास्तय इति श्रुतोपा

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥ १०३ ॥
विपरीता भावनेयमैकाग्र्यात्सा निवर्तते ॥ तत्त्वोपदेशात्प्रागेव भवत्वेतदुपासनात् ॥ १०४ ॥
उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिंतिताः ॥ प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥ १०५ ॥
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥ १०६ ॥ ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ ॥

सितकस्य कुतः तज्जन्मेत्यत आह ॥ प्रागिति ॥ १०५ ॥ ब्रह्माभ्यासस्य कीदृशः इत्याकांक्षायामाह ॥ तच्चिंतनमिति ॥ १०६ ॥
ऐकमुदः तमेव प्रत्यक्रूपं परमात्मानमेव विज्ञाय संपाद्य ॥ भावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानं स
एतदेकपरत्वं विशदयितुं श्रुतिमाह ॥ तमेव धीरो वीति ॥ धीरो ब्रह्मचर्यादिसाधनसंपन्नो ब्राह्मणो ब्रह्मभवितुमिच्छु

तत्त्वमैकात्म्यं ब्रह्मणीति ॥ ॥

अनात्मगोचरात्वहं छद्धात्तानुध्यायात्न समस्मरेत् ध्यानेनाभिधानमप्युलक्ष्यते नाभिदध्याच्चान्यं यथा ध्या
ध्यानेनवाग्विग्लापननानुपपत्तेः कुतः इत्यतआह॥ वाचो विग्लापनं हि तदिति॥ हि यस्मात्तदभिधानमनेन
स्मरणमप्युपलक्ष्यते वाच इति मनसोप्युपलक्षणं विग्लापयतीति विग्लापनं श्रमहेतुः अयमभिप्राय इत
रथा ह्यनुसंधानेन मनसः श्रमो भवति तदभिधानेन वाच इति॥ २१॥ एवमेकान्तप्रतिपादिकां श्रुतिम

पंच
दं
॥ २२॥

नानुध्यायाद्बहूंछद्धान्वाचो विग्लापनं हि तत्॥ १२॥
अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते॥ तेषां नित्या
भियुक्तानां योगक्षेमं वहाम्यहम्॥ ॥ २२॥ समसम॥

भिधाय स्मृतिमप्याह अनन्या इति। ये जना अनन्या अहं वृत्ताः स्मीति ज्ञानेन मदभिन्नाः संतः तथैव मां चिंत
यंतः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूप एव वर्तंते नित्याभियुक्तानां सदा मच्चित्तानां तेषा
महं तादात्म्येनानुसंधीयमानोहं योगक्षेमम् अलब्धलाभलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि संदधामि

गी० टी० अ० ९

१२

अयमभिप्रायः

एतदेव प्रपंचयति ॥ अश्नातीति अश्नाति वान्ने सति कदाचित्तेन वाश्नाति तस्मिन्नसति क्षुद्बाधाविस्मा
रकघृतादिचेष्टया अनश्नन्नेव कालं नयति ॥ अन्यथा वा तिष्ठन् गच्छन् शयनो वा यथेच्छया भुंक्ते एवं येन
केन प्रकारेण तात्कालिकीं क्षुद्बाधामपनेतुमिच्छति अयमभिसंधिः ॥ क्षुद्बाधानिवृत्तिलक्षणदृष्टफला
य भोजनमेव कार्यं नियमास्तु परलोकहेतव इति ॥१२५॥ जपादेर्भोजनादेश्च लक्ष्यं दर्शयति नियमेनेति त
द्धेतुमाह ॥ अकृताविति भवत्येवमकरणे प्रत्यवायोऽन्यथाकरणे तु स नास्तीत्याशंक्याह अन्यथेति ॥ मं

अश्नाति वा न वाश्नाति भुंक्ते वा स्वेच्छयान्यथा येन केन प्रकारेण क्षुद्बाधामपनिनीषति ॥१२॥
नियमेन जपं कुर्यादकृतौ प्रत्यवायतः ॥ अन्यथाकरणेऽनर्थः स्वरवर्णविपर्ययात् ॥१२६॥
देधेव दृष्टबाधाकृत विपरीता च भावना ॥ येन केनाप्युपायेन कालस्तत्रानुष्ठिते क्रमः ॥१२७॥

त्रोहीनः स्वरतो वर्णतो मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोप
राधादित्युक्तत्वादिति भावः ॥१२६॥ ननु दृष्टबाधा यादृष्टबाधाहेतुत्वात्तन्निवृत्तये नियमेनापि भोक्तव्य
मेव विपरीतभावनायास्तु तथाभावात्तन्निवर्त्तकं ध्यानमदृष्टफलाय नियमेनानुष्ठेयमित्याशंक्याह ॥ दृ

त्वा

पंच॰
दी॰
॥११॥
त्रि

मूर्त्युपायः दर्शनीय इत्याशंक्य पूर्वमेव प्रदर्शित इत्याह ॥ उपाय इति ननु जपवत्प्राङ्मुखत्वादि नियमाभावेऽपि ध्यानवदेतदेकपरत्वलक्षणैकाग्रताया निर्बंधोऽस्तीति आशंक्याह ॥ एतदिति ॥११८ ननु ध्यानस्य ध्येयचिंतात्मकत्वात्तत्र कोऽतिनिर्बंध इत्याशंक्य ध्याने निर्बंधं दर्शयितुं ध्यानस्वरूपं तावदाह ॥ मूर्तीति

उपायः पूर्वमेवोक्तस्तच्चिंताकथनादिकः ॥ एतदेकपरत्वेऽपि निर्बंधो ध्यानवन्न हि ॥११९॥
मूर्तिप्रत्ययसांतत्यमन्यानंतरितं धियः ॥ ध्यानं तत्रातिनिर्बंधो मनसश्चंचलात्मनः ॥१२०॥

धियो बुद्धेः संबंधिनां मूर्तिप्रत्ययानां देवमूर्तिगोचराणां प्रत्ययानां यत्सांतत्यमविच्छिन्नतयावर्त्तमानत्वं तदन्यानंतरितं अन्येन विजातीयप्रत्ययेनाऽव्यवहितं तद्ध्यानमित्युच्यते एवं ध्यानस्वरूपं निरूप्य तत्र निर्बंधं दर्शयति ॥ तत्रातीति सदा पर्यटनशीलस्य करितुरगादेरेकत्र स्तंभादौ बंधने यथोपरोधस्त
द्वदिति भावः ॥१२०॥ रामरामराम ॥

॥२६॥

पदार्थशोधनप्रकारमाह जलेति ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपारमार्थिके तयोराधारभूतो घटाकाश
महाकाशौ स्तु निर्मलौ जलाद्युपाधिभिरपेक्षाकाशमात्ररूपावित्यर्थः २२५ दार्ष्टांतिकमाह एवमानंदेति २२६ ननु
पदार्थद्वयशोधनक्लेशोपयोगित्वेनापि सांख्ययोगमतद्वयमंगीकार्यमितिचेत् अत्यल्पमिदमुच्यते इतरेषामपि
शास्त्राणां तत्तत्क्लेशोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह एतत्क्लेशोपयोगेनेति २२७ कुतस्तर्हि सांख्ययोगयोर्वेदांतविरो

जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः आधारौ तु घटाकाशमहाकाशौ स्तु निर्मलौ २२५ ॥
एवमानंदविज्ञानमयौ मायाधियोर्वशौ तदधिष्ठानकूटस्थब्रह्मणी तु विनिर्मले ॥ २२६ ॥
एतत्क्लेशोपयोगेन सांख्ययोगौ मतौ यदि देहात्ममपकदाचाद्रामत्वेनाभ्युपेयतां २२७ ॥
आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयं त्यजते तैस्तदा सांख्ययोगवेदांतसंगतिः ॥ २२८ ॥
जीवासंगत्वमात्रेण कृतार्था इति चेत्तदा स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थता ॥ २२९ ॥

धित्वमित्याशंक्य जीवभेदजगत्सत्यत्वईश्वरतारस्थ्यलक्षणांशे इत्याह आत्मभेद इति २२८ ननु जीवस्यासंगत्व
ज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञानमंतरेणासंगत्वादिकं न संभाव्यते इत्यभिसंधिः स्रगादिनि

वं. त्रि. वि. = ॥ ३९ ॥

अभिसंधिमाविष्करोति यद्येति जीवतोर्विशेष्यविशेषणाकारेणाभासमानयोरित्यर्थः २२९ असंभवमेवस्पष्टयति। अवस्य मिति फलितमाह कोस्येति॥२३०॥ संगनियमयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पुनः संगाद्युत्प त्तिरितिशंकते अविवेकेति एवं सत्यपरिमोक्षापात इतिपरिहरति नदव लादिति अयं भावः अविवेको नाम किंविवेका भावः किं वा तदन्यः उभयविरोधिनाद्यः अभावमात्रस्यभावकार्यजनकत्वायोगात् न द्वितीयः विवेकादन्यस्य घटादेः संग

जीवस्य

यथात्वगादिनित्यत्वेदुःसंपाद्यं तथात्मनः असंगत्वेन संभाव्यं जीवतोर्जगदीशायोः ॥२२९॥

अवश्यं प्रकृतिः संगं पुरे वा पाद्ये त्रयी नियतत्वेन मीशोपि कोस्य मोक्तस्तथासति॥२३१॥

अविवेककृतः संगो नियमश्चेतिचेन्न दा वलादापतितो मायावादः सांख्यस्यदुर्मतेः॥२३२॥

जीवस्य अनेकत्व

वंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां इति चेन्नपतो मायाव्यवस्थापयितुं क्षमा॥२३३॥

हेतुत्वादर्शनात् तृतीये तु तत्स्वभावरूपाज्ञानत्वमेवेति मायावादप्रसंग इति २३२॥ अद्वैताभ्युपगमे वंधमोक्षव्यवस्थानु पपत्तेरात्मभेदोंगीकर्तव्य इति चोदयति वंधमोक्षेति एकस्याप्यात्मनो मायया वंधमोक्षव्यवस्थोपपत्तेर्नैवमिति परिहरति ॥ यतोमायेति॥२३३॥ ओम् राम ओम् राम ओम् राम ओम् राम ओम् राम ओम् २९

श्रीगणेशायनमः श्रीगुरुदेवेनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचभूतविवेकस्यव्याख्यानंक्रियतेम
या१ सदेवसोम्येदमग्रआसीदेकमेवमेवाद्वितीयंब्रह्मेतिश्रुत्याजगदुत्पत्तेः पुराद्यज्जगत्कारणंसद्रूपमद्वितीयं
ब्रह्मश्रुतंतस्यावाङ्मनसगोचरत्वेनस्वतोवगंतुमशक्यत्वात्तत्कार्यत्वेनतदुपाधिभूतस्यभूतपंचकस्यविवे
कद्वारातदवबोधनायोपायत्वेनभूतपंचकविवेकंप्रतिजानीते सदद्वैतमिति १ तत्रतावदाकाशादीनांपं
चानांभूतानांगुणतोभेदज्ञानाय तद्गुणानाह शब्देति नन्वेतेगुणाः किंसर्वेसर्वेषामुत एकैकस्यैकैकगुणइति

सदद्वैतंश्रुतंयत्तत्पंचभूतविवेकतः बोद्धुंशक्यंततोभूतपंचकंप्रविविच्यते॥१॥
शब्दस्पर्शौरूपरसौगंधोभूतगुणाइमे एकद्वित्रिचतुःपंचगुणाव्योमादिषुक्रमात् २॥
प्रतिध्वनिर्वियच्छब्दोवायौबीसीतिशब्दनं अनुष्णाशीतसंस्पर्शोवह्नौभुगुभुगुध्वनिः ३॥

विमर्शयन्नोभयथापिकिंतुप्रकारांतरमस्तीत्यभिप्रायेणाह एकेति २ तदेवप्रकारांतरंविशदयति प्रतिध्वनिरि
ति आकाशेतावच्छब्दएकएवगुणःसचप्रतिध्वनिरूपः वायोःशब्दस्पर्शौ तत्रवायोःशब्दमनुकारेणदर्शयति।
बीसीशब्दनमिति एवमुत्तरत्राप्यनुकारणशब्दनंद्रष्टव्यं तस्यस्पर्शमाह अनुष्णाशीतसंस्पर्श इति॥३॥

निरस्तस्य

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना । आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमिति व्याख्यानलक्ष
णस्योक्तत्वात्पुरुष इति पदस्यार्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षेप्यद्दर्शयति मायाभासेनेति प्रतिपा
द्यमर्थं बुद्धौ संगृह्य तदर्थमर्थांतरवर्णनमुपोद्घातः अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता
सत्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते । सा च सत्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधाभिद्यमा
ना क्रमेण माया चाविद्या च भवति ॥ तयोर्मायाविद्ययोः प्रतिबिंबितं ब्रह्मचैतन्यमेवेश्वरो जीवश्चेत्युच्यते तदिदं त त्र

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ॥ ३ ॥

त्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं ॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःस
त्वगुणा प्रकृतिर्द्विधा च सा ॥ सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ॥ मायाबिंबो वशीकृत्य तां स्यात्स
र्वज्ञ ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा ॥ कारणशरीरं स्यादिति । इदमेवार्थमनसि नि सा
धाय जीवेशावाभासेन करोति । माया विद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता ॥ अतो जीवेश्वरयोः चा
मायाकल्पितत्वमन्यत्कृत्स्नं जगत्ताभ्यामेव प्रकल्पितं ॥ ३ ॥ ॐ ओम् ओम् ओम् ओम् ओम्

तत्र केन किं पत्रं कल्पितमित्यत आह॥ ईक्षणेति॥ तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः सा
ईक्षणादिः अनेन जीवेनात्मनानुप्रविश्येति श्रुतः प्रवेशः अंतो यस्याः सा प्रवेशांता ईक्षणादिश्चासौ प्रवेशां
ता चेति पश्चात्कर्मधारयः सेयं सृष्टिरीश्वरेण कल्पिता॥ जाग्रदादिर्यस्य संसारस्यासौ जाग्रदादिः विमो
क्षांतो ऽन्तो यस्य सः विमोक्षांतः संसारो जीवेन कल्पितः तदभिमानित्वाज्जीवस्येत्यर्थः ते च जाग्रदादयः स्पष्टमग्र
यंते॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत्परि

ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता॥ जाग्रदादिविमोक्षांतः संसारो जीवकल्पितः॥४॥

तृप्तिमेति स्वप्ने पि जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके। सुषुप्तिकाले सकले विलीने तमो
ऽभिभूतः सुखरूपमेति॥ पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः पुरत्रये क्रीडति यश्च जीवः तत
स्तु जातं सकलं विचित्रं॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते। तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते

एवं पुरुषशब्दार्थविवेचनोपयोगिनीं स्थितिमभिधायेदानीं पुरुषशब्दार्थमाह भ्रमाधिष्ठानेति। भ्रमः कूटस्थासंगचि
द्वपुरविकार्यसंगचित्स्वरूपः भ्रमाधिष्ठानभूतो भ्रमस्य देहेन्द्रियाद्यध्यासस्याधिष्ठानभूतो अधिष्ठानत्वेन वर्तमा
नः परमोऽस्ति संग एव अन्योन्याध्यासतः अन्योन्यस्मिन्नैक्यात्मकतामन्योन्यधर्मांश्चाध्यस्येत्याचार्यैर्निरू
पितेन तादात्म्याध्यासेनाऽसंगधीस्थजीवः स्वेन पारमार्थिकसंबंधमप्राप्य अपि बुद्धौ वर्तमानो जीवः सन् अत्रा

भ्रमाधिष्ठानभूतात्मा कूटस्थासंगचिद्वपुः। अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्र पूरुषः॥१५॥

स्यान्नतो पुरुष इत्युच्यते स चायं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादितत्वात् पु
रुषस्यैव च पुरुषत्वात् पुरुष एव पूरुषः बुद्ध्यादिकस्याधिष्ठानं कूटस्थचैतन्यमेव बुद्धौ प्रतिबिंबितत्वेन प्रा
प्तजीवं सत् पुरुषशब्देनोच्यत इत्यभिप्रायः॥१५॥ ॐ ॐ ॐ ॐ ॐ श्रीकृष्णाय नमः॥

नन्वत्रपुरुषशब्देनकेवलचिदाभासरूपोजीवएवउच्यतांकिमनेनकूटस्थचैतन्येनाधिष्ठानभूतेनेत्याशंक्यतस्य मोक्षाद्यन्वयित्वमस्तिह्येतदपिस्वीकर्तव्यमित्याह।। साधिष्ठानेति।।साधिष्ठानः अधिष्ठानेनकूटस्थचैत न्येनसहितोजीवः विमोक्षादौस्वर्गादिसाधनानुष्ठानेधिक्रियते अधिकारीभवति नतुकेवलः चिदाभासः कुतइत्यतआह।। निरधिष्ठानेति अधिष्ठानरहितस्यारोपितस्यलोकेऽदृष्टत्वादितिभावः।।६।।इदानींसा

साधिष्ठानोविमोक्षादौजीवोधिक्रियतेनतुकेवलोनिरधिष्ठानविभ्रांतेः क्वाप्यसिद्धितः ६।।
अधिष्ठानांशसंयुक्तंभ्रमांशमवलंबते यदातदाहंसंसारीत्येवंजीवोभिमन्यते।।७।।
भ्रमांशस्यतिरस्कारादधिष्ठानप्रधानता यदातदाचिदात्माहमसंगोस्मीतिबुध्यते।।८।।

धिष्ठानस्यैवतस्यसंसाराद्यन्वयित्वंश्लोकद्वयेनविभज्य दर्शयति अधिष्ठानेति जीवोयदा धिष्ठानांशसंयुक्तंकूटस्थसहितंभ्रमांशंचिदाभासोपेतंशरीरद्वयम वलंबते स्वस्वरूपत्वेनस्वीकरोतितदा हंसंसारीत्येवमभिमन्यतेयदापुनर्भ्रमांशस्यदेहद्वयसहितस्यचिदाभासस्यतिरस्कारान्मिथ्यात्वज्ञानेनाना दरणात् अधिष्ठानप्रधानताअधिष्ठानभूतस्यैवकूटस्थस्यस्वस्व रूपत्वेजीवेनस्वीक्रियतेतदाहंचिदात्मा

नन्वधिष्ठानचैतन्यस्य जीवस्वरूपत्वस्वीकारे चिदात्माहमसंगोस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असं
गचिद्रूपस्य कूटस्थस्याहंप्रत्य[illegible]यविषयत्वाभावादिति शंकते नासंगोहमिति असंगे चिदात्मनि निर्विषये अहंप्र
त्ययो न युज्यते यतः अतश्च कथमहमस्मीति जानीयात् न कथंचिदित्यर्थः मुख्यया वृत्त्याहंप्रत्ययविषयत्वाभावे
पि लक्षणया तद्घटत इतीति विवक्षुरहंशब्दार्थं तावद्विभजते शृणु । एको मुख्येति अहमोऽहंशब्दस्येत्यर्थः ॥८॥ कीदृ

नासंगोहं कृतियुक्तः कथमस्मीति चेच्छृणु । एको मुख्यो द्वावमुख्यावित्यर्थो हि त्रिविधोऽहमः ॥ ९ ॥
अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः एकीभूय भवेन्मुख्यं तत्रमूढैः प्रयुज्यते ॥ १० ॥

योऽयमित्याकांक्षायां तद्दर्शयति ॥ अन्योन्येति ॥ कूटस्थचिदाभासयोः स्वरूपमन्योन्याध्यासेनैक्यं प्राप्तम
हंशब्दस्य वाच्यत्वेन मुख्यार्थो भवति । अस्य कुतो मुख्यत्वमित्यत आह ॥ तत्र मूढैरिति यत इत्यध्याहारः ।
तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेकज्ञानशून्यैः सर्वैरप्यहंशब्दः प्रयुज्यतेऽतोऽ

इदानीममुख्यार्थौ द्वौ दर्शयति पृथगाभासेति आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदामु
ख्यार्थौ भवतः अनयोरमुख्यत्वे कारणमाह तत्रेति अत्रापि यत इत्यध्याहारः तत्त्वविद्यतः तत्र तयोः कूटस्थ
चिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुंक्त इति योजना अयं भावः चिदाभासकू
टस्थयोरविविक्तरूपस्य सार्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयजनैः क्व

पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् पर्यायेण प्रयुंक्तेऽहंशब्दं लोके च वैदिके ॥११॥
लौकिकव्यवहारेऽहं गच्छामीत्यादिके बुधाः विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति ॥१२॥
असंगोऽहं चिदात्माहमिति शास्त्रीयदृष्टितः अहंशब्दं प्रयुंक्तेऽयं कूटस्थे केवले बुधः ॥१३॥

दाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति ॥११॥ पर्यायेण प्रयुंक्त इत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौ
कर्याय श्लोकद्वयेन लौकिके तिद्वाभ्यां बुधो विद्वानहं गच्छामीत्यादिके लौकिके व्यवहारे कूटस्थाच्चिदाभा
सं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति अयमेव बुधः शास्त्रीयदृष्टितः वेदान्तश्रवणजनितज्ञानेन
केवले चिदाभासाद्विविक्ते कूटस्थेऽसंगोऽहं चिदात्माहमिति लक्षणयाऽहंशब्दं प्रयुंक्ते अतो लक्षणयाहंशब्द

ननु यद्यपि आभासकूटस्थावहंशब्दस्य मुख्यार्थाविति उक्तं तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तये सोऽहं ब्रह्मास्मीति जानाति किं वा चिदाभासः न तावत्कूटस्थः तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतः चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा सति कूटस्थादन्यः चिदाभासोऽहं कूटस्थोऽस्मीति न ज्ञातुमर्हतीति इति शंकते। ज्ञानितेति ॥२४॥ तस्य कूटस्थादन्यत्वमेव प्रसिद्धमिति परिहरति। नायं दोष इति। तत्रोपपत्तिमाह ॥ आभासत्वेति। यद्दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्वदिति भावः ॥२५॥ ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोऽस्मीति ज्ञानमपि मि

ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यताम् ॥२४॥
नायं दोषः चिदाभासः कूटस्थैकस्वभाववान् आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेषणात् ॥२५॥
कूटस्थोऽस्मीति बोधोऽपि मिथ्या चेन्नेति को वदेत् न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणम् ॥२६॥ ॥

थ्या स्यादिति शंकते ॥ कूटस्थ इति कूटस्थस्वरूपादतिरिक्तस्य कृत्स्नस्यापि मिथ्यात्वाभ्युपगमात् तन्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति ॥ नेति को वदेदिति ॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति न हि सत्यतयेति रज्जौ कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा तद्वदिति भावः ॥ २६॥ रामरामरामरामा॥

यक्षः तादृशेन

ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादित्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वात्तन्निवृत्तिरुपपद्यते स्वाप्नव्या

पं.र. घ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह ॥ तादृशेनेति ॥ तत्र यादृशो बलिरिति लौकिकीं गाथां संवादयति

॥ दे ॥ यक्षानुरूप इति ॥ १२ ॥ उपपादितमर्थमुपसंहरति ॥ तस्मादाभासेति ॥ यस्मात्कूटस्थस्य एव चिदाभासनिजं स्वरूपं

तस्मात्पुरुषशब्दवाच्यः कूटस्थेन सहितः चिदाभासः तं कूटस्थं मिथ्याभूतात्स्वस्माद्विविच्य लक्षणया कूटस्थो

तादृशेनापि बोधेन संसारो हि निवर्तते ॥ यक्षानुरूपो हि बलिरित्याहुः लौकिका जनाः ॥ १२ ॥

तस्मादाभासपुरुषः सकूटस्थो विविच्य तं कूटस्थास्मीति विज्ञातुमर्हतीत्यभ्यधाच्छ्रुतिः १३ ॥

असंदिग्धाविपर्यस्तबोधो देहात्मनीष्यते तद्वदत्रेति निर्णेतुमयमित्यभिधीयते ॥ १४ ॥

हमस्मीति अवगंतुं प्राप्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः ॥ १३ ॥ एवं पुरुषोस्मीति पदद्वयप्रयोगाभि

प्रायमभिधायायमितिपदप्रयोगाभिप्रायमाह असंदिग्धेति ॥ लौकिकानां प्रसिद्धे देहरूपे आत्मनि संश

म यविपर्ययरहितोऽयमस्मीति बोधो यद्वदुपलभ्यते अत्र प्रत्यगात्मनि विषये तद्वत् यथाविधं ज्ञानं मुक्तिसिद्ध

ये संपाद्यमिति निर्णेतुमयमित्यभिधीयते अङ्गत्येति शेषः ॥ ॥ १४ ॥ रामरामरामरामरामरामराम राम ॥

॥ ये ॥

ईदृशस्यैवबोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति देहात्मेति अहंमनुष्य इति देहात्मविषये दृढप्रत्ययो यथा॥
एवं प्रत्यगात्मनि एव देह एवात्मेवं देहात्मत्वज्ञानापवाधेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते सविद्वानिच्छन्नपि मोक्षेच्छा
रहितोपि मुच्यते संसारहेतोरज्ञानस्य ज्ञानेन बाधितत्वादिति भावः॥२०॥ अयमिति पदप्रयोगस्याभिप्रायांतरं प्रा
के ते॥ अयमिति यथायं घट इत्यादि पदप्रयोगेष्विदमा निर्दिष्टवस्तुन अपरोक्षत्वं दृष्टं तथायमस्मीत्यत्रापीति
भावः तदप्यस्माकमिष्टमेवेत्याह॥ तदेवाह तामिति कुत इत्यत आह। स्वयमिति स्वतः साधनांतरनिरपेक्षतयावभास
देहात्मज्ञानवद्ब्रह्मज्ञानं देहात्मज्ञानबाधकं आत्मन्येव भवेद्यस्य सनेच्छन्नपि मुच्यते॥२०॥
अयमित्यपरोक्षत्वमुच्यते चेन्न दोच्यतां स्वयंप्रकाशचैतन्यमपरोक्षं सदायतः॥२१॥
परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः नित्यापरोक्षरूपेपि द्वयं स्याद्दशमे यथा॥२२॥
मानं चैतन्यं व्यवधायकाभावान्नित्यापरोक्षमित्यस्माभिरभ्युपगतत्वादित्यर्थः॥२१॥ नन्वात्मनः स्वप्रकाशचिद्रू
पत्वेन नित्यापरोक्षत्वाभ्युपगमेऽयमिति पदप्रयोगस्याभिप्रायवर्णनांगीकारबलादागतमात्मनः परोक्षविषय
त्वं अपरोक्षविषयत्वं पूर्वोक्तज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नं स्यादित्याशंक्य दशम इव सर्वमुपपत्स्यत इत्या
ह। परोक्षमिति परोक्षमपरोक्षं चेत्येकं युगलं ज्ञानमज्ञानमित्यपरं इदं द्वयं नित्यापरोक्षरूपेप्यात्मनि दशम इव स्या

५

॥ वं ॥ नं ॥ दी ॥

दशमं तं भ्रान्त्याद्यपेति नवसंख्येति परिगणनीयपुरुषनिष्ठया नवसंख्यया अपहृतविवेकविज्ञानो दशमः तदा ता न परिगणनीयान्नवसंख्याकान्वीक्षमाणोऽपि सम्यक् पश्यन्नपि भ्रान्त्या गणनाकर्तारं स्वात्मानं दशमोऽहमस्मीति न वेत्ति इत्यर्थः ॥ २३ ॥ एवं दशमैर्ज्ञानं प्रदर्श्य तत्कार्यमावरणं दर्शयति न भातीति तदा दशमः स्वं दशमं सन्तं दशमो न भाति नास्तीति मत्वा वक्ति अस्य व्यवहारस्य यत्कारणं तदज्ञानकृतमज्ञानकार्यमावरणं विदुर्बुधा इति शेषः

नवसंख्याहृतज्ञानो दशमो विभ्रमात्तदा न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥ २३ ॥
न भाति नास्ति दशम इति स्वं दशमं तदा मत्वा वक्ति तदज्ञानकृतमावरणं विदुः ॥ २४ ॥
नद्यां ममार दशम इति शोचन्प्ररोदिति अज्ञानकृतविक्षेपं रोदनादि विदुर्बुधाः ॥ २५ ॥
न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥ २६ ॥
त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः अपरोक्षतया ज्ञात्वा हृष्यते न च रोदिति ॥ २७ ॥

॥ २४ ॥ अज्ञानस्यैव कार्यविशेषं विक्षेपं दर्शयति ॥ नद्यामिति २५ ॥ दशमस्यासत्त्वांशनिवर्तकं परोक्षज्ञानमाह न मृतो दशमोऽस्तीति ॥ २६ ॥ तस्यैवाभानांशनिवर्तकमपरोक्षज्ञानं दर्शयति ॥ त्वमेवेति स्वेन परिगणितेन नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोऽसीति प्रदर्शितः अहं दशमोऽस्मीत्यपरोक्षतया ज्ञात्वा हर्षं प्राप्नोति रोदनं ॥ दी ॥

पञ्चदशी

श्री३गा(?)

एवं दृष्टांतभूते दशमे प्रदर्शितमवस्थासप्तकं दार्ष्टांतिके आत्मन्यपि तद्योजनीयमित्याह अज्ञानावृतीति अज्ञा
नं चावृति विक्षेपौ द्विविधज्ञानं च हर्षः शोक इति द्वंद्वसमासः ॥१०॥ अत्रात्मन्यज्ञानादिकं क्रमेण दर्शयति संसारसक्त इत्या
दिना अयं चिदाभासो विषयसंपादिना दिव्यासक्तचित्तः सन् कदाचन श्रुतिविचारात्पूर्वं कदाचिदपि स्वस्य निजं रूपं
स्वप्रकाशचिद्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जानातीति यत्तदज्ञानं चिदात्मविषये प्रसंगे जाते कूटस्थो नास्ति न
अज्ञानावृतिविक्षेपद्विविधज्ञान हृषयः शोकापगम इत्येते योजनीयाश्चिदात्मनि ॥१०॥ संसारसक्तचित्तः सन् चि
दाभासः कदाचन कौ स्वयंप्रकाशकूटस्य स्वतत्वं नैव वेत्त्ययं ॥११॥ न भाति नास्ति कूटस्थ इति वक्ति प्रसंगतः कर्ता भोक्ता
हमस्मीति विक्षेपं प्रतिपद्यते ॥१२॥ अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया पश्चात् कूटस्थ एवास्मीत्येवं वेत्ति विचा
रतः ॥१३॥ कर्ता भोक्तेत्येवमादि शोकजातं प्रमुंचति कृत्यं कृतं प्रापणीयं प्राप्तमित्येव तुष्यति ॥१४॥
भातीति मत्वावृत इदमज्ञानकार्यमावरणं कूटस्थासत्वाभानाभिधानवत् कर्तृत्वादिकमात्मन्यारोपयति अस्यारोपस्य
हेतुर्देहद्वययुतः चिदाभासो विक्षेपः परेण बोधितः कूटस्थोऽस्तीति जानातीदं परोक्षज्ञानं श्रवणादिपरिपाकवशात् कू
टस्थोऽहमेवास्मीति जानाति इदमपरोक्षज्ञानं कूटस्थासंगात्मज्ञानानंतरं कर्तृत्वादिशोकजातं त्यजतीति यद्यं शो
कापगमः कृत्यं कर्तव्यजातं निष्पादितं प्राणीयं फलजातं प्राप्तं लब्धमिति तुष्यति इयं तृप्तिरित्यर्थः ॥

दार्ढ्यं तत्केषु तत्तदवस्थासप्तकमनुवदति अज्ञानमावृतीति ॥३३॥ नन्वेतावस्थासप्तकस्यात्मधर्मत्वांगीकारे तस्य कू
टस्थत्वं व्याहन्येतेत्याशंक्य एताः सप्तावस्थाः चिदाभासस्यैव न कूटस्थस्येत्याह सप्तावस्थेति ॥ सर्वं वाक्यं साव
धारणमिति न्यायेनेन चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते आसामवस्थानामुपन्यासो कथेत्याशंक्य नव बंधमो
क्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह तास्विमाविति किमासां सप्तानामप्यविशेषेण बंधमो॰

अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः ॥ अपरोक्षमतिः शोकमोक्षः तृप्तिर्निरंकुशा ॥३३॥
सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ ॥ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृताः स्मृताः ॥
३४॥ न जानामीत्युदासीनव्यवहारस्य कारणं विचारप्रागभावेन युक्तमज्ञानमीरितं ॥३५॥

क्षकारित्वं नेत्याह ॥ तत्र तिस्र इति ॥ अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः ॥३४॥ आसां बंधकारित्वदर्शनाय
तिसृणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टी चिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शयति ॥ न जानामीति ॥ आ
त्मतत्त्वविचारप्रागभावसहितं उदासीनव्यवहारस्य कारणं न जानामीत्यनुभूयमानमज्ञानमीरितमित्यर्थः

आवृतिकार्यं दर्शयति॥ अमार्गेणेति शास्त्रोक्तप्रकारमतिलंघ्य केवलं तर्केण विचार्यानंतरं कूटस्थो नास्ति न
भातीत्येवंरूपो विपरीतव्यवहारः आवरणकार्यमित्यर्थः॥३६॥ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति देहद्वये
ति स्थूलसूक्ष्माख्यशरीरद्वय सहितः चिदाभास एव विक्षेपः बंधकः बंधहेतुः संसाराख्यकर्तृत्वाद्यखिलः
शोकोस्य कार्यमिति शेषः कर्तृत्वादीत्यादिशब्देन प्रमातृत्वादयो गृह्यंते॥३७॥ ननु सुषुप्तावस्थायां चिदाभास

अमार्गेण विचार्याथ नास्ति नो भाति चेत्यसौ॥ विपरीतव्यवहृतिरावृत्तेः कार्यमिष्यते॥३६॥
देहद्वयचिदाभासरूपो विक्षेप ईरितः॥ कर्तृत्वाद्यखिलः शोकः संसाराख्योस्य बंधकः॥३७॥
अज्ञानमावृतिश्चैते विक्षेपात्प्राक् प्रसिध्यतः यद्यप्यथाप्यवस्थैते विक्षेपस्यैव नात्मनः॥३८॥

स्यैतदुक्तमनुपपन्नमज्ञानावरणयोः विक्षेपोत्पत्तेः पूर्वस्थितत्वाच्चिदाभासस्य च विक्षेपांतःपातित्वात्तदव
स्थात्वानुपपत्तेरित्याशंक्याह अज्ञानमावृतीति अनयोर्विक्षेपात्पूर्वस्थितत्वेपि नात्मावस्थात्वं तस्यासंगत्वेनाव
स्थावत्वानुपपत्तेः अतः परिशेषाच्चिदाभासावस्थात्वमेव तयोर्वक्तव्यमिति भावः॥३८॥ ओम् ओम् ओम् ओम्

पं.२.
॥६॥

अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभावेपि तत्संस्कारस्य तदानीं सत्वात् विक्षेपावस्थात्वाभिधानेन विरुध्यत इत्याह ॥ विक्षेपोस्तीति ॥ ततः कारणत्वयोः तदव स्थाभास्यात्व वर्णनमविरुद्धमिति योजना ॥३९॥ नन्वप्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णना समस्य धरमधिष्ठानतयाप्रसिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्य गतिप्रसंगान्नैवमिति परिहरति ब्रह्मण्यारो

विक्षेपोस्ति ततः सर्वमपि विक्षेपसंस्कृतिः अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ॥३९॥ अवर्णं कार्ययोः
ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थेइमे इति न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ॥४०॥
संसार्यहं विबुद्धोहं निःशोकस्तृप्त इत्यपि जीवगा उत्तरावस्था भांति न ब्रह्मगा यदि ॥४१॥

पितत्वेपि ॥४०॥ ननु ब्रह्मण्यारोपितत्वाविशेषेपि विक्षेपोत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते संसार्यहमिति संसारी कर्तृत्वादिधर्मवान् विबुद्धः तत्वसाक्षात्कारवान् निःशोकः शोकरहितः तृप्तः वक्ष्यमाणकृत्यत्वादिजनितसंतोषवान् अहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता भांति न ब्रह्माश्रिता इत्यर्थः ॥४१॥ उत्तरम् अत्र उत्तरस्यायमर्थः ॥६॥

एवं तर्ह्यज्ञानावरणेऽपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति तर्हीति सोऽहमिति मद्दृ-
ष्टितो मम मानुभवेन इत्यर्थः ॥४२॥ ननु तर्ह्यज्ञानस्याश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्श-
यति अज्ञानस्येति ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः भवद्भिः तर्हि किं विवक्षया
जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति जीवावस्थात्वमिति ॥४३॥ एवं बंधहेतुमवस्थात्रयं प्रदर्श्य

तर्ह्यज्ञोऽहं ब्रह्मसत्त्वभाने मद्दृष्टितो नहि इति पूर्वे अवस्थेऽवभासेते जीवगे खलु ॥ ४२॥

अज्ञानस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः जीवावस्थात्वमज्ञानाभिमानित्वादवादिषं ॥४३॥ धि

ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतिः ॥ न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ॥४४॥ न

वशिष्टावस्थाद्वयमध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति तेनाज्ञानोत्पादितं न
[illegible] द्विविधं ज्ञानद्वयेति परोक्षत्वापरोक्षत्वलक्षणेन ज्ञानद्वयेनावरणकारणे ने
ज्ञाने नष्टे सति तत्कृतावृत्तिः तेनाज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणकार-
णाभावान्नश्यतीति ॥४४॥ रामरामरामराम ॥ ओम् ओम् ओम्

कस्मां शक्यं केन निवृत्तिरित्यपेक्षायामुभयं विभज्य दर्शयति ॥ परोक्षज्ञानेति । कूटस्थोऽस्तीत्येवंरूपात्परोक्ष
ज्ञानादज्ञानस्यासत्त्वावरणकारणत्वं निवर्तते कूटस्थोऽस्मीति अपरोक्षज्ञानेन न तु कूटस्थो न भाति इत्येवंरू
पावरणकारणत्वं निवर्तते ॥८५॥ इदानीं ज्ञानस्य फलरूपावस्थाद्वये प्रथमां तस्यामाह ॥ अभानाव
रणेनेति अभानावरणे निवृत्ते भ्रान्त्या प्रतीयमानस्य जीवत्वस्यापि निवृत्तत्वात् तन्निमित्तकः कर्तृत्वादि

परोक्षज्ञानतो नश्येदसत्त्वावृतिहेतुता ॥ अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता ॥ ५४ ॥
अभानावरणे नष्टे जीवत्वारोपसंक्षयात् । कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते ॥ ५६ ॥
निवृत्ते सर्वसंसारे नित्यमुक्तत्वभासनात् ॥ निरंकुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात् ॥ ५७ ॥
अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे ॥ अवस्थे जीवगे ब्रूत आत्मानं चेदिति श्रुतिः ॥ ५८ ॥

लक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्तते इत्यर्थः ॥८६॥ एवं शोकापगमावस्थां प्रदर्श्य निरंकुशतृप्तिल
क्षणां द्वितीयां दर्शयति निवृत्त इति ॥८७॥ न त्वात्मानं चेद्विजानीयादिति मंत्रव्याख्यानेन प्रवृत्तत्वाद्द्वितीय
मध्येऽज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतानुगतमित्यपेक्ष्य आत्मानं चेदित्यस्याः श्रुतेः तात्पर्यनिरू
पणं प्रतिपादयितुमयं मंत्रः प्रवर्तत इत्यभिप्रायः ॥८८॥ ॥

घ

अयमित्य॰ परोक्षत्वमित्यत्रायमितिपदेनात्मनोऽपरोक्षत्वमुच्यते तदुक्तं तथास्तीति अपरोक्षज्ञानविषयत्वमेवास्या
त्मापरोक्षत्वाविषयमित्याशंक्य तदुपपादनायापरोक्षत्वं विभजते ॥ अयमिति द्वैविध्ये कारणमाह विषयेति विषय
स्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात्स्वव्यवहारे साधनान्तरनिरपेक्षत्वात्क्रियावुद्ध्या एव स्वप्रकाशत्वेन तदीक्षणा
त्स्वविषयस्यात्मनोऽवलोकनाद्येत्यर्थः ॥५२॥ भवतु द्वैविध्यमेतावतापरोक्षज्ञानविषयत्वे किमागतमित्या
शंक्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वे विरोधि न भवतीत्याह परोक्षेति अपरोक्षज्ञानकाल इव परोक्षज्ञा

अयमित्यपरोक्षत्वमुक्तं तद्द्विविधं भवेत् विषयस्वप्रकाशत्वात्क्रियाप्येवं तदीक्षणात् ॥५२॥
परोक्षज्ञानकालेऽपि विषयस्वप्रकाशता ॥ समा ब्रह्मस्वप्रकाशमस्तीत्येवं प्रबोधनात् ॥५३॥
अहं ब्रह्मेत्यनुल्लेखाद्ब्रह्मास्तीत्येवमुल्लिखन् परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ॥५४॥

न कालेऽपि विषयस्य ब्रह्मणः स्वप्रकाशतास्त्येव तत्रोपपत्तिमाह ब्रह्मस्वप्रकाशमिति ॥५३॥ प्रत्यगभिन्नब्रह्मगोच
रस्य ज्ञानस्य कुतः परोक्षत्वमित्याशंक्य प्रत्यगंशाग्रहणादित्याह अहं ब्रह्मेति नन्विदं भ्रान्तमित्याशंक्याह भ्रा
न्तत्वं किं बाध्यत्वात् उत व्यक्त्यनुल्लेखाद्यद्वा अपरोक्षेणाग्रहणयोग्यस्य परोक्षेण ग्रहणात् । यद्वांशाग्रहणादि

चं.तृ.
॥९५॥

चतुष्कोणेतं विकल्पयतीति वृत्तेनास्तीति ॥५३॥ द्वितीयमतिप्रसंगेन दूषयति व्यक्त्यनुल्लेखेति अयं स्वर्ग इत्येवमाका
रेण ग्रहणाभावात् किंतु स्वर्गोऽस्तीत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ॥५३॥ तृतीयं
निराकरोति ॥ अपरोक्षत्वेति अपरोक्षत्वेन ग्रहणायोग्यस्य प्रत्यगभिन्नवृत्तविषयस्य परोक्षज्ञानस्य भ्रमत्वेन संभ
ति कुत इत्यत आह परोक्षमिति वृत्तपरोक्षमित्येवमाकारेण ग्रहणाभावात् कुतस्तर्हि तस्य परोक्षत्वमित्या
शंक्याह अर्थादिति ॥ इदं वृत्तेत्येवं व्यक्त्युल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धिरिति भावः ॥५४॥ चरममाशंकाते

वृत्तनास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं नचैवं प्रबलं मानं पश्यामो तेन बाध्यते ॥ ५३॥
व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि भ्रांतिः स्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेखदर्शनात् ५३
अपरोक्षत्वयोग्यस्य न परोक्षमति भ्रमः ॥ परोक्षमित्यनुल्लेखादर्थात्परोक्षसंभवात् ॥ ५४॥
अंशाग्रहीतिर्भ्रांतिश्चेत् घटज्ञाने भ्रमो भवेत् ॥ निरंशस्यापि सांशत्वं व्यावृत्त्यंशविभेदतः ॥५५॥

परि
अंशाग्रहीतिरिति वृत्तांशाग्रहणेपि प्रत्यगंशाग्रहणाद्भ्रमत्वमित्यर्थः एवं तर्हि घटादिज्ञानस्यापि भ्रमत्व
प्रसंग इत्याह ति ॥ घटज्ञानमिति अंतरावयवानामग्रहणादिति भावः ननु घटस्य सावयवत्वादंशाग्रहणे
प्यंशग्रहसंभवति ब्रह्मणस्तु निरंशत्वात्कथमंशाग्रहणसंभव इत्याशंक्य व्यावर्त्यांशोपाधिनिमित्तके

कौनैवावर्त्यांशद्वावित्याकांक्षायामाह असत्वांश इति॥५६॥ अपरोक्षत्वेन ग्रहणयोग्यविषये परोक्षज्ञानं भ्रमो न
भवति इत्येतद्दृष्टांतप्रदर्शनेनापि द्रढयति॥ दशमोऽस्तीति॥ दशमोऽस्तीत्याप्तवाक्यजन्यं परोक्षज्ञानमविभ्रांतं यथा
ब्रह्मास्तीति वाक्यजन्यं ज्ञानमपि तद्वदभ्रांतं स्यात् अज्ञानकृतस्यासत्वावरणांशस्य समत्वादिति भावः॥५७॥ ननु वा
क्यात्परोक्षज्ञानमुत्पद्यते चेत् अपरोक्षं कुतो जायते इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह आत्मेति अयमात्मा ब्र

असत्वांशो निवर्त्तेत परोक्षज्ञानतस्तथा अभानांशनिवृत्तिः स्यादपरोक्षधिया कृता॥ ५६॥ दो
दशमोऽस्तीत्यविभ्रांतं परोक्षज्ञानमीक्ष्यते ब्रह्मास्तीत्यपि तद्वत्स्यादज्ञानावरणं समं॥ ५७॥
आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः॥५८॥
दशमः क इति प्रश्ने त्वमेवेति निराकृते गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत्॥ ५९॥

ह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वं अस्तीति परोक्षतया अवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रियते तत्र
दृष्टांतः यद्वदिति दशमस्त्वमसीत्येतद्वाक्यादात्मनि दशमत्वं यथा साक्षात्क्रियते तद्वदित्यर्थः॥५८॥ विचारसह
न कृतेन वाक्येन परोक्षज्ञानोत्पत्तिप्रकारं तावद्दृष्टांते दर्शयति॥ दशम इति त्वयास्तीति निरूपितो दशमः कः इति प्र
श्ने कृते त्वमेवेति परिहारे विहिते स्वात्मना सह तान्नवगणयित्वाहं दशमोऽस्मीति स्वमेव दशमं स्मरेत्॥५९॥

पं.द.
॥
॥ ॥ ॥

अस्य दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्ययादिरूपतेत्याह ॥ दशमोऽस्मीति अस्य दशमस्य
त्वमेव दशमोऽसीति वाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्नाहं दशमोऽस्मीति बुद्धिर्न विहन्यते न केना-
पि ज्ञानेन बाध्यते परिगणनक्रियायां च नवानामादिमध्यावसानेषु गणनेपि अहं दशमो न वेति संशयश्च न
भवेदतः साक्षात्कारोऽद्वैतरूपेत्यर्थः ॥ ६० ॥ एतत्सर्वं दृष्टांतिके योजयति सदेवेत्यादिना ॥ सदेव सौम्येदमग्र आसीदेक-

न

दशमोऽस्मीति वाक्योत्था धीरस्य न विहन्यते आदिमध्यावसानेषु न नवत्वस्य संशयः ६० ॥
सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत् ॥ ६१ ॥
आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियं ॥ नैव व्यभिचरेत्तस्मादपरोक्षं प्रतिष्ठितं ॥ ६२ ॥

मेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं निश्चित्य तस्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं
संभाव्य तत्त्वमसीत्यादिवाक्येनाद्वितीयब्रह्मस्वरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यात् अतद्रूपमात्म-
नो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्यावसानेष्वात्मनो व्यवहारेपि नैवान्यथा भवति अतोऽस्या बुद्धे-
रपरोक्षज्ञानत्वं सुस्थितमित्यर्थः ॥ ६१ ॥ रामराम राम राम ओम् ओम् ओम् प्रभाकराय नमः

११

नैपमा णानि संति

नन्वेवं प्रपन्नतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहितादपरोक्षज्ञानमित्येतत्कुतोऽवगम्यत इत्याशंक्य तैत्ति रीयकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीति भृगुनामैकः कश्चिदृषिः पुरा यतो वा इमानि भूतानि जायंते येन जाता नि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेतीवाक्यश्रुतेन जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्का रणं ब्रह्म परोक्षतयावगम्यान्नमयादिपंचकोशविचाराद्व्यक्तिं प्रत्यगात्मनो ब्रह्मरूपत्वं वा नित्यर्थः ॥६३॥ नन्वस्मिन्प्रकरणे

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा परोक्षेण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ॥६३॥
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता तथाप्यन्नं प्राणमिति विचार्यस्थलमुक्तवान् ॥६४॥
अन्नप्राणादिकोशेषु सुविचार्य पुनः पुनः आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् ॥६५॥ चार

तं ब्रह्मास्मीत्येवमाद्युपदेशवाक्याभावात्कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतोर्वियोग्य स्थूलब्रह्मदर्शनादित्याह ॥ यद्यपीति ॥६४॥ नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मण स्तु कथमित्याशंक्य प्रतीचः एव ब्रह्मत्वात्पंचकोशविचारेणानंदात्मव्यक्तिं साक्षात्कृत्यानंदाद्ध्येव खल्विमानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति इत्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह ॥ अ

न

पं.दे.
॥१३॥

ननु ब्रह्मलक्षणस्यानंदात्मरूपेण प्रतीचि योजनेन घटते ब्रह्मणः स्वरूपत्वेन प्रतीचेर्भिन्नत्वादित्याशंक्य न भेदः स
त्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यं ज्ञानमिति सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्मस्वलक्ष
णं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पंचकोशगुहांतःस्थित
त्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ॥६६॥ एवं तैत्तिरीयकश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वक।

सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणं उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं ॥६६॥
पारोक्ष्येण विबुद्धेंद्रो य आत्मेत्यादिलक्षणात् अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ॥६७॥

विचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रुतिपर्यालोचनेनापि तद्दर्शयति ॥ पारोक्ष्येणेति ॥ इंद्रो य
आत्मापहतपाप्मा विजरः विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितलक्षणेनात्मानं परोक्षतयावगम्य विचा
रकृतीरवयनिराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्माणं चतुर्वारमुपसन्न इति छांदोग्योपनिषद्यष्टमाध्याये
श्रूयते ॥६७॥ रामरामराम ॐ ॐ ॐ सूर्याय नमः ॥

१३

इदानीमैतरेयकश्रुतावपि तद्दर्शयति आत्मा वेति ॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वा
क्यैर्ब्रह्मणो लक्षणमभिधाय ॥ स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य त्रय आवसथाः त्रयः स्वप्ना अयमावसथोऽयमा
वसथोऽयमावसथ इत्यनेन परमात्मनि जगदध्यारोपेण प्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत् किमिहा
न्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति प्रत्यगात्मनो

आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितं ॥ अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं ॥ ६७ ॥
अवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः ॥ ६८ ॥

ब्रह्मस्वरूपत्वमभिहितं पुनश्च पुरुषे ह वेत्यादिना ज्ञानसाधनवैराग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोऽयमा
त्मेति वयमुपास्महे इत्यादिना विचारेण तत्त्वंपदार्थपरिशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं द
र्शितमित्यर्थः ॥ ६७ ॥ उक्तन्यायमितरासु श्रुतिष्वप्यतिदिशति अवांतरेणेति ॥ सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ६८ ॥

वाक्यवृत्तौ ग्रंथे

ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैः तथा प्रतिपादितत्वा
न्नैवमित्याह ब्रह्मापरोक्षेति ॥ अतो वाक्याद्ब्रह्मापरोक्षज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ॥ १२ ॥ वाक्यवृत्तावुपपादनप्र
कारं दर्शयति ॥ आलंबनयेति ॥ येंतःकरणसंभिन्नबोधः अंतःकरणोपाधिकश्चिदात्मा ऽस्मत्प्रत्ययशब्दयो
रहमितिज्ञानस्याहमिति शब्दस्य चालंबनतया विषयत्वेन भाति स तथाविधो बोधः त्वंपदाभिधः त्वमिति पद

ब्रह्मापरोक्षसिद्ध्यर्थं महावाक्यमितीरितं ॥ वाक्यवृत्तावतो ब्रह्मापरोक्षे विमतिर्न हि ॥ १२ ॥

अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ १३ ॥
आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पारोक्ष्यशबलः सत्याद्यात्मकः तत्पदाभिधः ॥ १४ ॥

वाच्यमित्यर्थः ॥ १३ ॥ एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्या
र्थमभिधायकं यस्य स त्वंपदाभिधः त्वंपदवाच्य इत्यर्थः ॥ १३ ॥ एवं तत्स्वलक्षणमुक्त्वा स्वरू
पमाह मायोपाधिरिति पारोक्ष्यशबलः परोक्षत्वधर्मविशिष्ट इत्यर्थः एवं तटस्थलक्षणमुक्त्वा स्वरू
पलक्षणमाह ॥ सत्याद्यात्मक इति ॥ सत्यमादिर्येषां ज्ञानादीनां ते सत्याद्याः आत्मा स्वरूपं यस्य स तथा
विधः तत्पदाभिधः तत्पदमभिधावाचकं यस्य स तत्पदाभिधः तत्पदवाच्य इ

एवं पदार्थानभिधाय वाक्यार्थबोधनाय लक्षणावृत्तिमभ्युपैतीत्याह प्रत्यक्षयोर्द्वेति प्रत्यक्षयोः द्वित्वे सद्विती
त्वसहितापूर्णतेति मध्यमपदलोपी समासः सद्वितीयत्वपूर्णते चैकस्य वस्तुनो यतो विरुध्येते अतो लक्ष
णावृत्तिरभ्युपेयेत्यर्थः ॥१३॥ सा च कीदृशीत्यत आह तत्त्वमस्यादीति भागलक्षणा भागत्यागलक्षणा
इत्यर्थः तत्र दृष्टान्तः सोयमित्यादीति सोयं देवदत्त इति वाक्य इत्यर्थः ॥१४॥ ननु गामानयेत्यादिवाक्ये
षु लक्षणावृत्त्या विनापि वाक्यार्थबोधो दृश्यते तद्वदत्रापि किं न स्यादित्याशंक्याह संसर्गेति ॥ यथा लो

प्रत्यक्षयोर्द्वितैकस्य सद्वितीयत्वपूर्णता विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्तते ॥१३॥
तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा सोयमित्यादिवाक्यस्थपदयोरिव तत्पदा ॥१४॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखंडैकरसत्वेन वाक्यार्थो विदुषां [मतः] ॥१५॥

के गामानयेत्यादिपदैः स्मारितानामर्थानां सान्निध्यादिभ्य आदिशब्देन योग्यतामत्तां गवादिपदार्थानामन्व
यो वाक्यार्थत्वेन स्वीकृतः यथा वा नीलं महत्सुगंधमुत्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलवाक्यार्थत्वं स्वी
कृतं नैवमत्र महावाक्येषु संसर्गविशिष्टयोरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते ॥ किं अखंडैकरसत्वेन स्वगत

पं.द.

अखंडैकरसं वाक्यार्थं दर्शयति प्रत्यग्बोध इति यः प्रत्यग्बोधः सर्वांतरः चिदात्मा भाति बुद्ध्यादिसाक्षित्वेन स्फुर-
ति सोऽद्वयानंदलक्षणः अद्वितीय आनंदरूपः परमात्मेत्यर्थः अद्वयानंदरूपश्च तथाविधः परमात्मा प्रत्यग्बो-
धैकलक्षणः चिदेकरसः प्रत्यगात्मैवेत्यर्थः ।।३६।। एवमखंडार्थबोधने किं स्यादित्यत आह इत्थमिति
त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वभ्रांतिस्तिरोभवति ब्रह्मरूपता तदर्थस्य च ब्रह्मणः अपारोक्ष्यं परोक्षत्वानेकविषयत्वं च

प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ।।३६।।
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ।।३७।।
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ।।३८।।
एवं सति महावाक्यात्परोक्षज्ञानमीर्यते यैः तेषां शास्त्रसिद्धांतविज्ञानं शोभतेतराम् ।।३९।।

विनिवर्तते ।।३७।। ततोऽपि किमिति पृच्छति ।। यद्येवमिति ।। उत्तरमाह ।। पूर्णेति ।।३८।। ननु समयबलेन
शब्दस्य परोक्षज्ञानानुभवसाधनमागमलक्षणं अतो वाक्यस्यापरोक्षज्ञानजननकत्वं कथमुच्यते इत्याशंक्य सिद्धां-
तपरिज्ञानमन्यथेति मतसिद्धिनिषेधोपपद्यते एवं सति वाक्यादिति ।। एवं वदंतः सिद्धांतरहस्यं ते

।।९६।।

ननु सिद्धांतः तावत्त्रिष्टत्ववाक्यस्य परोक्षज्ञानजनकत्वं तत्त्वनुमानसिद्धमिति शंकते॥ आप्तामिति विमितं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यात्वात्स्वर्गादिप्रतिपादकवाक्यवदित्यनुमानेन परोक्षज्ञानजनकत्वं सिद्धमित्यर्थः अनैकांतिकोयं हेतुरिति परिहरति नैवमिति॥ दशमस्त्वमसीति वाक्ये वाक्यत्वे सत्यपरोक्षज्ञानजनक

मानेन

आप्तांप्राम्नस्य सिद्धांतः पुक्त्या वाक्यात्परोक्षधीः स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः॥८०॥
स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो॥८१॥ ति
वृद्धिमिष्टवतो मूलमपि नष्टमितीदृशं लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः॥८२॥॥
अंतःकरणसंभिन्नबोधो जीवोऽपरोक्षतां अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः॥८३॥

त्वस्योपालंभादिति भावः॥८०॥ किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादिति न महावाक्यं परोक्षज नकत्वेनांगीकार्यमित्याह॥ स्वतोपरोक्षेति॥८१॥ दूषणापत्तिरित्याशंक्याह॥ वृद्धिमिष्टवत इति॥८२॥ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वयुक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यत इति शंकते अंतःकरणसंभिन्नेति

त्व

तृप्त्यः ३१

ब्रह्मणो निरुपाधिकत्वमसिद्धमिति चेन्न इति नैवं ब्रह्मत्वेति ॥ जीवस्य ब्रह्मरूपतां ज्ञानं यदस्ति तस्य सोपाधिकवस्तु-
विषयत्वात् तद्विषयस्य ब्रह्मणोपि सोपाधिक[illegible]त्वं ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंत-
रेण न घटते इति भावः तदेव कुत इत्यत आह ॥ यावद्विदेहकैवल्यमिति ॥ ८३ ॥ ननु जीवब्रह्मणोर्विलक्षण-
मुपाधिद्वयं वक्तव्यमित्याह ॥ अंतःकरणेति जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहित्येनैवोपाधि इ-
ति ॥ ८४ ॥ नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नामाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य

नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधेरनिवारणात् ॥ ८४ ॥

अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवाभावस्य ब्रह्मता नान्यथा ॥ ८५ ॥

यथा विधिरुपाधिः स्यात् प्रतिषेधस्तथा न किं सुवर्णलोहभेदेन शृंखलात्वं न भिद्यते ॥ ८६ ॥

यावत्कार्यमवस्थायिभेदहेतोरुपाधिता तेनोक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवो-
पाधित्वमित्यभिप्रायेण परिहरति यथा विधिरिति ॥ विधिः भावरूपोंऽतःकरणसंबंधो यथोपाधिः स्यात् त-
थाप्रतिषेधोऽभावरूपोंऽतःकरणवियोगो किमुपाधिर्न स्यात् किं तु स्यादेवेत्यर्थः तथापि भावाभावरूपत्व-
लक्षणमवांतरवैलक्षण्यं दृश्यत एवे[illegible] कारणत्वमित्यभिप्रेत्य दृष्टांतमाह ॥

विधेरिव निषेधस्यापि ब्रह्मबोधोपायत्वेन वृत्त्युपाधित्वं दृढयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमावि
भिर्निरूपित[illegible]मिति दर्शयति अतद्व्यावृत्तिरूपेण तच्छब्देन ब्रह्माभिधीयते अतच्छब्देन तदतिरिक्तमज्ञानादि
नतत अतत तस्य प्रपंचस्य व्यावृत्तिर्निरसनं तदेव रूपं उपायः तेन साक्षाद्विधिमुखेन च विधिर्विधानं साक्षाद्बो
धक प्राक्प्रयोगः सत्यं ज्ञानमनंतमित्येवमादिरूपः तेन च विधिमुखेन तद्द्वारेणापीत्यर्थः वेदांतानामुपनिषदां

अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च वेदान्तानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥ ८७ ॥
अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः नैवमंशस्य त्यागो हि भागलक्षणयोदितः ॥ ८८ ॥

प्रवृत्तिः प्रवर्तनं प्रतिपादनं ब्रह्मणीति शेषः ॥ ८७ ॥ ननु वेदांतानामतद्व्यावृत्त्या ब्रह्मबोधकत्वांगीकारेऽहं प
दार्थस्य कूटस्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं [illegible]देतुमर्हतीति शंकते ॥ अ
हमर्थेति अहं प्राक[illegible]र्थस्य सर्वस्य त्यागे तत्त्वान्नैवमिति परिहरति नैवमंशस्येति हि यस्मात्कारणाद्भागल
क्षणया जहदजहल्लक्षणया अंशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्याग ईरितः न कूटस्थस्यातो ब्रह्मास्मी
ति ज्ञानमुपपद्यत इत्यर्थः ॥ ८८ ॥ ॥

नो

पं.त.
=
॥१६॥
=

अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति अंतःकरणेति॥८२॥ ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वा
द्बुद्धिवृत्तिविषयत्वं न घटते इत्याशंक्याह॥ स्वप्रकाश इति अन्यवत् घटवदित्यर्थः स्वप्रकाशोऽहमित्येवं बु
द्धिवृत्तिसंभवादिति भावः तर्हि अपसिद्धांत इत्याशंक्य पूर्वाचार्यैरपि [illegible] वृत्तिव्याप्यत्वस्यांगीकृतत्वान्ना
यमपसिद्धांत इत्याह॥ फलव्याप्यत्वमिति फलं वृत्तिप्रतिबिंबितः चिदाभासः तद्व्याप्यत्वमेवास्य प्रत्यगा

अंतःकरणसंत्यागादवशिष्टे चिदात्मनि अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते॥८२॥
स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ८३
बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं॥ तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥८४॥

त्मनो निराकृतं तस्य स्वस्यैव स्फुरणरूपत्वादिति भावः ८३॥ आत्मनि फलव्याप्यभावं दर्शयितुमनात्मनो व
स्तुनः फलेन व्याप्यत्वं दर्शयति॥ बुद्धितत्स्थ इति॥ उभयव्याप्तेः प्रयोजनमाह तत्राज्ञानमिति॥ तत्र
तयोः बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणरूपया अज्ञानं नश्यति॥ ज्ञानाज्ञानयोर्विरोधात्
आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतः स्फुरणायोगादिति भावः॥८४॥ राम राम राम

१६

ननु तर्हि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशादिरूपायो विहितं श्रवणाद्याव
र्तनमनुष्ठेयं स्यादित्याशंक्य कृज्ञानदार्ढ्याय तदावर्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह । अस्त्व
वोध इति अत्र ब्रह्मात्मनि विषये महावाक्यात्सकृच्छ्रुतात् विचारसहितादपरोक्षबोधो यद्यपि भवत्येव तथाप्यसौ
दृढः अतः श्रवणाद्यावर्तनीयं श्रीमच्छंकराचार्यैः पुनर्वाक्यार्थतात्पर्यं तत्तत्स्थले श्रवणाद्यावर्तनाभिधा
नादित्यर्थः । ज्ञानदार्ढ्यायेतदर्था लभ्यते ॥९६॥ आचार्यैः केन वाक्येनाभिहितमित्याशंक्य तद्वाक्यं पठति ॥

अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ ॥ न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ॥९७॥
अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् । शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ॥९८॥
बाढं संति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता ॥ असंभाव्यत्वमर्थस्य विपरीता च भावना ॥९९॥

अहं ब्रह्मेति ॥९८॥ ननु वाक्यप्रमाणजनितस्य ज्ञानस्यादार्ढ्ये कृतः इत्याशंक्याह ॥ बाढं संतीति । हि यस्मात्कारणा
च्छ्रुत्यनेकता श्रुतीनां नानात्वमेको हेतुः अर्थस्याखंडैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासंभावि
तत्वमपरः विपरीता भावना च पुनः कर्तृत्वाद्यभिमानरूपात् तृतीय इत्येवं विधा दार्ढ्यस्य हेतवो बाढं संति
सर्वथा विद्यंते अतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकमावर्तनीयमिति भावः ॥९९॥ राम राम

वे. वे.
टी.
१८

एवं त्रिविधानंदात्म्येहेतत्रुपपन्नस्य स्मृतिना नात्वपृष्ठक्तादार्ढ्येनिवर्त्तमेश्रवणावृत्तिः कर्त्तव्येत्याह ॥ शाखाभेदादि
ति॥ यथाशाखाभेदात्कर्मभेदः श्रूयते बहृचैर्वहोत्रं क्रियते॥ यजुषाध्वर्यवं साम्नोद्गीथमिति यथावा काम भेदात्क
र्मभेदः पशुकामो यजेत शतकृष्णलमायुष्कामः इत्यादि कर्मभेदः श्रुत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्यभेद
प्रकाशांतनिवारणाय श्रवणंपुनः पुनः कर्त्तव्यमित्यर्थः॥१९॥ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह॥ वेदांतानामि
ति सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यं पारंपर्येण पर्यवसानमि

शाखाभेदात्कामभेदात्तच्छ्रुतं कर्मान्यथान्यथा॥ एवमत्रापिमाशंकीत्यतः श्रवणमाचरेत्॥१९॥
वेदांतानामशेषाणामादिमध्यावसानतः॥ ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत्॥२०॥
समन्वयाध्यायएतत्सूत्रितं धीस्वास्थ्यकारिभिः तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरिता॥२१॥

त्येवंरूपो निश्चयः श्रवणमित्यर्थः॥२०॥ एवंविधं श्रवणं कुत्र निरूपितमित्याह॥ समन्वयेति॥ एतच्छ्रवणं समन्व
याध्याये सूत्रितं व्यासादिभिरिति शेषः॥ अर्थासंभावनानिवृत्तिहेतुर्मननं तु द्वितीयाध्याये निरूपितमित्याह॥ धी
स्वास्थ्येति॥ प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिः तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावितत्वानुसं

धीतेषांप्रकाशत्वेनाम्यासितमितिप्रस्तावितमिति संक्षेपः॥
१.२१

१८

ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य ॥ तदुपपादिकां श्रुतिं दर्शयति ॥ सौषुप्तमिति सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिः धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्रतिपादयतीत्यर्थः ॥१५८॥ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह सर्वज्ञत्वादिके इति कुतः इत्यत आह ॥ श्रौतेति इतोऽपि न विप्रतिपत्तिः कार्येत्याह ॥ मायेति ॥१५९॥ ननु अनुकूलयुक्त्य

सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ । एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥१५८॥ ॥ रामराम॥
सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यताम् । श्रौतार्थस्याऽवितर्क्यत्वान्मायायां सर्वसंभवात् ॥१५९॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् । न कोऽपि शक्तस्तेनायं सर्वेश्वर इतीरितः ॥१६०॥

भावे [illegible] [वाक्यवत्] श्रुतिरपि ग्रावप्लववदर्थवादः स्यादित्याशंक्य श्रुतिप्रमाणप्रसिद्धं सर्वेश्वरत्वादिकमुपपादयति अयमिति अयमानंदमयो यज्जाग्रदादि विश्वं सृजति तन्न केनाप्यन्यथाकर्तुं शक्यते अतोऽयं सर्वेश्वर इत्यर्थः ॥१६०

विरोधे गुणवादः स्यादनुवादोऽवधारिते तद्धानाद्भूतार्थवादोऽर्थवादस्त्रिविधः ॥२॥

पं.द.
२
१८

एवं त्रिविधानं दार्ढ्यहेतुत्वेन तस्य स्वरूपतो नानात्वप्रश्नं मनसि निधाय तत्प्रश्नवणावृत्तिः कर्तव्येत्याह ॥ शाखाभेदादि-
ति ॥ यथा शाखाभेदात्कर्मभेदः श्रूयते बह्वृचैर्वहोत्रं क्रियते ॥ यजुर्भिराध्वर्यवं सामभिरौद्गात्रमिति यथा वा कामभेदात्क-
र्मभेदः स्वर्गकामो यजेत पशुकामः पुत्रकाम इत्यादि कर्मभेदः श्रुत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेद
एकायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः ॥ ११ ॥ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह ॥ वेदान्तानामि-
ति सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यं पारंपर्येण पर्यवसानमि-

शाखाभेदात्कर्मभेदस्तथा कर्मान्यथान्यथा ॥ एवमत्रापि माशंकीत्यतः श्रवणमाचरेत् ॥ १० ॥
वेदान्तानामशेषाणामादिमध्यावसानतः ॥ ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् ॥ ११ ॥
समन्वयाध्याय एतत्सूत्रैर्धीस्थमास्तिकैरिभिः तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरितम् ॥ १२ ॥

त्येवंरूपो निश्चयः श्रवणमित्यर्थः ॥ ११ ॥ एवंविधं श्रवणं कुत्र निरूपितमित्याह ॥ समन्वयेति ॥ एतच्छ्रवणं समन्व-
याध्याये सप्रसूत्रैर्व्यासादिभिरिति शेषः अर्थासंभावनानिवृत्तिहेतुर्मननं तु द्वितीयाध्याये निरूपितमित्याह ॥ धी-
स्थमिति ॥ प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्थमास्तिकारिभिः तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावितत्वान्मनं

ननु धीवासना प्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य ॥ तदुपपादिकां श्रुतिं दर्शयति ॥ सो
षुप्तमिति सषुप्तस्थान एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिः धीवासनाप्रतिबिंबस्वरूपस्यानंदमयस्येश्वर
त्वादिकं प्रतिपादयतीत्यर्थः ॥१५८॥ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह सर्वज्ञत्वादि
क इति कुतः इत्यत आह ॥ श्रौतेति इतोपि न विप्रतिपत्तिः कार्येत्याह ॥ मायेति ॥१५९॥ ननु अनुकूलयुक्त्य

सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः ॥१५८॥ ॥ रामराम॥
सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्वसंभवात् ॥१५९॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् न कोपि शक्तस्तेनायं सर्वेश्वर इति श्रुतः ॥१६०॥

वाक्यत्वर
भावे श्रुतिरपि ग्रावप्लववदर्थवादः स्यादित्याशंक्य श्रुतिप्रमाणप्रसिद्धमयेसर्वेश्वरत्वादिकमुपपादयति अ
यमिति अयमानंदमयो यज्जाग्रदादि विश्वं सृजति तन्न केनाप्यन्यथाकर्तुं शक्यते अतोऽयं सर्वेश्वरत्यर्थः १६०

विरोधि गुणवादः स्यादनुवादोवधारिते तद्धानादूतार्थवादस्त्रिविधः ॥२॥

इदानीं सर्वज्ञत्वमुपपादयति ॥ अशेषेति ॥ तत्र सौषुप्ते ज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबुद्धीनां वासनानि वसंति ताभिर्वासनाभिः सर्वं जगत्क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावद्ज्ञानोपाधिकत्वेन सर्वज्ञ उच्यते इत्यर्थः ॥६१॥ ननु यदि सर्वज्ञत्वमस्ति तर्हि कुतो नानुभूयते इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह ॥ वासनानामिति कथं तर्हि तदवगम इत्याशंक्याह ॥ सर्वेति ॥ सर्वबुद्धिनिष्ठं सर्व

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ॥६१॥ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयतां ॥६२॥ विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि अंतस्तिष्ठन्यमयति तेनांतर्यामितां व्रजेत् ॥६३॥ बुद्धौ तिष्ठन्नांतरः स्याद्धियो नो धीयं वपुः धियमंतर्यमयतीत्येवं वेदेन घोषितं ॥६४॥ दे॰

ज्ञं स्वकारणभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हंतीति कार्यनिष्ठधर्मविशेषत्वात्पटगतरूपादिवदित्यर्थः ॥६२॥ सर्वज्ञत्वमुपपाद्येदानीमंतर्यामीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ विज्ञानमयेति अन्यत्र पृथिव्या

॥१६२॥

मनश्चांचल्ये दोषे गीतावाक्यं प्रमाणयति ॥ चंचलं हीति प्रमाथि प्रमथनशीलं पुरुषस्य व्याकुलत्वकारणं बलव
त्समर्थं मननिग्राह्यमित्यर्थः दृढं सत्यं सततं वा विषये लग्नं ततउद्धर्तुमशक्यमित्यर्थः अतः तस्य मनसो निग्र
हो वायोर्निग्रह इव सुदुःकरः ॥१२०॥ मनसो दुर्निग्रहत्वे वासिष्ठवाक्यमपि प्रमाणयति ॥ अप्यब्धिपानादि
ति ॥१२१॥ प्रकृतेन तेनैव संबंधं दर्शयति ॥ कल्पनादाविति अंके खेलावद्देहस्य यथा निर्बंधो न तथा कल्पनादावि

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥१२०॥
अप्यब्धिपानान्महतः सुमेरून्मूलनादपि ॥ अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः ॥१२१॥
कल्पनादौ न निर्बंधः अंके खेलावद्देहवत् किंत्वनंतेतिहासादौ विनोदो नाट्यवत्प्रियः ॥१२२॥

त्यर्थः अंकदिशावेन तथा चित्ते तनादिकं गृह्यते तेन केवलं निर्बंधाभावः किंतु तद्धियो विनोद इत्याह ॥ किंत्वनंतेति इति
हासः पूर्वेषां कथा आख्यायिका लौकिककथा अनुकूलयुक्तिदृष्टांतप्रदर्शनादीनां ते तथा अनंता असंख्याताः अनं
ता अते इतिहासाख्यायिका इत्यनंतेतिहासाद्याः तैर्हि यः बुद्धेर्विनोदः क्रीडाविशेषो भवति तत्र दृष्टांतः नाट्यव
दिति ॥ नाट्यवत्प्रियमिष्टमित्यर्थः ॥१२२॥ राम राम ॐ ॐ ॐ ॐ ॐ ॥

पं.
द.
११

नन्वेवं कृष्यादिभिर् अप्येतदेकपरत्वविघातः स्यादित्याशंक्याह। चिदेवात्मेति॥ इतिहासादीनामात्मा चिन्मात्ररूपेण देहा
दिरूपेण जगच्च मिथ्येत्येतस्मिन्नेवार्थे पर्यवसानात्तैरेतदेकपरत्वशब्दाभिधेयस्य निदिध्यासनस्य विक्षेपः इत्य
र्थः॥१२३॥ नन्वितिहासादीनामङ्गीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह॥ कृषीति॥१२४॥ कृष्यादीनां
तत्त्वानुसंधानविघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वाद् अपित्याज्यमेवेत्याशंक्याह॥ अनुसंधत्तेति कुत इत्य

चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः॥ निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् १२३॥
कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च विक्षिप्यते प्रवृत्ता धीः तैस्तत्त्वस्मृत्यसंभवात्॥१२४॥
अनुसंदधतैवात्र भोजनादौ प्रवर्तितुं शक्यतेऽत्यन्तविक्षेपाभावादाशु पुनः स्मृतेः॥१२५॥
तत्त्वविस्मृतिमात्रान्नानर्थः किन्तु विपर्ययात् विपर्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित्

त आह अत्यन्तेति। विक्षेपाभावेऽपि कुत इत्यत आह॥ आश्विति॥१२५॥ ननु तदानीं विक्षेपाभावेऽपि
तत्त्वविस्मृतिसद्भावात्तत्कृतोऽनर्थो भवतीति स्यादित्याशंक्याह॥ तत्त्वविस्मृतीति॥ कुतस्तर्ह्यनर्थ इत्यत आह॥
किं त्विति। विस्मरणोत्तरं विपर्ययोऽपि स्यादित्याशंक्याह॥ विपर्येतुमिति॥१२६॥ रामरामराम

॥२२॥

नेतुभोजनादिप्रवृत्तस्यैव तर्काद्यभ्यासे प्रवृत्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशंक्याह ।। तत्त्वस्मृतेरिति ।। न केवलं तत्त्वानु
संधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात्तदानीं स्मृतमपि तत्त्वं बलादुपेक्षते इत्याह ।।
प्रवृत्तेति ।।१२७।। तत्त्वानुसंधानविरोधिवाग्व्यवहारस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं विजानीथ आत्मानमन्या वाचो विमुं

ये

चथ अमृतस्यैष सेतुरिति वाक्यमर्थतः पठति ।। तमेवैकमिति । नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति एतदपि

तत्त्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः ।। प्रवृत्ताभ्यासघातित्वाद्बलात्तत्त्वमुपेक्ष्यते ।।१२७।।
तमेवैकं विजानीयात्त्वन्या वाचो विमुंचथ ।। इति श्रुतं तथा नानुध्यायाद्वाचो विग्लापनं त्विति ।।१२८।।
आहारादित्यजन्नैव जीवेद्धन्यात्ततस्त्यजेत् ।। किं न जीवसि येनैवं करोष्यत्र दुराग्रहं ।।१२९।।
जनकादेः कथं राज्यमिति चेद्दृढबोधतः ।। तथा त्वमपि चेत्तर्कं पठ यद्वा कृषिं कुरु ।।१३०।। ।।

वाक्यं श्रुतमित्याह ।। तमेवेति ।।१२८।। ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यते एवमितरशास्त्राद्यभ्यासोपि क्रि
यतामित्याग्रहं कुर्वाणं प्रत्याह ।। आहारादीति ।।१२९।। ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपालनादौ प्रवृत्तिरिति
शंकते ।। जनकादेरिति दृढापरोक्षज्ञानवत्त्वात्तेषां ज्ञानबाधिकेत्यभिप्रायेण परिहरति ।। दृढेति तर्हि मम दृढबोधोस्तीति

ननु तत्त्वविदः तेऽज्ञानस्य सारतां जानंतः कुतः तत्र प्रवर्तिष्यंत इत्याशंक्य प्रारब्धस्यावश्यंभावित्वात् विफलत्वाद्भोगेन तत्क्षयाय प्र

वर्तिरित्याह ॥ मिथ्यात्वेति ॥ १३१ ॥ तर्हि ज्ञानिनां चौर्येऽपि प्रवृत्तिः स्यादित्याशंक्याह ॥ अतिप्रसंगेति ॥ प्रारब्धवशादेवातिप्रसं

गोऽपि स्यादित्याशंक्यांगीकरोति ॥ अस्त्वेति ॥ १३२ ॥ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मण्यवश्यंभोक्तव्यतया समाने तयोः

कुतो वैलक्षण्यसिद्धिरित्याशंक्याह ॥ ज्ञानिनो इति ॥ १३३ ॥ तत्र दृष्टांतमाह ॥ मार्गेति ॥ १३४ ॥ इत्यमुपपादितमात्मानं वेदेति

मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकांक्षया ॥ अश्लिष्टं तं ततः प्रवर्तते स्वस्वकर्मानुसारतः ॥ १३१ ॥ अतिप्रसंगो माशं

क्यो विवेकमेव प्रावर्तिनां अस्तु वाकेन शक्येत कर्मवारयितुं वद ॥ १३२ ॥ ज्ञानिनो ज्ञानिनश्चापि समे प्रारब्धकर्मणि

न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ॥ १३३ ॥ मार्गे गंत्रोर्द्वयोः श्रांतौ समायामप्यदूरतां ॥ जानन् धैर्याद्

द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः ॥ १३४ ॥ साक्षात्कृतात्मधीः सम्यगविपर्ययबाधितः किमिच्छन्कस्य कामायेत्यस्मिन्

मंत्रस्य पूर्वार्धार्थमनुवदन् फलप्रदर्शनपरमुत्तरार्धमवतारयति ॥ साक्षादिति ॥ सम्यक् साक्षात्कृतात्मधीः साक्षात्कृ

ते आत्मा येन स साक्षात्कृतात्मा तादृशी धीर्यस्य स साक्षात्कृतात्मधीः अविपर्ययबाधितः विपर्ययेण देहाद्यात्मत्व

बुद्ध्या बाधितो न भवतीति अविपर्ययबाधितः उभयं हेतुगर्भितं विशेषणं ॥ १३५ ॥ रामराम राम सर्वायपनमः ॥ २६ ॥

अस्यमंत्रस्यार्थंविस्पष्टतात्पर्यमाह॥ जगन्मिथ्यात्वेति काम्यंकामुकश्च काम्यकामुकौ ताभ्यामाक्षिप्तौ तन्निराकरणे कारणमा
ह जगन्मिथ्यात्वधीभावात् इति ततः किमित्यतआह। तयोरिति तयोः काम्यकामुकयोरभावे संतापः कामना
निमित्तकः कारणाभावान्निःस्नेहदीपवच्छाम्येदित्यर्थः॥१३६॥ काम्याभावात्कामनाभावः किं दृष्ट इत्याशंक्याह॥
गंधर्वेति। मायाविनिर्मितेपत्तने स्थितंवस्तु किंचिदपि इदमैंद्रजालिकं निर्मितमिति जानन्नकामयतेनकेवलंका

जगन्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ तयोरभावे संतापः शाम्येन्निःस्नेहदीपवत्॥१३६॥
गंधर्वपत्तने किंचिन्नैंद्रजालिकनिर्मिते। जानन्कामयते किंतु जिहासति हसन्निदं॥१३७॥
आपातरमणीयेषु भोगेष्वेवंविचारवान्॥ नानुरज्यति किंत्वेतान्दोषदृष्ट्या जिहासति॥१३८॥

मनाभावः प्रत्युतेदमनृतमितिहसन् जिहासति परित्यक्तुमिच्छति॥१३७॥ दार्ष्टांतिके योजयति॥आपातेति
एवमापातरमणीयेषु प्रतीतिमात्ररम्येषु भोगेषु भुंज्यंते इति भोगाविषयास्रक्चंदनवनितादयः तेषु एवंविचा
रवान् आपातरमणीत्वानुसंधानवान्नानुरज्यति नासक्तिं करोति किंतुदोषदर्शनेनैतानत्यक्तुमिच्छति॥१३८॥ ॥

केते विषयदोषा इत्यत आह अर्थानामिति ॥ १२ ॥ एवं विषयाणां दुःखहेतुत्वं प्रदर्श्य शोभनत्वं च क्वचिद्दर्शयति मांसे
ति स्नायवः शिराः स्थीनि प्रसिद्धानि ग्रंथयो मांसनिचयरूपानि तं च स्तनादयः एतैः सहितायाः मांसपांचालिका
याः पुत्तलिकाया योषितायं त्रलोले यंत्रवच्चलनशीले अंगपंजरे अंगान्येव पंजरं नीडं तस्मिन् शरीरे किं शोभन
मिव न किमपीत्यर्थः ॥ एवमादिष्वित्यादि पाठेन त्वङ्मांसरक्तवाष्पांबुपृथक्कृत्वा विलोचने समालोकय रम्यं
अर्थानामर्जने क्लेशस्तथैव परिपालने नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः ॥ १३ ॥ मांसपांचालिकाया
स्तु यंत्रलोलेंगपंजरे स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियः किमिव शोभनं ॥ १४ ॥ एवमादिषु शास्त्रेषु दोषास्स
म्यक् प्रपंचिताः ॥ विमृशाम्यनिशं तानि कथं दुःखेषु मज्जति ॥ १५ ॥ क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिच्छति ॥ मि
ष्टान्नतृप्तस्तद्वज्जानन्मूढः तज्जिघत्सति ॥ १६ ॥ प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदि क्लिश्यन्नेव तदाप्ये
ते किं व पापानि कुर्वतीत्येवमादयोर्हंते ॥ १७ ॥ विषयदोषदर्शने सति भोगेच्छाभावे युक्तिसहितदृष्टांतमाह ॥ क्षुधयेति
त्वयममूढः विवेकी मिष्टान्नभोजनेन धृत्तो विनष्टात्ततस्तु गायमसतः तयोक्तः इदं विषमित्येवं जानन्न तद्विषं न
जिघित्सतीति नात्तुमिच्छतीत्यर्थः ॥ १६ ॥ न तु प्रारब्धकर्मणः प्राबल्यात् तानि नो पिच्छा भवेदित्याशंक्य सत्यामपीच्छा

कथमेतदवगम्यत इत्याशंक्य लोके दर्शनादित्याह ॥ भुंजाना इति ॥ १९४ ॥ ननु तत्वविदां संसारनिमित्तकस्तापो ऽ
नुपपन्नः ज्ञानवैयर्थ्यापातादित्याशंक्याह ॥ नायमिति ॥ अयं क्लेशः नाद्यापि कर्म नः छिन्नमित्येवमनुतापात्म
कः संसारतापो न भवति किंत्वऽत्र संसारे विरक्तता आशक्तिरहितता पकत्वाभावे युक्तिमाह ॥ भ्रांतीति ॥ हि यस्मा
त्कारणात्सांसारिकस्तापो भ्रांतिज्ञाननिदानो भ्रांतिज्ञानकारणकः स्मृतः एवं आचार्यैः ॥ अयं तु विवेकज्ञान

भुंजाना ज्ञानिनो बुधाः अश्नुवंतः कुटुंबिनः नाद्यापि कर्म नः छिन्नमिति क्लिश्यंति संततं ॥ १९४ ॥
नायं क्लेशोऽत्र संसारतापः किंतु विरक्तता ॥ भ्रांतिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ॥ १९५ ॥
विवेके परिक्लिश्यन्नल्पभोगेन तृप्यति ॥ अन्यथानंतभोगेऽपि नैव तृप्यं कर्हिचित् ॥ १९६ ॥ ति
न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ १९७ ॥

फलत्वान्न तथाविध इत्यर्थः ॥ १९५ ॥ अयं क्लेशो विवेकफलो वेति कुतोऽवगम्यत इत्याशंक्य कामनिवर्तकत्वाद्विवेक
फल इत्याह ॥ विवेकेनेति ॥ १९६ ॥ विवेकिन इवाऽविवेकिनोऽपि भोगेनैव तृप्तिः स्यादतो विवेकोऽप्रयोजक इत्याशं
क्य भोगस्य तृप्तिहेतुत्वाभावप्रतिपादिकां स्मृतिं पठति ॥ न जात्विति ॥ १९७ ॥ ममममममममममममममममम

पं॰ टी॰
॥ ३५ ॥

विवेकमलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह॥ परिज्ञायेति॥ अयं भोग एतावानेव प्रयाससाध्य इत्येवम नुभवपूर्वकमेव दलं बुद्धिहेतुर्हि दृश्यत इत्यर्थः ननु अल्पमोहेतो भोगस्याविवेकसाहचर्यमात्रेण कथं तृप्तिकर त्वमित्याशंक्य सहकारिविशेषवशाद्विपरीतकार्यकरत्वं लोके दृष्टमित्याह॥ वित्तायेति॥ अयं चौर इति ज्ञा त्वा तेन सह वर्तमानस्य पुरुषस्य चौरेण चौरतामेति किंतु मित्रतामेतीत्यर्थः॥ १४८॥ ननु कामनास्वभावत्वान्मनसः

परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये॥ विज्ञाय सेवितश्चौरो मैत्रीमेति न चौरतां॥ १४८॥
मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः॥ तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते॥ १४९॥

कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन निगृहीतस्यांतपात्वाद्भवेत्तृप्तिरित्याह॥ मनस इति॥ नि गृहीतस्य योगाभ्यासेन वशीकृतस्य मनसोऽल्पकोऽस्वल्पोऽपि लीलानुभवो योऽस्ति अलब्धविस्तारं अप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वात् दोषयुक्तत्वात् बहु मन्यते अधिकत्वेन जानातीत्यर्थः॥ १४९॥ रामरामरामरामरामराम ॥ ३५ ॥

लीलाभोगो १

वंहुदेशंनमन्यते४

निगृहीतस्यमनसः स्वल्पेनापिभोगेनतृप्तिर्भवतीत्यत्रदृष्टांतमाह॥ वंधमुक्तइति॥१५०॥ ननुप्रारब्धकर्मप्रा
वल्यात्भोगेष्विछाभवेद्यदीत्यत्रकर्मवशादिछाभवेत्युक्तंतदनुपपन्नं इछाविद्यातिनिविवेकज्ञानेसतितदुस
त्यसंभवादितिशंकते॥ विवेकइति॥१५१॥ दोषदर्शनेसत्यपिइछजन्मसंभविष्यतिइत्याह॥ नैषेति॥ प्रारब्ध

वंधमुक्तोमहीपालोग्राममात्रेणतुष्यति॥ परैरवद्धोनाक्रांतोनाराष्ट्रंवहुमन्यते॥१५०॥
विवेकेजाग्रतिसतिदोषदर्शनलक्षणे॥ कथमारब्धकर्मापिभोगेछांजनयिष्यति॥१५१॥
नैषदोषोयतोनेकविधंप्रारब्धमीक्ष्यते॥ इछानिछापरेछाचप्रारब्धंत्रिविधंस्मृतं॥१५२॥
अपथ्यसेविनश्चौराराजदाररताअपि॥ जानंतएवस्वानर्थमिछंत्यारब्धकर्मतः॥१५३॥
पि नचात्रैतद्वारयितुमीश्वरेणापिशक्यते॥ यतईश्वरएवाहगीतायामर्जुनंप्रति॥ =॥१५४॥

स्यनानाप्रकारत्वमेवदर्शयति॥ इछानिछेति॥ इछाजनकमनिछयाभोगप्रदं परेछयाभोगप्रदंचत्रिविधमित्यर्थः
॥१५२॥ इछाप्रारब्धंदर्शयति॥ अपथ्यसेविनइति॥१५३॥ अपथ्यसेवादीछायाः प्रारब्धफलत्वंकुतोवगम्यतेइ
त्यतःपरिहार्यत्वादित्यभिप्रेत्याह॥ नचात्रैतदिति॥ अस्मिंल्लोकेअपथ्यादिइछंतीत्येतत्कृतेइत्यतआह॥ यतइति
शंक्या१

गीतावाक्यं पठति सदृशमिति ॥ विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपं चेष्टते प्रकृति
नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः किंपुनः मूर्खः तस्मात्प्रकृतिं यान्ति भूतानि नि
ग्रहः प्रवृत्तिनिवृत्त्योर्निरोधो मयान्येन वा कृतः किं करिष्यति न किमपीत्यर्थः ॥१५५॥ तीव्रप्रारब्धस्यापरिहार्य
त्वे च नान्तरसंमतिमाह ॥ अवश्यमिति ॥ अवश्यं भाविनां भावानां दुःखादीनामित्यर्थः ॥१५६॥ प्रारब्धस्यापरि

सदृशं चेष्टते स्वस्याः प्रकृतेः ज्ञानवानपि ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति १५५॥
अवश्यं भाविभावानां प्रतीकारो भवेद्यदि ॥ तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥ १५६॥
न चेश्वरत्वमीशस्य हीयते तावता यतः ॥ अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ॥ १५७॥
प्रश्नोत्तराभ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः ॥ अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ॥ १५८॥

हार्यत्वे तत्परिहारासमर्थस्येश्वरस्यानी[illegible] १५७ यत इति यतः कारणादेषां दुःखादीनामवश्यंभावितापीश्व
रेणैव निर्मिता ततो नानीश्वरत्वप्रसंग[illegible] इत्यर्थः ॥१५७॥ एवं स्वप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं व
क्तुमारभते प्रश्नोत्तरेति ॥ अनिच्छापूर्वकं च प्रारब्धमस्ति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव गम्यते ज्ञायते इति

[illegible] कुत इत्यत आह ३

तत्रार्जुनस्य प्रश्नं तावद्दर्शयति ॥ अथ केनेति । हे वार्ष्णेय वृष्णिसंबंधिन् अयं पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्नपि इच्छामकुर्वन्नपि राज्ञा बलान्नियोजित इव पापं चरति ॥ आचरतीति ॥१५२॥ एतस्योत्तरमाह ॥ काम एवेति । एव पुरुषप्रवर्त्तकः रजोगुणसमुद्भवः उत्पत्तिर्यस्य स रजोगुणसमुद्भवः काम एव प्रसिद्धो यं कामः कदाचित्क्रोधरूपेण परिणमते ततः क्रोधः स पुनः कीदृशः महाशनः महदशनं विषयजातं यस्य स महाशनः महापाप्मा महतः पापस्य हेतुत्वादुपचारात् महापाप्मत्वमस्य अतः इह संसारे एनं कामं क्रोधरूपं वैरिणं विद्धि

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥१५२॥

काम एष क्रोध एष रजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ॥१५३॥

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा ॥ कर्त्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥१६१॥

अयमभिप्रायः प्रारब्धवशादुद्भिन्नो रजोगुणकार्ययोः कामक्रोधयोरन्यतरस्यैव पुरुषप्रवर्त्तकत्वेन प्रवृत्तौ छाया इति ॥१६०॥ ननु त्वत्र कामक्रोधयोरेव पुरुषप्रवर्त्तकत्वमुपलभ्यते नानिच्छाप्रारब्धस्येत्याशंक्य तस्यैव प्रवर्त्तकत्वप्रतिपादकं तद्वाक्यं पठति ॥ स्वभावजेनेति । हे कौंतेय स्वेनैवानुष्ठितेनात एव स्वकीयेन प्रारब्धकर्मणा

पं॰ ॥ १३ ॥

इदानीं परेच्छाप्रारब्धमपत्तीत्याह ॥ नानिच्छंत इति ॥ अनिच्छंतोपि भवंति इच्छंतो न भवंति किंतु परदाक्षिण्यसं न
युताः संतः तत्प्रीत्यर्थमेव सुखदुःखे अनुभवंति अत एतत्सुखादिभोगहेतुभूतं परेच्छापूर्वकप्रारब्धमस्ति
तमित्यर्थः अत एव दोषप्रदर्शनेन सत्यपि प्रारब्धस्यापरिहार्यत्वात्तस्यैच्छाजनकत्वं न निवारयितुं शक्नोतीति

नानिच्छंतो न चेच्छंतः परदाक्षिण्यसंयुताः ॥ सुखदुःखे भजंत्येत त्परेच्छापूर्वकं महि ॥१८२॥
कथं तर्हि किमिच्छन्नित्येवमिच्छा निषिध्यते नेच्छानिषेधः किंत्विच्छाबाधो भर्जितबीजवत् ॥

भावः ॥ १८२ ॥ ननु तत्त्वविदोपीच्छांगीकारे किमिच्छन्निति विरोध इति शंकते कथमिति । किमिच्छन्निति अनेन
वाक्येन कथमिच्छाभावो वर्णित इत्यर्थः नानेनेच्छाभावो विधीयते किंतु सत्या अपि तस्याः समर्थप्रवृत्ति
जनकत्वं नास्तीति बाध्यते इति परिहरति नेच्छेति स्वरूपेण सत्यापि तस्याः सामर्थ्यराहित्ये दृष्टांतमाह
भर्जितेति ॥१८३॥ रामरामरामरामरामराम ओम् ओम् ओम्

संदेपत्लोक्तमर्थं प्रपंचयति॥ भर्जितानीति॥ यथा भर्जितानि वीजानि स्वरूपेण विद्यमानान्यपि नांकुरादिकार्य
कराणि भवंति तथा विद्वदिच्छा स्वयं विद्यमानापीक्ष्यमानपदार्थस्यासत्वज्ञानेन वाधितत्वान्न व्यसनादिकार्य
फला क्षमा इत्यर्थः॥१६६॥ ननु तर्हि विदुष इच्छैव नांगीकर्तव्या ˇ भावादित्याशंक्य फलाभावोसिद्धो भोगलक्षण ˇ फल
सद्भावादिति सदृष्टांतमाह॥ दग्धवीजमिति दग्धं भर्जितमिति यावत् व्यसनविपदादिरूपं वहुविधं व्यसनं वि

भर्जितानि च वीजानि संत्यकार्यकराणि च विद्वदिच्छा तथेष्टव्याऽसत्ववोधान्न कार्यकृत्॥१६७॥
दग्धवीजमरोहेपि भक्षणायोपयुज्यते॥ विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं वहु॥१६८॥
भोगेन चरितार्थत्वात्प्रारब्धं कर्म हीयते॥ भोक्तव्यसत्यताभ्रांत्या व्यसनं तत्र जायते॥१६९॥

यदिभ्रं प्रोक्तो वेकामजे कोपज इत्यभिधानात्॥१६७ ननु तर्हि कर्मैव भोगद्वारा व्यसनमपि जनयदित्याशं
क्याह॥ भोगेनेति प्रारब्धकर्मणो भोगमात्रहेतुत्वान्न व्यसनजनकत्वमित्यर्थः॥ कुतः तर्हि व्यसनजन्मेत्य
तआह॥ भोक्तव्येति॥ तत्र तस्मिन् विषये॥१६८॥ रामरामराम रामायनमः ओम् ओम् ओम्

व्यसनहेतुभ्रमं दर्शयति मा विनश्यत्विति अयं भोगो मा विनश्यतु एव उत्तरोत्तरं वर्द्धतां विघ्नाश्चैनं मा प्रतिबध्नं
तु अस्य प्रतिबंधं मा कुर्वीत अस्मादेव भोगादहं धन्यः कृतार्थोऽस्मीत्येवंरूपो भ्रमो भवति ततश्च व्यसनानी
त्यर्थः ॥१९७॥ प्रसंगादस्य परिहारोपायमाह यदभावीति यद्भवितुमयोग्यं तन्न भवेदेव भवितुं योग्यं चे
त् तदन्यथा न भवेदेवेत्येवंरूपः चिंताविषघ्नः इदं मे श्रेयः कदा भविष्यति इदमनिष्टं कदा निवर्तिष्यतीत्येव

मा विनश्यत्वयं भोगो वर्द्धतामुत्तरोत्तरं ॥ मा विघ्नाः प्रतिबध्नंतु धन्योऽस्म्यस्मादिति भ्रमः ॥१९७॥

भावि यदभावि न तद्भावि भावि चेन्न तदन्यथा ॥ इति चिंताविषघ्नोऽयं बोधो भ्रमनिवर्त्तकः ॥१९८॥

समेऽपि भोगे व्यसने भ्रांतो गच्छेन्न बुद्धिमान् अशक्यार्थस्य संकल्पाज्जातस्य व्यसनं बहु ॥१९९॥

मादि चिंतैव विषमिव स्वसंस्पृष्टपुरुषस्य नाशहेतुत्वाद्विषमिदं चिंता विषं हंतीति चिंताविषघ्नः एवंभूतो
यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमनिवर्तक इत्यर्थः ॥१९८॥ ननु विद्वदविदुषोरुभयोरपि भोगित्वा
विशेषे एकस्य व्यसनमपरस्य तु तन्नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानसत्त्वासत्त्वाभ्यां तात्सिद्धिरित्याह ॥

विवेकिनः तदभावं दर्शयति मायामयत्वमिति ॥१२०॥ ननु मायामयत्ववैधेऽस्त्वपि भोगस्य तदानींतनसुख
हेतुत्वात्कुतः अस्योपसंहार इत्याशंक्य बहुविधदर्शनादित्याह स्वप्नेंद्रजालेति ॥१२१॥ ननु तेषु स्वप्नेंद्रजा
लेसादृश्यपादित्तानेन सत्यास्तित्वभावो न भवेत्तदेव कुतो जायते इत्याशंक्य तज्जन्मोपायमाह स्वस्वप्नमिति द्वा
भ्यां स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागरावुभावप्यप्रमत्तः सन्मुहुः चिं

मायामयत्वं भोगस्य बुद्ध्वाऽऽस्थामुपसंहरन् । भुंजानोऽपि न संकल्पं कुरुते व्यसनं कुतः ॥१२०॥ समस्तां

स्वप्नेंद्रजालसादृश्यमचिंत्यरचनात्मकं । दृष्ट्वैकं जगत्पश्यन् कथं तत्रानुरज्यति ॥१२१॥

स्वस्वप्नमपरोक्षेण दृष्ट्वा पश्यन् स्वजागरं । चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ॥१२२॥

चिरं तयोः सर्वसाम्यमनुसंधाय जागरे । सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ॥१२३॥

तयोः स्वप्नतत्स्थायि जागरयोरिति एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरिणामिविरसत्वविनाशित्वादिल
क्षणं चिरमनुसंधाय जागरेऽपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्दृष्टस्वप्नवत्पूर्ववज्जगत्सत्यत्वज्ञानदशायामिवा
नुरक्तो न भवतीत्यर्थः ॥१२४॥ सर्पाय नमः ॥ रामराम रामराम ओम् ओम् ओम्

२२ पं. दे. ॥७॥ धू

ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वोपजीविनो भोगस्य च परस्परविरोधित्वान्मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्यत्वापेक्षाभावान्न विरोध इति परिहरति ॥ इंद्रजालमिति इदं द्वैतं भोग्यजातमचिंत्यरचनात्वादिंद्रजालवन्मिथ्येति युक्त्यानुसंधायाविस्मरतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यानुसंधानस्य का हानिः वाशब्दात् मिथ्यात्वानुसंधानेन वा।

इंद्रजालमिदं द्वैतमचिंत्यरचनात्वतः ॥ इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ॥१२४॥
निर्बंधस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतौ ॥ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ॥१२५॥

भोगस्य का हानिः विभिन्नविषयत्वादिति भावः ॥१२४॥ विभिन्नविषयत्वमेव दर्शयति ॥ निर्बंध इति तत्त्वविद्याया जगतस्तत्त्वगोचरस्य ज्ञानस्येंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधो न तु भोगापलापे प्रारब्धकर्मणः जीवस्य सुखदुःखयोः प्रदाने आग्रहो न तु भोग्यसत्यत्वापादने इति भावः ॥१२५॥

पं.द.
२२

एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह ॥ विद्येति विद्याप्रारब्धकर्मणी परस्परं न विरुद्धे ते विभिन्नविषय
त्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः । भोग्यमिथ्यात्वज्ञानं भोगबाधकं न भवति इत्येतद्दृष्टान्तमित्याशंक्या
ह ॥ जानद्भिरिति ऐंद्रजालविनोद इंद्रजालसंबंधि चमत्कारविशेषः जानद्भिरपि इंद्रजालत्वं जानद्भिरप्य
वलोक्यत इति प्रसिद्धमित्यर्थः ॥ १२६ ॥ किंच विद्याप्रारब्धकर्मणोर्विरोधोस्तीति वदन्प्रष्टव्यः किं प्रारब्धकर्म

विद्यारब्धो विरुध्येते तेन भिन्नविषयत्वतः जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु ॥ १२६ ॥
जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि ॥ तदा विरोधि विद्यायाः भोगमात्रान्न सत्यता ॥ १२७ ॥

विद्याविरोधीत्युच्यते उक्तविद्याप्रारब्धविरोधिनीति नाद्य इत्याह ॥ जगत्सत्यत्वमिति प्रारब्धं कर्म जग
गतो भोगजातस्य सत्यत्वमबाध्यमापाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तदा विषयस्य मिथ्यात्वस्याप
हाराद्विद्याया विरोधि स्यान्न च तथा करोति किंतु भोगमेव प्रयच्छति अतो न विरोधि प्रारब्धमिति भावः भो
गवशादेव भोग्यस्य सत्यत्वमपि स्यादित्याशंक्याह ॥

५

ननु मिथ्याभूतपदार्थैर्भोगो भवतीत्यत्रापि दृष्टान्तो नास्तीत्याशंक्याह ॥ अनृत इति ॥ १२८ ॥ नापि द्वितीयस्त्याह । य
दि विद्येति विद्या यदि जगद्भोगजातमपह्नुवीत नेदं रजतमिति निषेधज्ञानवत्प्रतीयमानस्य भोग्यस्य स्व
रूपं विलापयेत्तदा प्रारब्धकर्मभोगस्य सुखदुःखानुभवस्य साधनापहारे प्रारब्धकर्मविघातिनी स्या
न्न चैतत्तथा करोति किंतु मिथ्यात्वमेव बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः ननु मिथ्यात्वबोधना

अनृतेनाप्यते भोगः कल्पितैः स्वाप्नवस्तुभिः जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यतां ॥ १२८ ॥
यदि विद्यापह्नुवीत जगत्प्रारब्धघातिनी ॥ तदा स्यान्न तु मायात्वबोधेन तदपह्नवः ॥ १२९ ॥
अनपह्नुत्य लोकास्तदिंद्रजालमिदं त्विति ॥ जानंत्येवानपह्नुत्य भोगं मायात्वधीस्तथा ॥ १३० ॥

देवस्वरूपमपि विलापयेदिति आशंक्याह ॥ न तु मायात्वेति इंद्रजालादेः स्वरूपविलापनमंतरेणापि मि
थ्यात्वज्ञानदर्शनादिति भावः ॥ १२९ ॥ एतदेव प्रपंचयति ॥ अनपह्नुत्येति । लोका जनास्तदिंद्रजालस्व
रूपमनपह्नुत्यानिरस्य इदमिंद्रजालमिति जानंत्येव यथा तथा भोगं भोग्यमनपह्नुत्याविलाप्य माया

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतदर्शनस्याभावं बोधयत्यतो विद्योत्पद्यमानाज्
गद्विलापयेदेव एवं सति विदुषो भोगः कथं स्यादिति श्रुत्यवष्टंभेन शंकते श्लोकद्वयेन ॥ यत्र त्वस्येति ॥ यत्र यस्यां
विद्यावस्थायां कृत्स्नं जगदस्य विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां
दशायां कोऽपि केन साधनेन चक्षुषा किं दृश्यं रूपजातं पश्येदेवं घ्राणलक्षणेन किं कुसुमादिकं जिघ्रेत् किं

यत्र त्वस्य जगत्स्वात्मा पश्येत्कः तत्र केन किं ॥ किं जिघ्रेत्किं वदेद्वेति श्रुतौ तु बहु घोषितं ॥ १८१ ॥
तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु ॥ १८२ ॥
सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटं ॥ १८३

वाक्यं केन वागिंद्रियेण वदेत् एवमितरैरिंद्रियव्यापाराभावद्योतनापरवाक्यैः इत्येवंप्रकारेण श्रुतौ बहुवारमभि
हितमित्यर्थः ॥ १८१ ॥ ततः किमित्यत आह ॥ तेन द्वैतमिति ॥ १८२ ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं
हीत्यस्मिन्सूत्रे यत्र त्वस्येति उदाहृतायाः श्रुतेः सुषुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वान्न विद्या

अभावः १

पं. ते. ३१

अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानंगीकारे बाधकमाह ॥ अन्यथेति ॥ तत्रोपपत्तिमाह ॥ द्वैतदृष्टेति । याज्ञवल्क्यादि
र्यदि द्वैतं पश्येत्तर्हि तदा द्वैतज्ञानाभावान्नाचार्यो भवेत् अथ द्वैतं न पश्यति तर्हि बोध्यशिष्याद्यनुपलंभादाचार्यत्वा
कृ शिष्यप्रतिबोधनाय न प्रवर्त्तेत अतो विद्यासंप्रदायोच्छेदप्रसंग इति भावः ॥ १८३ ॥ ननु याज्ञवल्क्यादीनामाचार्य
त्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावान्निर्विकल्पकसमा

वा

अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् ॥ द्वैतदृष्ट्याविद्वत्ताद्वैताद्दृष्ट्या न वाग्वदेत् ॥ १८४ ॥
निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः ॥ सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किं ॥ १८५ ॥

ना

आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ॥ १८६ ॥

धौ तु द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शंकते निर्विकल्पेति द्वैताप्रतीतेरतिप्रसंगापादकत्वान्नैवमिति परिह
रति ॥ सुषुप्तिरिति ॥ १८५ ॥ अतिप्रसंगपरिहारं शंकते आत्मतत्त्वमिति सुषुप्तौ द्वैतदर्शनाभावेपि आत्मगोच
रज्ञानाभावान्न विद्यात्वं तस्मादुक्तपक्षः तर्हि प्राप्ताप्राप्तविवेकज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह

दृश्यदृशिविवेक

प्र ३१

ननु द्वैतादर्शनात्मज्ञानयोरुभयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शंकते ॥ उभयमिति ॥ द्वैतविस्मृते
रपि विद्यांशत्वांगीकारे जडस्याप्यर्द्धविद्यावत्वप्रसंग इति परिहरति नहीति अत्रोपपत्तिमाह ॥ सकलेति १८७
अस्मिन्नेव पक्षे समाधिमतां पुरुषाणामर्द्धविद्यावत्वमपि न स्यादिति स्वोपहासमाह ॥ मशकेति घटादीनां
यथा द्वैतविस्मरणं रूढं तथा तव समाधौ द्वैतविस्मरणं न संभवति मशकध्वन्यादीनामनेकेषां विक्षेपाणां स

उभयं मिलितं विद्या यदि तर्हि घटादयः ॥ अर्द्धविद्याभाजनाः स्युः सकलद्वैतविस्मृतेः ॥१८७॥

मशकध्वनिमुख्यानां विक्षेपाणां बहुत्वतः तव विद्या तथा न स्यात् घटानां यथा दृढः ॥ १८८॥

आत्मधीरेव विद्येति यदि तर्हि सुखी भव ॥ दुष्टचित्तं निरुंध्याच्चेन्निरुंधि त्वं यथासुखं ॥ १८९॥

द्भावादित्यर्थः ॥१८८ नन्वात्मज्ञानस्यैव विद्यात्वं न द्वैतविस्मृतेरिति शंकते ॥ आत्मधीरिति ॥ तदस्माकमि
ष्टमित्यभिप्रायेणाशीर्वादयति ॥ तर्हि सुखी भवेति नन्वात्मधीरेव विद्या सा न दुष्टचित्ते संभवत्यतः चित्त
दोषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शंकामनुभाषते दुष्टचित्तमिति तदंगीकरोति निरुंधीत्व

यतो
पेरः
॥३२॥
=

तदिष्टमिति॥ तदिष्टं अस्माकमिति शेषः कुत इत्यत आह एष्टव्यमायेति। चित्तदोषप्रशमे सति अद्वितीयात्मज्ञाना
यैष्यमाणं जगन्मायामयत्वं सम्यगीप्सितं अत इष्टमित्यर्थः॥ एवं किमिच्छन्निति मंत्रांशेनाभिप्रेतमर्थमु
पपादितमुपसंहरति इच्छन्नेति इच्छन्नप्यप्रमत्तवन्नेहेद तः किमिच्छन्निति सूक्तमिति योजना॥१०॥ एव
मधिष्ठायवर्णने कारणमाह॥ रागइति। रागो लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाड्वलता तस्यय

तदिष्टमेष्टव्यमायामयत्वस्य समीक्षणात् इच्छन्नप्रमत्तवन्नेहेत किमिच्छन्निति हि श्रुतं॥१०॥ एव
रागो लिंगमबोधस्य संतु रागादयो बुधे॥ इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः॥११॥ त्वा

स्याग्निः कोटरे तरोरिति तत्त्वविदो रागानषेधपरं शास्त्रं शास्त्रार्थस्य सम्यक्प्रवृत्तिः स्यान्नैव तामुनेः रागाद
दयः संतु कामं न तद्बोधोऽपबाध्यते इति तस्यैव रागांगीकारपरं च शास्त्रं एवं च सति तत्त्वविदो दृष्टरागाभावे स
ति शास्त्रद्वयं सार्थमर्थवद्भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य दृष्टरागविषयत्वात् तदभ्युपगमप ३२
रस्य रागाभासविषयत्वादिति भावः॥१२॥ रामरामरामरामरामा॥ रामरामराम रामरामरामरामरामा॥
शास्त्रस्य।

एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह ॥ जगन्मिथ्यात्वेति यथा जगन्मि
थ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविव
क्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ॥ १२ ॥ नन्वात्मनो भोक्तृत्वप्रतिषेधः तत्प्रसक्तिपूर्वको वक्त
व्यः सा तु न विद्यते ऽसंगत्वादात्मन इत्याशंक्य तस्याः स्वानुभवसिद्धत्वान्नैवमित्यभिप्रेत्य तदनुवादिकां श्रु

जगन्मिथ्यात्ववत्स्वात्मासंगत्वस्य समीक्षणात् कस्य कामायेति वचो भोक्त्रभावविवक्षया ॥ १२ ॥
पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ॥ = १३ ॥
किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजेत् १४

तिमर्थतोऽनुक्रामति ॥ पतिजायादिकमिति नवा अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्यात्मनस्तु कामा
य सर्वं प्रियं भवतीत्यंते नवाक्यसंदर्भेण पतिजायादिकस्य प्रपंचस्यात्मनो भोगसाधनत्वं प्रतिपाद्यते ततः
आत्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ॥ १३ ॥ एवमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति
किमिति किं कूटस्थस्य भोक्तृत्वमुत चिदाभासस्य किं वोभयात्मकस्येति विकल्पार्थः ॥ तत्र प्रथमं प्रत्याह

॥ पं॰द॰ ॥१३३॥

असंगत्वमस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह सुखिदुःखीति सुखित्वदुःखित्वाभिमानलक्षणो विका
रो भोगः सोऽसंगकूटस्थस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः ॥१२५॥ ननु तर्हि वि
कारिणः चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेपि निरधिष्ठानस्य तस्यैवासिद्धेः नैवमिति परिह

सुखिदुःख्यभिमानाख्यो विकारो भोग उच्यते ॥ कूटस्थश्च विकारी चेत्येतद्व्याहतं कथं ॥ १२५॥
विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि ॥ निरधिष्ठानविभ्रान्तिः केवला न हि तिष्ठति ॥१२६॥

रति विकारिबुद्धीति चिदाभासस्य विकारिबुद्ध्युपाध्यधीनत्वात् ॥ स्वस्मिन्विकारे संभवत्यपि तस्यारोपि
तस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं विहाय स्वातंत्र्येणावस्थानासंभवात् । केवलचिदाभासस्यापि भोक्तृत्वं ॥१३३॥
न संभवतीति भावः ॥ ॥१२६॥ रामराम॥ रामराम रामराम रामराम रामरामराम॥

तस्मान्नतीयः पक्षः परिशिष्यत इत्याह। उभयात्मक इति॥ यत एकैकस्य भोक्तृत्वं न भवति अत उभयात्मकः सा
धिष्ठानः चिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थतस्तूभयात्मकस्यैव न घटत इ
ति भावः॥ नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षित्वस्यापि
श्रवणात् उभयात्मकभोक्तृत्वस्वरूपमपि यथार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्याशंक्य श्रुतेः तत्र
तात्पर्याभावान्नैवमित्याह॥ तादृगात्मानमिति तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यान्यत्कूट

उभयात्मक एवातो लोके भोक्ता निगद्यते तादृगात्मानमारभ्य कूटस्थः शेषितः ॥१२७॥ श्रुतौ
आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् विज्ञानमयमारभ्यासंगं पर्यशेषयत् ॥१२८॥ य ते

स्थः बुद्ध्यादिकल्पनाधिष्ठानभूतः चिदात्मा शेषितः बुद्ध्याद्यनात्मनिरसनेन परिशेषितः श्रुतौ बृहदारण्यका
द्यविस्तार्थः ॥१२७॥ तत्र बृहदारण्यकवाक्यार्थं तावत् संक्षिप्य दर्शयति॥ आत्मेति॥ जनकेन कतम आत्मेत्येव
मात्मनि पृष्टे सति याज्ञवल्क्यः तं विबोधयन्॥ योयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासं

टी. एवं कृतार्थ एव केऽसंगात्मपरिशेषप्रकारं प्रदर्श्य तरेणादिशब्दं त्वंतरेष्यतितद्दर्शयति ॥ कोयमिति कोयमात्मेति व
यमुपास्महे कतरः स आत्मेत्येवमादवात्मविचारेऽणं ततः करणोपाधिकमात्मानमारभ्य प्रज्ञानमात्रात्मकं कू
टस्थः परिशेषितः एवमत्रापि द्रष्टव्यं एवं प्रवृत्तिश्रुतिपर्यालोचनायामभयात्मकस्य भोक्तृत्वेपि मिथ्यात्वेपा
रमार्थिकासंगस्य कूटस्थस्य साभोक्तृत्वेसिद्धं ॥ १९९ ॥ ननु कर्तृत्वाभोक्तृत्वं मिथ्यात्वेपि नात्र तस्मिन्सत्यत्वबुद्धि
कुतो जायते त्याशंक्याह ॥ कूटस्थेति आत्मा लोकप्रसिद्धो भोक्ता द्विवेकज्ञानाभावेन कूटस्थनिष्ठं सत्यत्वमात्म

कोयमात्मेत्येवमादौ सर्वत्रात्मविचारतः ॥ उभयात्मकमारभ्य कूटस्थः शिष्यते श्रुतौ ॥ १९९ ॥
कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः ॥ तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ॥ २०० ॥
भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति एष लौकिकवृत्तांतः श्रुत्यासम्यगनूदितः ॥ २०१ ॥

न्यध्यस्य ततत्त्वाध्यस्य निष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न जहातुमिच्छति ॥ २०० ॥ ननु तर्ह्यात्म
नः कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोगस्य कथं प्रतिपाद्यते इत्याशंक्य न कूटस्यात्मशेषत्वं प्रतिपा
द्यते किं तु लोकप्रसिद्धो भयात्मकभोक्तृशेषत्वमेव श्रुत्यानूद्यत इत्याह भोक्तेति लोके यो भोक्ता स स्वस्यैव भोगा

अनुवादः किमर्थमित्याशंक्य भोक्तर्य्येव प्रेमणो विधानायेत्याह ॥ भोग्यानामिति ॥ भोग्यानां पतिजायादीनां भोक्तुः स्व
स्वभोगोपकरणत्वाद्भोगेष्वनुरागो [..]न कर्त्तव्यः किं तु प्रधानभूते भोक्तर्य्येवानुरागः कर्त्तव्य इति विधानायेत्यर्थः २·२४
भोग्येषु प्रे[म]त्यागपुरस्सरमात्मप्रेमकर्त्तव्यतायां दृष्टान्तत्वेनेश्वरे प्रेमप्रार्थनापुरस्सरं पुराणवचनमुदाहरन्ति या
प्रीतिरिति अविवेकानामात्मज्ञानशून्यानां विषयेष्वनपायिनी दृढा या प्रीतिरस्ति हे माप हे लक्ष्मीपते सा प्रीति
त्वमनुस्मरतः त्वां सदा चिंतयतो मे हृदयान्मनसः सर्पतु अपगच्छतु मम मनो विषयेष्वासक्तिं परित्यज्य त्वय्येव स

भोग्यानां भोक्तृशेषत्वान्माभोग्येष्वनुरज्यतां ॥ भोक्तर्य्येव प्रधाने तोऽनुरागं तं विधित्सति ॥ २·२
या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ =२·३
इति न्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः उपसंहृत्य तां प्रीतिं भोक्तर्य्येवं बुभुत्सते ॥ ॥२·४॥

दातिष्ठतु इत्यर्थः यद्वाऽविवेकानां विषयेषु दृष्ट्या यादृशी प्रीतिरस्ति सा तादृशी विषयेषु विद्यमाना प्रीतिः त्वामनु
स्मरतो मे हृदयान्मापसर्पतु मापगच्छतु सदा तिष्ठत्वित्यर्थः ॥२·३॥ भवत्वेवं पुराणे श्रुतौ किमायातमित्यत आह ॥
इति न्यायेनेति ॥ इत्यनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजातात् पतिजायादिलक्षणाद्विरक्तधीः विरक्ता धी
र्यस्यासौ विरक्तधीः पुरुषः तां भोग्यगोचरां प्रीतिं भोक्तर्य्यात्मन्युपसंहृत्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ॥२·४

एवमात्मन्येव त्रैमोपसंहारे फलितं सदृष्टान्तमाह ॥ त्वचेदनेति ॥ पामरः पृथग्जनः स्रगादिविषयेषु यथाऽप्र-
मत्तः सावधानो भवति एवं मुमुक्षुरप्यात्मनि विषयेन प्रमाद्यत्यनवधानेन करोति किं तु तच्चिन्तयैव तिष्ठति
इत्यर्थः ॥२.५॥ अनवधानाभावमेव बहुभिर्दृष्टान्तैः स्पष्टयति ॥ काव्येति ॥ यथा विजिगीषुः प्रतिवादिज-
यकाम इह लोके प्रधानपुरुषो निरन्तरं काव्यादीन्यभ्यसति एवं मुमुक्षुरपि सदा स्वात्मानं विचारयेत् यथा वै-
दिकः स्वर्गार्थी तत्साधनानि जपादीनि श्रद्धापुरस्सरमनुतिष्ठति तथा मुमुक्षुरपि मोक्षेच्छया स्वे श्रोते श्र

त्वं चेदनवधूतस्त्वं स्रग्वर्णादिषु पामरः । अप्रमत्तो यथा तद्वन्न प्रमाद्यति मोक्षकृत् ॥२.५॥
काव्यनाटकतर्कादि समभ्यस्यति निरन्तरं ॥ विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ॥२.६॥
जपयागोपासनादि कुरुते श्रद्धया यथा । स्वर्गादिवाञ्छया तद्वच्छ्रद्ध्यात् स्वे मुमुक्षुता ॥२.७॥
चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् । अणिमादिप्रेप्सयैवं विविच्यात् त्वं मुमुक्षया ॥२.८॥
कौशलानि विवर्धन्ते तेषामभ्यासपाटवात् । यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्विशदायते ॥२.९॥

...नि विषयान्न कुर्यात् योगी योगाभ्यासवानणिमाद्यैश्वर्यलाभेच्छया महायासेन चित्तैकाग्र्यं यथा संपादयेत् तद्व-
द्यमश्यात्मानं सदा विविच्यात् देहादिभ्यो विविच्य जानीयादित्यर्थः ॥२.६।२.७।२.८॥ नन्वेवमेतेषां सदाभ्यासेन
भेदज्ञानं विशदायते स्पष्टं भवति ॥२.९॥

केर्मध्रुतिच श्रुतिं श्रुतिः

विवेकवैशेष्यस्य फलमाह विविचतेति अन्वयव्यतिरेकाभ्यां भोक्तृतत्त्वं भोक्तुः पारमार्थिकस्वरूपं विविचता भोगाभ्ये
जेद् जातेभ्यो भेदेन जानता पुरुषेण जाग्रत्स्वप्नसुषुप्त्यवस्थास्तु साक्षित्वसंगतत्वाध्यवसीयते निश्चीयत इत्यर्थः
११ अन्वयव्यतिरेकौ दर्शयति यत्रेति जाग्रदादिषु मध्ये यत्र यस्मिन्नवस्थाने जाग्रत्स्वप्नसुषुप्तौ वा यत्स्थूलं सूक्ष्मं
आनंद इति त्रिविधं भोग्यं साक्षिणा दृश्यते अनुभूयते तद्दृश्यं तत्रैव तस्यामेवावस्थायां तिष्ठति इतरत्र इद
तरस्यामवस्थायां नास्ति द्रष्टा तु सर्वत्रानुगतश्चावर्तत इत्यनुभवः सर्वसंमतः हि प्रसिद्धमेतदित्यर्थः ॥२०९॥

विविचता भोक्तृतत्त्वं जाग्रदादिष्वसंगता अन्वयव्यतिरेकाभ्यां साक्षित्वमध्यवसीयते ॥२१०॥
यत्र यद्दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु ॥ तत्रैव तन्नेतरत्रेत्यनुभूतिर्हि संमता ॥ ॥२११॥
स यत्तत्रेक्षते किंचित्तेनानन्वागतो भवेत् दृष्टैव पुण्यं पापं चेत्येवं श्रुतिषु डिंडिमः ॥ ॥२१२॥

न केवलमनुभवः किंतु आगमोपीत्याह प्रायेण स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुषः
सुप्तौ स वा अस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादिवाक्यद्वयमर्थ
तः पठति ॥ स यत्तत्रेति स आत्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्ष्यते पश्यति तेन दृश्येनानन्वागतो भ
वेदनुसृत्य गतो न भवेत् किंतु स्वयमेवावस्थांतरं गच्छति इत्यर्थः पुण्यं पुण्यफलं सुखं पापं तत्फलं दुःखं च दृ

भोक्तृत्वविवेचनपरा श्रुतिस्तत्प्रमाणं दर्शयति जाग्रदिति ॥ यत्सत्यज्ञानानंदलक्षणं ब्रह्मसाक्षिरूपेण स्थितं तत्
जाग्रदादिप्रपंचं प्रकाश्यते प्रकाशयति तद्ब्रह्माहमस्मि न तु बुद्धिचिदाभासाद्यहमस्मीति ज्ञात्वा श्रुत्यनुभवाभ्यां
निश्चित्य सर्वप्रतिबंधैः प्रमातृ[illegible]त्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते ॥ जाग्रदादिष्ववस्थासु
एक एवात्मा मंतव्यः एवं विवेकज्ञानेन स्थानत्रयमतीतस्यावस्थात्रयातिविविक्तस्यात्मनः पुनर्जन्म न विद्यते ए
तच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः ॥ २१३ ॥ २१४ ॥ त्रिषु धामस्विति त्रिषु धामसु त्रिष्ववस्थानेषु यद्भोग्यं

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते ॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते ॥ २१३ ॥
एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु ॥ स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ २१४ ॥
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः २१५ ॥
एवं विविचिते तत्त्वे विज्ञानमयशब्दतः ॥ चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते ॥ २१६ ॥

स्थूलप्रविविक्तानंदरूपं यच्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति ये विद्यंते तेभ्यः
स्थानादिभ्यो विलक्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवः निरतिशयानंदरूपत्वेन सर्वदा शोभनः परमात्मा स
एवाहमित्यर्थः ॥ २१५ ॥

ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामायेति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं व्याहन्येतेत्याशंक्य तस्य वचनस्य
पारमार्थिकभोक्तृभावपरत्वमनभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति मायिकोऽयमिति अयं चिदाभासो
मायिको मिथ्यात्मकः श्रुतेः जीवेशावाभासेन करोतीति श्रुतेरनुभवादपि द्रष्ट्रादित्रितयमध्यवर्तित्वेनानुभूयमान
त्वादपीत्यर्थः तदेवोपपादयति इंद्रजालमिति इंद्रजालवन्मिथ्याभूते जगत्यंतर्भूतत्वादस्यापि मिथ्यात्वं तद्वदनु
भूयते विद्वद्भिरिति शेषः यस्माज्जगदंतःपातीत्यतो मिथ्यैवेतीति योजना २२७॥ अस्य जगत इव विनाशित्वानुभवाद्

मायिकोऽयं चिदाभासः श्रुतेरनुभवादपि इंद्रजालं जगत्प्रोक्तं तदंतःपात्ययं यतः ॥२२७॥
विलयोऽप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते ॥ एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः २२८ ॥
विविच्य नाशं निश्चित्य पुनर्भोगं न वांछति मुमूर्षुः शायितो भूमौ विवाहं कोऽभिवांछति ॥२२९॥

पि मिथ्यात्वमित्याह विलयोऽपीति ॥ सुप्त्यादावित्यादिशब्दार्थः भवतु मिथ्यात्वं ततः किमित्यत आह एतादृशमिति यदा
कूटस्थाद्विवेचितः चिदाभासो मायिको ज्ञातस्तदा स्वस्वभावं स्वतत्त्वमेतादृशं मिथ्यात्मकं पुनः पुनर्विविनक्ति कूटस्था
द्विविच्य जानाति २२८ ॥ ततोऽपि किमित्यत आह विविच्येति स्वविनाशं निश्चित्य भोगेच्छाभावे दृष्टांतमाह मुमूर्षुरि

किंच पूर्ववदहंभोक्तेति व्यवहर्तुमपि लज्जत इत्याह जिह्रेमीति तर्हि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानपर्यंतं कथं व्यवहरतीत्यत आह ॥ छिन्ननासेति ह्रीतो लज्जितः क्लिश्यन् नेदानीमपि कर्म दीयत इति क्लेशमनुभवन् प्रारब्धमश्नुते प्रारब्धकर्मफलं भुंक्त इत्यर्थः ॥२२०॥ इदानीं ज्ञानानंतरं साक्षिण्यभोक्तृत्वाभावः कैमुतिकन्यायेन सिद्ध इत्याह ॥ यदेति अयं चिदाभासः स्वस्यापि भोक्तृत्वमंतुमहंभोक्तेति ज्ञात्वं जिह्रेमीति विलज्जते यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिण्य

जिह्रेमीति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् छिन्ननास इव ह्रीतः क्लिश्यन् प्रारब्धमश्नुते ॥२२०॥

यदा स्वस्यापि भोक्तृत्वं जिह्रेत्ययं तदा ॥ साक्षिण्यारोपयेदेतदिति कैव कथा वृथा ॥२२१॥

इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया ॥ कस्य कामायेति ततः शरीरमनुज्वरेन्न हि ॥ २२२॥

संगमारोपयेदिति वृथा कथा व्यर्था शून्या कैव न कापीत्यर्थः ॥२२१॥ उक्तमर्थं श्रुत्यारूढं करोति इत्यभिप्रेत्येति केस्य कामायेति श्रुतिरित्यर्थः कूटस्थस्याचिदाभासस्य च पारमार्थिकभोक्तृत्वाभावमभिप्रेत्याविशंकया शंकारहितत्वेन भोक्तारमाक्षिपति निराकरोतीति भवत्वेवं भोक्त्राक्षेपस्ततः किमित्यत आह ॥ तत इति ज्वरे

तत्त्वविदः शरीरान्तु ज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं दर्शयति ॥ स्थूलमिति ॥२२३॥ तत्र स्थू
लशरीरे ज्वरसंज्ञावदाह वातपित्तेति २२४ ॥ सूक्ष्मशरीरे ज्वरान्दर्शयति कामक्रोधेति कामादीनां श
श्वि त्वादीनां च ज्वरत्वमुपपादयति द्वयेपीति द्वयेपि द्विधा अपि क्रमेण प्राप्त्याप्राप्तिभ्यां नरं बाधंते ऽतो
ज्वरसाम्यात् ज्वरा इत्युच्यंते इत्यर्थः ॥२२५॥ कारणशरीरगतो ज्वरः छांदोग्यश्रुतावुक्त इत्याह स्वपर

स्थूलसूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतं अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः ॥२२३॥
वातपित्तश्लेष्मजन्याः बाधयः कोटिशास्तनौ दुर्गंधत्वकुरूपत्वदाहभंगाद्यसत्तया ॥२२४॥
कामक्रोधादयः शांतिदांत्याद्यालिंगदेहगाः ज्वरा द्वयेपि बाधंते प्राप्त्याप्राप्त्योर्नरं क्रमात् ॥२२५॥
स्वं परं च न वेत्त्यात्मा विनष्ट इव कारणे आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितम् ॥ = २२६॥ स्व

हि मिति न खल्वयमेवं संप्रत्यात्मानं जानाति अयमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भ
वति नाहमत्र भोग्यं पश्यामीति वाक्ये न स्वपरज्ञानभ्रंशत्वमज्ञानेन नष्टप्रायत्वं परे ह्यागामिदुःख
बीजं वासनासद्भावं चेंद्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः ॥२२६॥ रामरामरामराम॥

एवं त्रिविधपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह ॥ एते ज्वरा इति त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति वियोग इति यतः कारणादेभिः ज्वरैस्तेषां शरीराणां वियोगे तानि शरीराणि नासत एव न भवंति अतः स्वाभाविका इत्यर्थः ॥२२२॥ तत्र दृष्टान्तमाह ॥ तन्तोरिति ॥२२३॥ इदानीं तत्कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुः चिदाभासे तावज्ज्वराभावं दर्शयति चिदाभास इति चिदाभासे स्वतः शरीरत्रयसंबंधमन्तरेण को

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः ॥ वियोगे तु ज्वरैस्तानि शरीराण्येव नासते ॥२२२॥

तन्तोर्वियुज्येत पटो वालेभ्यः कंबलो यथा मृदो घटस्तथा देहे ज्वरेभ्योपीति दृश्यतां ॥२२३॥ हे~

चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् ॥२२४॥

चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का कथा ॥ एकमेवैकतां मेने चिदाभासो ह्यविद्यया ॥२२५॥

पि ज्वरो न विद्यते कुत इत्यत आह ॥ यतः चित इति ॥ चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात्तत्प्रतिबिंबस्यापि चिदाभासस्य तत्पात्वमेवव्यमिति भावः ॥२२४॥ यद्दर्श्य चिदाभासे ज्वराभाव उपपादितः तदिदानीं दर्शयति चिदाभासेपीति ॥ यदा चिदाभासेपि ज्वरा न संभाव्यंते तदा न साक्षिणि संभवंतीति किमुत वक्तव्य

७८

श्री

एकतामिवनेतीति संदेहे येन क्रमसर्गं प्रपंचयति ॥ साक्षीति चिदाभासः स्वेनसहिते शरीरत्रये साक्षिगतं सत्यत्वम
ध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं स्वस्य वास्तवं रूपमितिमन्यत इत्यर्थः ॥२२॥१॥ एवं भ्रांतिज्ञाने सति किं भवतीत्य
तआह एतस्मिन्निति ॥ अयं चिदाभासः अस्यां भ्रांतिवेलायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः तत्रदृ
ष्टांतमाह ॥ कुटुंबवदिति ॥२२॥२॥ दृष्टांतं विशदयति ॥ पुत्रदारेष्विति ॥२२॥३॥ एवमविवेकदशायां चिदाभासभ्रां

साक्षिसत्यत्वमध्यस्य स्वेनोपेतेवपुस्त्रये ॥ तत्सर्वं वास्तवं स्वस्य स्वरूपमेवेतिमन्यते ॥ ॥ ८ ॥ २३॥१॥
एतस्मिन्भ्रांतिकालेयं शरीरेषु ज्वरस्तथा स्वयमेवज्वरामीतिमन्यते हि कुटुंबवत् ॥ ८ २३॥२॥
पुत्रदारेषु तप्यत्सु तपामीति यथा तथा मन्यते पुरुषस्तद्वच्चिदाभासोप्यभिमन्यते ॥ ८ । २३॥३॥
विविच्य भ्रांतिमुज्झित्वा स्वमप्यगणयन्सदा चिंतयन्साक्षिणं कस्माच्छरीरमनुसंज्वरेत् ॥२३॥४॥

त्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं प्रदर्शयति ॥ विविच्येति ॥ चिदाभासः कूटस्थं स्वात्मानं शरीराणि च वि
विच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवं रूपमिति मन्यत इत्युक्तां भ्रांतिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वि
स्मिन्नप्यादरमकुर्वन्स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन् कस्मात् शरीरमनुसंज्वरेदिति ज्व

पं.तृ. ॥२२॥

त्रांतिज्ञानतत्त्वज्ञानयोरुज्वर तदभावकारणत्वं दृष्टांतप्रदर्शनेनस्पष्टयति अथ यथा इति ॥ रज्ज्वादौ क... तस्मसर्पादे रिप
र्ज्ञानं पलायनेकारणं भवति आदिशब्देनस्थाणौ चोरकल्पितश्चौरो गृह्यते रज्ज्वादिज्ञानेनसर्पादिबुद्धिनिवृत्तौ तद
पि पलायनमनुशोचयति विथ्याकृतं मयेत्यनुतप्यत ... इत्यर्थः ॥२२४॥ साक्षिणं सदा चिंतन्निस्युक्तं दृ
ष्टांतेनस्पष्टयति ॥ मिथ्येति ॥ यथा लोके मिथ्याभियोगकर्त्ता तद्दोषस्यप्रायश्चित्तसिद्ध्यर्थं मिथ्याभियुक्तं पुनः
पुनः क्षमापयति एवमयं विद्वानभासोपि साक्षिण्यसंगात्मनि भोक्तृत्वाद्यारोपलक्षणमिथ्याभियोगदोषप्रा

अथ यावत्तु सर्पादिज्ञानं हेतुः पलायने ॥ रज्जुज्ञानेऽहिधीर्ध्वस्ता कृतमप्यनुशोचति ॥२२५॥
मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये ॥ क्षमापयन्निवात्मानं साक्षिणं शरणं गतः ॥२२६॥
आवर्त्त पापनुत्त्यर्थं स्नानाद्यावर्त्तते यथा ॥ आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः ॥२२७॥

यश्चित्तार्थं साक्षिणमात्मानं क्षमापयन्निव शरणं गतः ॥२२६॥ तत्रैव दृष्टांतांतरमाह आवर्त्तेति ॥ यथा पाप
कारिणा पुरुषेणावृत्त पापनुत्त्यर्थमभ्यस्तपापापनोदाय विहितं स्नानादिकं प्रायश्चित्तमावर्त्त्यते पुनः पुनर
नुष्ठीयते तथा पमयिविद्वांसं साक्षिणीसंसारित्वारोपणदोषपरिहाराय ध्यानं परिवर्त्तयन्निव सदा साक्षिपरा

एवं साक्षित्वपरत्वं दृष्टांतैः प्रपंचं उपस्थापयितुं प्रकृतपनेलज्जालुत्वं सदृष्टांतमाह ॥ उपस्थेति ॥ २३८ ॥ इदानीं शरीरत्रयाद्विवेचितस्य चिदाभासस्य पुनस्तैः सह तादात्म्यभ्रमाभावे दृष्टांतमाह ॥ गृहीत इति ॥ २३९ ॥ न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किंतु महत्प्रयोजनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टांतमाह यौवराज्य इति राजानुकारी भवति राजेव प्रजारंजनादिगुणवान् भवतीत्यर्थः ॥ २४० ॥ ननु युवराज्यस्य राजा

उपस्थकुष्ठिनी वेश्या विलासेषु विलज्जते जानतोऽग्रे तथाभासः स्वप्रख्यातौ विलज्जते ॥ २३८ ॥

गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः म्लेच्छैः संकीर्यते नैवं तथाभासः शरीरकैः ॥ २३९ ॥

यौवराज्ये स्थितो राजपुत्रः साम्राज्यवांछया ॥ राजानुकारी भवति तथा साक्ष्यनुकार्ययं ॥ २४० ॥

यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिं श्रुत्वा तदेकचित्तः सन् ब्रह्म वेत्ति न चेतरत् ॥ २४१ ॥

नुसरणे साम्राज्यफलं दृश्यते नैवं साक्ष्यनुसरणे ऽतः तदनुकार्यं प्रवर्तत इत्याशंक्याह यो ब्रह्मेति ॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभावादिरूपस्य फलस्य श्रूयमाणत्वात्तत्फलवांछया साक्ष्यनुसरणे प्रव

पंचदशीटी॰ ॥ ७८ ॥

नन्वेवं तत्त्वज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव नश्येत् अतः स्वविनाशाय कथं प्रवर्तत इत्याशंक्याह ॥ दे
वत्वेति यथा लोके देवत्वप्राप्तिकामा मनुष्या अग्निप्रवेशगंगादौ प्रवर्त्तन्ते एवं साक्षिरूपेणावस्थानल
क्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभासत्वापगमेऽपि तत्त्वज्ञानेऽपि प्रवृत्तिर्घटत एवेत्यर्थः ॥ २६१ ॥
ननु तत्त्वज्ञानेनाभासत्वमपगच्छतीति चेत्कथं तत्त्वविदां जीवत्वव्यवहार इत्याशंक्य प्रारब्धकर्मक्षयपर्यंतं तत्

देवत्वकामा ह्यग्न्यादौ प्रविशन्ति यथा तथा ॥ साक्षित्वेन विशेषाय स्वविनाशं स वांछति ॥ २६२ ॥
यावत्स्वदेहदाहं स नरत्वं नैव मुंचति ॥ यावदारब्धदेहं स्यान्नाभासत्वविमोचनं ॥ २६३ ॥
रज्जुज्ञानेऽपि कंपादिः शनैरेवोपशाम्यति ॥ पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगी भवेत् ॥ २६४ ॥
तो एवमारब्धभोगोऽपि शनैः शाम्यति नो हठात् ॥ भोगकाले कदाचित्तु मर्त्योऽहमिति भासते ॥ २६५ ॥

उपपत्तिं सदृष्टांतमाह ॥ यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यंतं स्वतः नरत्वं नरदेहव्यवहार
योग्यत्वं नैव मुंचति एवं प्रारब्धकर्मक्षयपर्यंतं चिदाभासत्वव्यवहारोऽपि न निवर्त्तत इत्यर्थः ॥ २६३ ॥ ननु भो
क्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात् पुनः कथं भोगानुवृत्तिः कथं वा मर्त्योऽहमिति विपरी

ननु पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्वज्ञानं बाध्येतेत्याशंक्याह नैतावतेति ॥ कदाचिदहं मर्त्य इत्येवंविधिज्ञानो
दयमात्रेणागमप्रमाणजनितं तत्वज्ञानं बाध्यते कुत इत्यत आह ॥ जीवन्मुक्तीति इदं मर्त्यत्वबुद्ध्यपा
करणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किंतु सम्यग्ज्ञाने न भ्रांतिज्ञाननिवृत्तिरित्ययं
वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्ध्युदयेपि पुनः पुनः तत्वज्ञानांतरेण तस्या एव बाध्यत्वमिति भावः ॥
२६६ ॥ भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृत्तिः प्रकृतदृष्टांते दशमे

नैतावतापराधेन तत्वज्ञानं विनश्यति ॥ जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः खलु ॥ २६६ ॥
दशमोपि शिरः ताडन् रुदन् बुद्ध्वा न रोदिति ॥ शिरोव्रणस्तु मासेन शनैः शाम्यति न तदा ॥ २६७ ॥
दशमोमृतिलाभेन जातो हर्षो व्रणव्यथां ॥ तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां ॥

दशमस्त्वमसीति वाक्ये विचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह ॥ दशम
इति दशमोस्मीति ज्ञानोदये सति शिरःताडनपूर्वकं रोदनमात्रं निवर्त्तते ताडनजन्यव्रणस्त्वनुवर्त्तत ए
वेत्यर्थः ॥ २६७ ॥ ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ जीवन्मुक्तेः कुतः पुरुषार्थतेत्याशंक्य मुक्तिला
भजन्यहर्षस्य तद्दुःखाच्छादकस्य सत्त्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह ॥ दशम इति २६८ ॥

पं.त. ॥ ६१ ॥

पुनर्विचारः क्रियतामित्यर्थः २५१॥ ज्ञानेनानिवर्त्तस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशंक्यताद्ध ॥३॥

जीवन्मुक्तिवृत्तं तेनेदमित्युक्तं तत्र वृत्तत्वाभावे किमायातमित्यत आह वृत्तेति पुनः पुनर्विचारकरणोदृष्टा न्तमाह ॥ रससेवीति । यथा रससेवी नरः एकस्मिन्नेव दिने दृष्टबाधापरिहाराय पुनः पुनर्भुंक्ते तद्वदध्यास निवृत्तये पुनः नजन्यवृत्तास्यौषधेनेव भोगेनैव निवृत्तिरित्याह ॥ शामयत्यौषधेनेति ॥२५०॥ शामय त्यौषधेनेति अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे वृत्त आत्मानं चेद्विजानीयादिति श्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पुरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मि न्वृत्ताभावाद्यदाध्यासः तदाभ्यासो विविच्यतां रससेदिनेभुंक्तेभूयो भूयो यथा तथा ॥२५६॥ वी शामयत्यौषधेनायं दशामःस्वं बुणां यथा ॥ भोगेन शमयित्वेतत्प्रारब्धं मुच्यते तथा ॥२५७॥ किमिच्छन्निति वाक्योक्तः शोकमोक्षउदीरितः ॥ आभासस्य ह्यवस्थैषा यद्वीतेत्यस्त्युसप्तमी २५८ मंत्रे परोक्षज्ञानशोकनिवृत्ताख्ये जीवावस्थे द्वे अभिहिते इत्युक्तं इदानीं तदभिधानसूचितां जीवस्य सप्त मीं तृप्तिलक्षणामवस्थां वृत्तानुकीर्तनपूर्वकं वक्तुमारभते ॥ किमिच्छन्निति ॥ किमिच्छन्नित्युत्तरार्द्धेना भिहितोयः शोकमोक्षः तृप्तिर्निः स एव ताग्रेयस्यदभेण उदीरितः एषा अज्ञानमावृत्तिस्तद्धहेदे पञ्च परोक्षधीः अपरोक्षमतिशोकमोक्षतृप्तिर्निरंकुशा इत्यनेन श्लोकेनाभिहितास्सप्तस्ठु जीवस्यावस्थौ

वे

२२

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरंकुशत्वं प्रतियोगिदर्शनपुरःसरं प्रतिजानीते सांकुशेति । विषयज्ञानजन्याया
स्तृप्तेर्विषयांतरकामनया कुंठितत्वात् सांकुशत्वं अस्यास्तु तदभावान्निरंकुशत्वं तदेव दर्शयति ॥ कृतं कृत्य
मिति ॥२५२॥ कृतकृत्यत्वमेवोपपादयति ॥ ऐहिकेति ॥ अस्य विदुषः तत्त्वज्ञानोदयात्पूर्वमिह लोके इष्ट
प्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं अमुष्मभोगसिद्धये यागोपासनादिकं मुक्तिसाधनज्ञान

सांकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा ॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति ॥२५२॥
ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये ॥ बहु कृत्यं पुरास्याभूत्तत्सर्वमधुना कृतं ॥२५३॥
तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं ॥ अनुसंदधदेवायमेवं तृप्यति नित्यशः ॥ ॥२५४॥
दुःखिनोऽज्ञाः संसरंतु काममुपुत्राद्यपेक्षया ॥ परमानंदपूर्णोऽहं संसरामि किमिच्छया ॥२५५॥

सिद्धये श्रवणादिकं चेति बहुविधकर्तव्यमासीदिदानीं तु संसारिकफलेच्छाभावाद्ब्रह्मानंदसाक्षात्कारस्य
सिद्धत्वाच्च तत्सर्वं कृषियागश्रवणादिकं कृतप्रायमभूदितः परमनुष्ठेयत्वाभावादित्यर्थः ॥२५३॥ एवं कृतकृ
त्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति तदेतदिति ॥ प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति
तथा एवं वक्ष्यमाणक्रमेण सर्वदा तृप्यति ॥२५४॥ तेनानुसंधानं प्रपंचयति दुःखिनोऽज्ञा इत्यादिना कृतकृत्यत

पं.
त.
॥१६२॥

स्वर्गाद्यर्थं कर्मानुष्ठानं तस्मै चैतल्लक्षणं प्रमाह ॥ अनुतिष्ठंत्विति ॥२५६॥ ननु स्वार्थप्रवृत्त्यभावेपि परार्थं प्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह ॥ व्याचक्षतामिति ॥२५७॥ ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादि च भवता क्रियमाणमुपलभ्यते । तो क्रियत्वमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किं त्वन्येनैव कल्पितं इत्याह ॥ निद्राभिदेति ॥२५८॥ अकल्पनयापि वाधोस्तीत्या
(न्य)

अनुतिष्ठंतु कर्माणि परलोकयियासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथं ॥२५६॥
व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येत्राधिकारिणो मे तु नाधिकारोक्रियत्वतः ॥२५७॥
निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ॥२५८॥
गुंजापुंजादि दह्येत नान्यारोपितवह्निना ॥ नान्यारोपितसंसारधर्मा नैवमहं भजे ॥ २५९॥
शृण्वंत्वज्ञाततत्वास्ते जानन्कस्माच्छृणोम्यहं मन्यंतां संशयापन्ना न मन्येहमसंशयः ॥२६०॥

शंक्य तदभावे दृष्टांतमाह ॥ गुंजापुंजादिति ॥२५९॥ ननु फलांतरेच्छाभावे कर्मानुष्ठानं मा भूत्तत्वसाक्षात्कारार्थं श्रवणादिकं कर्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादि कर्तव्यमपि नास्तीत्याह शृण्वंत्विति ॥ अज्ञाततत्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्वं यैस्ते तथाभूताः श्रवणं कुर्वंतु तत्वमिदमन्यथा वेति संशयवंतो

॥१६२॥

मोभृत्तां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्त्तव्यमित्याशंक्य देहादावात्मबुद्धिलक्षणस्य विप
र्ययस्याभावान्नदपि नानुष्ठेयमित्याह ॥ विपर्यस्त इति ॥२६१॥ ननु विपर्ययाभावे ऽहं मनुष्य इति व्यवहारः
कथं घटत इत्याशंक्य वासनावशाद्भवतीत्याह ॥ अहं मनुष्येति ॥२६२॥ तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्ध
ये ध्यानं संपाद्यमित्याशंक्य प्रारब्धक्षयमंतरेणास्य निवृत्तिर्नास्तीत्याह प्रारब्धेति ॥२६३॥ ननु प्रारब्धनि

विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्यये देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ॥ २६१ ॥
अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चिराभ्यस्तवासनातो विकल्पते ॥ ॥२६२॥
प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ॥ २६२ ॥
विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते ॥ अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ॥ २६३ ॥
स विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥२६४॥

मित्वकस्यापि व्यवहारस्य विरलत्वाय ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वदर्शनान्न तन्निवृत्तये
ध्यानमनुष्ठेयमित्याह ॥ विरलत्वमिति ॥२६४॥ ध्यानस्याकर्त्तव्यत्वेपि विक्षेपपरिहाराय समाधिः क
र्तव्य इत्याशंक्य विक्षेपसमाधानयोः मनोधर्मत्वान्न विक्षेपनिवार

प. ननु तथापि समाधिफलं अनुभवः संपादनीय इत्याशंक्य तस्य स्वतत्त्वरूपत्वान्न संपाद्य इत्याह ॥ नित्यानुभवेति ॥
उपपादितं कृतकृत्यत्वं निगमयति । कृतं कृत्यमिति २६६॥ एवं सर्वत्र कर्तृत्वानभ्युपगमे ऽनियतताऽवृत्ति
त्वं प्रसज्येतेत्याशंक्य प्रारब्धवशात् प्राप्तमनियतवृत्तित्वमंगीकरोतीति ॥ व्यवहारेति लौकिको भिक्षा
टनादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रतिषिद्धहिंसादिर्व्यवहारः कर्तृत्वभोक्तृत्वरहितस्य मम

नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् । कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः २६६॥
व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा । ममाकर्तुरलेपस्य यथारब्धं प्रवर्ततां २६७॥
अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया । शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः २६८॥
देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः । तारं जपतु वाक् तद्वत् पठत्वाम्नायमस्तकं ॥ २६९॥
विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां । साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ॥ २७०॥
एवं च कलहः कुत्र संभवेत्कर्मिणो मम । विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ॥ २७१॥

न प्रारब्धकर्मानतिक्रम्य प्रवर्ततामित्यर्थः २६७॥ एवं वस्तुतत्त्वमभिधाय प्रौढवादेनाह अथवा कृ-
तेति लोकानुग्रहकाम्यया प्राण्यनुग्रहेच्छयेत्यर्थः २६८॥ शास्त्रीयमेव मार्गं प्रवर्तनांगीकारे तर्हि तद

विभिन्नविषयत्वमेव स्पष्टयति वाग्बुद्धिरिति ॥२७२॥ अथापि यौ ज्ञानिकर्मिणौ कलहं कुर्वाते तौ विद्वद्भिः परिहसनी
यावित्याह एवं चेति ॥२७३॥ कुतः परिहास्यत्वमित्याशंक्य निर्विषयस्य कलहकारित्वादित्याह यं कर्मीति कर्मी
यं स्वात्मीयं कर्मानुष्ठानोपयोगिदेहवाग्बुद्ध्यतिरिक्तं तत्त्यागात्मानं न विजानाति तत्त्वविदां तस्य ब्रह्मत्वं बुद्धे कर्मि
णः कर्मानुष्ठानेन किं हीयते ॥२७४॥ ज्ञानिनामिथ्यात्वबुद्ध्या परित्यक्ताभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो

वपुर्वाग्धीषु निर्बंधः कर्मिणो न तु साक्षिणि ॥ ज्ञानिनः स्वाल्पलेपत्वे निर्बंधो नेतरत्र हि ॥२७२॥
एवं तान्योन्यसंबद्धां तानभिज्ञौ वधिराविव विवदेतां बुद्धिमंतो हसत्येव विलोक्य तौ ॥ २७३॥
यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित् ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ॥२७४॥
देहवाग्बुद्धयः त्यक्ता ज्ञानिनानृतबुद्धितः कर्मी प्रवर्तयत्वाभिर्ज्ञानिनो हीयते त्र किं ॥२७५॥
प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः क्वोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा ॥ २७६॥

वा किं हीयते अतो निर्विषयकलहकारिणोः परिहसनीयत्वमित्यर्थः ॥२७५॥ कर्मानुष्ठानं प्रयोजनशून्यत्वान्न
ज्ञानिनाभ्युपगम्यत इति शंकते प्रवृत्तिर्नोपयुक्तेति उपयोगाभावो निवृत्तावपि समान इति परिहरति निवृत्ति
रिति निवृत्तेर्बोधहेतुत्वान्नोपयोगाभाव इति शंकते बोधहेतुरिति । नहि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयोगव

वे॰
नं॰
१६

ननुबुद्धस्यबुभुत्साभावात् प्रवृत्तेरनुपयोगित्वमितिपुनः शंकते बुद्धश्चेदिति तर्हिबुद्धस्यपुनर्बोधाभावात्तद्धेतु
र्निवृत्तिरपिबुद्धंप्रत्यनुपयोगिनीत्याह ॥ नाप्यसाविति सकृज्ज्ञातस्यबोधस्याऽस्थिरत्वापनिवृत्तिरपेक्षित
इत्याशंक्यस्थिरत्वंबाधकाभावमपेक्षतइतिसाधनांतरमित्याह ॥ अबाधादिति। वाक्यप्रमाणजन्यज्ञान
स्यबाह्यवताप्रमाणेनबाधाभावादनुवृत्तिः स्यादेवातः साधनांतरंतदर्थमनन्वेष्यमित्यर्थः ॥२२७॥

बुद्धश्चेन्नमुमुक्षुस्तेननाप्यसौबुध्यतेपुनः अबाधादनुवर्त्तेतबोधोनत्वन्यसाधनात् ॥२२७॥
नाविद्यानापितत्कार्यंबोधंबाधितुमर्हति पुरैवतत्त्वबोधेनबाधितेतेउभेयतः ॥ २२८॥
बाधितंदृश्यतामक्षैः तेनबाधोनशक्यते जीवन्नाखुर्नमार्जारंहन्तिहन्यात्कथंमृतः ॥२२९॥

ननुप्रमाणांतरेणबाधाभावेप्यविद्यायास्तत्कार्येणकर्तृत्वाध्यासेनवाबाधः स्यादित्याशंक्याह ना
विद्येति ॥ तत्रहेतुमाह ॥ पुरैवतत्त्वबोधेति ॥२२८॥ नन्वविद्यायाबाधितत्वेपितत्कार्यस्यप्रतीयमानस्य
बाधितत्वासंभवात्तेनबोधस्यबाधोभवेदित्याशंक्य उपादाननिवृत्त्यैवतस्यापिबाधितत्वात्तेनापि
बाधः शंकितुंशक्यइत्याह बाधितमिति तत्रदृष्टांतमाह जीवन्नाखुरिति आखुर्मूषकः ॥२२९॥

१६

दैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायदर्शनेन द्रढयितुं तदनुकूलं दृष्टान्तमाह अपीति यः
समर्थः पाशुपतास्त्रैणविद्धो न ममार चेत्किल सन्निष्फलेषु वितन्नाङ्गः शाल्वरहितेषु पाणिष्वपि तद्देहः स
समर्थः पार्थ्यतीति नाशं प्राप्स्यति अत्र प्रमाणं नास्तीत्यर्थः ॥२८०॥ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजय
ति आदाविति आदौ विद्याभ्याससमये चित्तैर्बहुविधैः स्वकार्यैः प्रमातृत्वकर्तृत्वादिभिर्जृम्भमाणयावि
वेकमाणया विद्यया बोधो युद्ध्वा युद्धं कृत्वा तामजयत् स एवाभ्यासपाटवेन सुदृढः यद्यदानीमविद्यानिवृत्तौ
अपि पाशुपतास्त्रैणविद्धस्त्वन्न ममार यः निष्फलेषु वितन्नाङ्गो नंक्ष्यतीत्यत्र का प्रमा ॥२८०॥ ॥
आदावविद्यया चित्तैः स्वकार्यैः जृम्भमाणया युद्ध्वा बोधोऽजयत् सोऽद्य सुदृढो बाध्यतां कथं ॥२८१॥
तिष्ठन्त्वज्ञानतत्कार्यशवा बोधेन मारिताः ॥ न हानिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य ते ॥२८२॥
य एवमतिशूरेण बोधेन न वियुज्यते । प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किम् ॥२८३॥
सत्कां निर्मलेन तत्कार्यैस्ताध्यासेन वा कथं बाध्यतां न कथमपि बाध्यत इत्यर्थः ॥२८१॥ उपपादितमर्थं श्रोतृ
बुद्ध्यारोहाय रूपकेणाह तिष्ठन्त्विति ॥२८२॥ भवत्वेवं प्रकृते किमायातमित्यत आह य एवमिति यः प्रमाने
वसुन्ते प्रकारेणातिशूरेणाविद्यातत्कार्यघातकेन बोधेन बुद्ध्यात्मैकत्वज्ञानेन वियुज्यते न कदापि वियुक्तो

तर्हि ज्ञानिवदज्ञानिनोऽपि पृथक्त्वाग्रहो न युक्तः स्यादाशंक्याह पृथक्त्वेति तत्रोपपत्तिमाह स्वर्गापवर्गेति ।२८

८॥ विद्वदज्ञाग्रहो न युक्त इत्युक्तं तर्हि कर्मिणां वर्तमानेन तेन किं कर्तव्यमित्यत आह । विद्वांश्चेदिति । विद्वा

नात्मज्ञः कर्मिणां मध्ये तिष्ठेच्चेत्तदनुसारेण मातादिभिः सर्वाः क्रियाः करोत्येव तान्कर्मिणो न विचारये

दित्यर्थः ॥ २९॥ अस्यैव तत्त्वबुभुत्सूनां मध्येऽवस्थितस्य कृत्यमाह एवमध्येति एवं विद्वान्बुभुत्सूनां मध्ये

पृथक्त्वाग्रहोन्मायो वा बोधहीनस्य सर्वथा ॥ स्वर्गापवर्गाय पतति तद्बंधपतनोऽभिः ॥ २८॥ व

विद्वांश्चेज्ज्ञातृशां मध्ये तिष्ठेत्तदनुरोधतः ॥ कायेन मनसा वाचा कुर्यादेवाखिलाः क्रियाः ॥ २९॥

एवमध्ये बुभुत्सूनां पदं यातितरां पुनः ॥ बोधायैवाः क्रियाः सर्वाः दूषयंस्त्यजतु स्वयम् ३०

च विद्वदनुसारेण कृतिर्बुद्धस्य युज्यते ॥ स्वनेधयानुसारेण वर्तते तेन स्थिता यथा ॥ ३१॥ २।७

अधिक्षिप्तः ताडितो वा बालेन हसितो न तदा न क्रीडाति न कुप्येच्च गलेप्रस्तुत लालयेत् २।८

बोधाय तत्त्वज्ञानजननाय ताः क्रियाः दूषयन् स्वमपि त्यजतु ॥ ३०॥ कुत एवं कर्तव्यमित्यत आह ॥ अविद्व

दनुसारेणेति मज्ञान्यनुसारेण ज्ञानिनो वर्तनमुचितं कृपालुत्वात्तेषामनुग्रहणीयत्वाच्चेति भावः ॥ एवं

दार्ष्टांतिके योजयति निंदित इति विद्वानज्ञैः निंदितः स्तूयमानो स्वयं न निंदति न स्तौति किंतु तेषामज्ञानि वा
नां यथा बोधः उपजायते तथाचरेत् ॥१८॥ एवमाचरणे निमित्तमाह येनायमिति अयमज्ञानी अत्रास्मिन्
लोके विदुषा येन यादृशेन नटनेनाचरणेन बुध्यते तत्वमवगच्छति तदाचरणं तेन कर्तव्यमेव तर्हि तद्देव
कार्यांतरमपि प्रसज्येतेत्यत आह ॥ अज्ञप्रबोधादिति यतस्तद्विदः तत्वविदः अत्र लोके अज्ञप्रबोधादन्यत्

निंदितः स्तूयमानो वा विद्वानज्ञैर्न निंदति ॥ न स्तौति किंतु तेषां स्यात् यथा बोधस्तथाचरेत् ॥१९॥
येनायं नटनेनात्र बुध्यते कार्यमेव तत् ॥ अज्ञप्रबोधान्नैवान्यत् कार्यमस्त्यत्र तद्विदः ॥२०॥
कृतकृत्यतया तृप्तः प्राप्तप्राप्ततया पुनः तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरंतरं ॥२१॥ ॥

कर्तव्यं नैवास्त्यतः तदनुसरणेन तत्वबोधनं कर्तव्यमित्यर्थः ॥२०॥ द्विवर्णिष्यमाणयोस्तात्पर्यमाह
कृतकृत्यतया इति असौ विद्वान् पूर्वोक्तप्रकारेण प्राप्तप्राप्यत कृतकृत्यतया कृतं कृत्यं जातं येनासौ कृतकृ
त्यः तस्य भावः तत्ता तया तृप्तः सन् पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येन सः प्राप्तप्राप्यः
२ तस्य भावः तत्ता तया तृप्तो भवन् स्वमनसा निरंतरमेवं मन्यते ॥२१॥ राम राम राम रामराम ॥

पं॰ द॰ टी॰

किं मन्यत इत्यत आह धन्योऽहमित्यादिना धन्यः कृतार्थः अद्याप्यभावीद्यामित्यमनवरतं स्वात्मानं स्वस्य
नित्यं स्वरूपं देशाद्यनवच्छिन्नं प्रत्यगात्मानमंजसा साक्षादपरोक्षतो वेद्मि जानामि अतो धन्य इत्यर्थः एवमात्मज्ञा
नलाभनिमित्तां तुष्टिमभिधाय तत्फललाभनिमित्तां दर्शयति ॥ धन्योऽहमिति ब्रह्मानंदः ब्रह्मभूतानंदः
मे स्पष्टं विभाति स्वप्रकाशरूपो भवति तथा स्फुरति ॥ २९४ ॥ एवमिष्टप्राप्त्या तुष्टिमभिधायानिष्टनिवृत्त्यापि तु

धन्योऽहं धन्योऽहं नित्यं स्वात्मानमंजसा वेद्मि ॥ धन्योऽहं धन्योऽहं ब्रह्मानंदो विभाति मे स्पष्टं ॥२९५॥
धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य ॥ धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥२९६॥
धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित् ॥ धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य संपन्नं ॥ ॥ २९७॥
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ॥ धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः ॥२९८॥

ष्टिमाह ॥ धन्योऽहमिति अद्य इदानीं दुःखं दुःखरूपं संसारं न वीक्षे न पश्यामि अतः कृतार्थ इत्य
र्थः दुःखाप्रतीतेः कारणमाह ॥ धन्योऽहमिति अनेककर्मवासनाजालमज्ञानं क्वापि पलायितं न
ष्टमित्यर्थः ॥ २९६ ॥ अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वं च दर्शयति ॥ धन्योऽहमिति ॥ २९७ ॥
यदुक्तं कृतकृत्यत्वमित्यादिना ज्ञातायाः तृप्तेर्निरतिशयत्वमाह ॥ धन्योऽहमिति अतः परं वक्तव्याद

ति शास्त्रं

अस्य सर्वस्य कारणभूतं पुन्यपुंजपरिपाकमनुस्मृत्य तुष्यतीत्याह ॥ अहो पुन्यमिति एवंविधपुण्यसं
पादकमात्मानमनुस्मृत्य तुष्यति अस्य पुण्यस्येति ॥२९४॥ इदानीं अस्य ज्ञानसाधनं शास्त्रं तदुपदे
ष्टारमाचार्यं चानुस्मृत्य तुष्यति। अहो शास्त्रमिति पुनः शास्त्रमिं जन्यं ज्ञानं ज्ञानजन्यं सुखं चानुस्मृ
त्य तुष्यति अहो ज्ञानमिति ॥२९६॥ ग्रंथाभ्यासफलमाह तृप्तिदीपमिति मोहातीतो विमुक्तो मुनिभिरभीहि

अहो पुन्यमहो पुन्यं फलितं फलितं दृढं अस्य पुण्यस्य संपत्तेरहो वयमहो वयं ॥२९४॥ अहो शास्त्रमहो शा
स्त्रमहो गुरुरहो गुरुः ॥ अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं ॥२९५॥ तृप्तिदीपमिमं नित्यं येनुसंदधते बुधाः
ब्रह्मानंदे निमज्जंते ते तृप्यंति निरंतरं ॥ इति तृप्तिदीपः समाप्तः ॥७॥ रामरामरामरामरामरामरामरामराम

तो मेन सतं क्रांतमूर्तिः साक्षी स्वांते तत्तद्रूपप्रतिफलितवपुर्गीयते सो प्रमाता तावत्स्यारूढं प्रमाणं फलम
विविधवृत्तिसंव्याप्तचेत्योपाधिर्मोहो ऽस्मात्प्रमस्य विषयगः स्यात्प्रमेयः परात्मा ॥२९८॥ इति श्री
मत्परमहंसपरिव्राजकाचार्य श्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विर

२०७ ॥१८०॥

47

महो सु
खं२

॥श्व स्त० दिप०२ पत्रे ४२॥ सम॥

॥३॥

पं भा १

ॐ श्रीगणेशाय नमः श्रीगुरुवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचकोशविवेकस्य कुर्वे व्याख्यां समासतः
॥१॥ तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पंचकोशविवेकाख्यं प्रकरणमारभमाण आचार्यस्तत्र श्रोतृप्रवृत्तिसिद्ध
ये सप्रयोजनमभिधेयं सूचयन्मुखतश्चिकीर्षितं ग्रंथं प्रतिजानीते गुहाहितमिति यो वेद निहितं गुहायां परमे व्यो
मन्निति श्रुत्या गुहाहितत्वेनाभिहितं यद्ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादिकोशपंचकविवेकेन ज्ञातुं शक्यते यत
स्ततस्तेषां कोशानां पंचकं प्रकर्षेण प्रत्यगात्मनः सकाशाद्विभज्य प्रदर्श्यत इत्यर्थः ॥१॥ ननु के ते गुहा यस्यां निहि

गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः। बोद्धुं शक्यं ततः कोशपंचकं प्रविविच्यते ॥ १॥
देहादभ्यंतरः प्राणः प्राणादभ्यंतरं मनः। ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा ॥२॥

तं ब्रह्म कोशपंचविवेकेनावबुध्यत इत्याशंक्य श्रुत्या गुहाशब्देन विवक्षितमर्थमाह देहादिति देहादन्नमयात्प्राणः प्रा
णमयः अभ्यंतर अंतरः प्राणमयात्मनः मनोमयः अभ्यंतरः आंतरः ततो मनोमयात् कर्ता विज्ञानमय आं
तर इत्यनुषज्यते ततो विज्ञानमयात् भोक्ता आनंदमयः सोपि वै दांतर इत्यर्थः सेयमन्नमयाद्यानंदमयांतानां पूर्ववर
परंपरा गुहाशब्देनोच्यते इत्यर्थः ॥२॥ रामरामराम रामरामराम रामरामराम रामरामराम॥ रामराम॥

इदानीमन्नमयस्यास्य रूपं तदनात्मत्वं च दर्शयति पितृभुक्तेति पितृभुक्तान्नजात्मात् पितृभ्यां भुक्ताद्यवव्रीह्यादि
लक्षणादन्नाज्जायमाने पद्वीर्यमस्ति तस्माद्वीर्याद्यो देहो जातः पश्चाज्जननानेतरं क्षीराद्यन्नेनैव वर्द्धते स देहोऽन्नमयो
ऽस्य विकारः सच्चात्मा न भवति कुत इत्यत आह प्रागिति जन्मनः प्राक् ऊर्ध्वं च तदभावतः तस्य देहस्याभाव
भावादित्यर्थः विवादाध्यासितो देहश्चात्मा न भवति कार्यत्वाद्घटवदिति भावः ॥३॥ हेतुरस्तु साध्यं माभूदिति पक्षे बाध
काभावादप्रयोजकोयं हेतुरित्याशंक्याकृताभ्यागमकृतविप्रनाशाख्यबाधकसद्भावान्मैवं इति परिहरति पूर्वज

पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्द्धते देहः सोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभावतः ॥३॥ अनात्मत्वे न भवति
पूर्वजन्मन्यसद्देह जन्मसंपादयेत् कथं भाविजन्मन्यसत्कर्मेन भुंजीत संचितम् ॥४॥ ॥ ते

न नीति एवं देहरूपस्यात्मनः पूर्वस्मिन्जन्मन्यसत्त्वादेतज्जन्महेत्वदृष्टासंभवेऽप्यस्य जन्मनोऽप्यंगीक्रियमाण
त्वादकृताभ्यागमः प्र[illegible]सज्येत तथा भाविजन्मन्यप्यस्य देहरूपस्यात्मनोऽसत्त्वादभावादिहानुष्ठितयोः
पुण्यपापयोः फलभोक्तुरभावेन भोगांतरेणापि कर्मक्षयः प्रसज्येतायं कृतविप्रणाशः एवं कृतविप्रणाशा
कृताभ्यागमरूपबाधकसद्भावादात्मनः कार्यत्वं नांगीकर्तव्यमिति भावः ॥४॥ रामरामरामरामराम ॥८॥

॥ २ ॥
पं॰ वि

एवमन्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणमयकोशस्य स्वरूपं तदनात्मत्वं च दर्शयति पूर्ण इति यो वायुर्देहे पूर्णः पादादिमस्तकपर्यंतं व्याप्तः सन् बलं यच्छन् व्यानरूपेण सामर्थ्यं प्रयच्छन् अक्षाणां चक्षुरादीनामिंद्रियाणां प्रवर्तकः प्रेरको वर्त्तते स वायुः प्राणमय इत्युच्यते । स नैवात्मा न भवति तत्र हेतुमाह चैतन्येति विवादाध्यासितः प्राण आत्मा न भवति जडत्वाद्घटादिवदिति भावः ॥५॥ इदानीं मनोमयस्वरूपदर्शनपूर्वकं तस्याप्यनात्मत्वमाह अहंतामिति देहे अहंतामहंभावं गेहादौ ममतां मदीयत्वाभिमानं च यः करोति असौ मनोमय इति सम्ब

पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ॥५॥
अहंतां ममतां देहे गेहादौ च करोति यः कामाद्यवस्थया भ्रांतो नासावात्मा मनोमयः ॥६॥
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥

त्मा न भवति कुत इत्यत आह कामादीति हेतुगर्भविशेषणं कामक्रोधादिवृत्तिमत्त्वेनानियतस्वभावत्वादित्यर्थः । तथा च मनोमय आत्मा न भवति विकारित्वाद्देहवदिति भावः ॥६॥ तदनंतरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपं प्रदर्श्य तस्यानात्मत्वं दर्शयति लीनेति या चिच्छायोपेता धीश्चिदाभाससहिता बुद्धिः सुप्तौ सुषुप्तिकाले लीना विलीना सती बोधे जागरणकाले आनखाग्रात् नखाग्रपर्यंतं वर्त्तमाना सती व

॥ २ ॥

कानि तानि क्रियाजनकानींद्रियाणीत्यत आह वाक्याणीति वागादिभिरक्षैस्तत्क्रियाजनिस्तासां क्रियाणामुत्प
त्तिर्भवतीति शेषः अत्रानुमितिः करणपूर्वकाः क्रियात्वादिकार्यलिंगकमनुमानं द्रष्टव्यं तस्य कर्मेंद्रियपंचकस्य स्था
नान्याह मुखादीति आदिशब्देन करचरणौ गुदशिश्नछिद्रे च गृह्येते ॥११॥ इदानीमुक्तदशेंद्रियप्रेरकत्वेन प्रस्तु
तस्य मनसः कं त्वं स्थानं च दर्शयति मन इति तस्यांतरिंद्रियत्वं तन्निमित्तकमाह तत्त्वेति ॥१२॥ दशेंद्रियाध्यक्षत्वमे
व विशदयति अक्षेष्विति अक्षेष्विंद्रियेष्वर्पितेषु विषयेषु स्थापितेषु सत्सु एतन्मनो गुणदोषविचारकमिदं स

उत्पादनेति वाक्याणिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः मुखादितो गोलके ख्यातं तत्कर्मेंद्रियपंचकं ॥११॥
मनो दशेंद्रियाध्यक्षं हृत्पद्मगोलके स्थितं तत्त्वांतःकरणं बाह्येष्वस्वातंत्र्यादृहिनेंद्रियैः ॥१२॥ मनः
अक्षेष्वर्पितेष्वेतद्गुणदोषविचारकं सत्त्वरजस्तमश्चास्य गुणैर्विक्रियते हितैः ॥१३॥

मीचीनमिदमसमीचीनमित्यादिविचारकारीत्यर्थः अयं भावः आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारणपाच्चक्षुरा
दीनां च रूपादिज्ञानजननमात्रेण चरितार्थत्वात्तद्गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्या तत्कारणत्वे
न मनोऽभ्युपगंतव्यमिति मनसो वैराग्यकामाद्यनेकविधवृत्तिमत्त्वप्रदर्शनाय सत्त्वादिगुणवत्त्वं दर्शयति ॥
मनः सत्त्वमिति तेषां तद्गुणत्वे कारणमाह विक्रियत इति हितैः तैः गुणैः विक्रियते विकारं प्राप्नोतीत्यर्थः ॥१३॥

पं॰भू॰
टी॰ २॰

गुणैः तस्य विक्रियमाणत्वमेव प्रपंचयति वैराग्येति स्पष्टत्वान्न व्याख्यायते १४ वैराग्यादीनां कार्याणि विभज्य दर्श
यति सात्विकैरिति १५ एतेषां बुद्धिस्थत्वादंतःकरणादीनां स्वामिनमाह अत्राहं इति अत्राहमिति प्रत्ययवान् क
र्त्ता प्रभुरित्यर्थः लोकेपि कार्यकारी प्रभुरित्येवमुपदिश्यते १६ एवं जगतः स्थितिमभिधायेदानीं तस्य भौतिकत्व
ज्ञानोपायमाह स्पष्टेति स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दस्पर्शादिगुणैः सहितेषु घटादिषु वस्तुषु भूतकार्यत्वं स्प
ष्टमेवगम्यते ननु इंद्रियादिषु कथं भूतकार्यत्वनिश्चयः इत्याशंक्यागमानुमानाभ्यामित्याह अक्षादावपी

वैराग्यं क्षांतिरौदार्यमित्याद्याः सत्वसंभवाः कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः ॥१४॥
आलस्यभ्रांतितंद्राद्या विकारास्तमसोत्थिताः सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः १५
तामसैर्नैव भयं किंतु वृथायुःक्षपणं भवेत् अत्राहं प्रत्ययी कर्त्तेत्येवं लोकव्यवस्थितिः ॥ १६ ॥
स्पष्टशब्दादियुक्तेषु भौतिकत्वमतिस्फुटं अक्षादावपि तच्छास्त्रयुक्तिभ्यामवधार्यतां ॥ १७ ॥

ति अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्यादि शास्त्रं अनुमानं विमतानि श्रोत्रादीनि भूतका
र्याणि भवितुमर्हंति भूतान्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं दृष्टं
यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्यो दृष्टस्तथा चेमानि तस्मात्तथेति तदन्वयव्यतिरेका

॥३॥

एवं भूतानि भौतिकानि विविच्य दर्शयित्वा प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपा
दिकां श्रुतिं व्याचिख्यासुस्तद्वाक्यस्थेदंपदस्यार्थमाह एकादशेति प्रत्यक्षादिभिः सर्वैः प्रमाणैरपि
शब्दादर्थापत्त्यादिप्रमाणज्ञानैश्च यावत्किंचिज्जगदवगम्यते तत्सर्वं सदेवेत्यादिवाक्यस्थेनेदंपदेना

एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदं शब्दोदितं जगत् ॥१८॥
इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकं सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥१९॥
वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ॥२०॥

भिहितमित्यर्थः ॥१८॥ एवमिदंशब्दस्यार्थमभिधायेदानीं तां श्रुतिं स्वयमेवार्थतः पठति इदमिति आरुणे
स्यापत्यमारुणिरुद्दालकस्तस्य वचनमित्यर्थः ॥१९॥ एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगता
दिभेदत्रयं प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद्दर्शयति वृक्षस्येति ॥२०॥ श्रीरामाय नमः ॥

पं. प्र.
वि.
।।६।।

एवमनात्मनि भेदत्रयं प्रदर्श्य परसद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिपदत्रयेण निवारयतीत्याह तथेति वस्तुत्व
सामान्यादनात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वगतादिभेदत्रयमैक्यावधारणाद्वैतप्रतिषेधाभिधायकैरे
कमेवाद्वितीयमिति त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः ।।२१।। सद्वस्तुनस्तावत्स्वगतभेदः शंकितुं शक्य

तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्यावधारणाद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ।।२१।।
सतो नावयवाः शंक्यास्तदंशस्यानिरूपणात् नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् २२
नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् ।।२३।।

तेऽस्य निरवयवत्वादित्याह सत इति नामरूपयोः सदवयवत्वं किं न स्यादित्याशंक्य सृष्टेः पुरा तयोरभावा
न्न सदंशत्वमित्याह नामरूपेति २२ कुतो नामरूपयोरभाव इत्याशंक्याह नामरूपेति फलितमाह त
स्मादिति अत्रायं प्रयोगः सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वाद्गगनवदिति ।।२३।। राम ।।

आत्मनः स्वगतभेदशून्यत्वे ।

।।६।।

नामरूपगतभेदः सजातीयभेदः किं न स्यादित्याशंक्य तत्सजातीयं सदंतरमिति वक्तव्यं न तन्निरूपयितुं शक्यते। सतो वैलक्षण्याभावादित्याह सदंतरमिति ननु घटसत्ता पटसत्तेति सतो भेदः प्रतिभासत इत्याशंक्य घटाकाशमठाकाशवदौपाधिको भेदो न स्वतो भातीत्याह नामरूप इति अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात् गगनवदिति २४ भवितु तर्हि विजातीयात्

सदंतरं सजातीयं न वैलक्षण्यवर्जनात् नामरूपोपाधिभेदं विना नैव सतो भिदा॥२४॥
विजातीयमसत्तत्तु न खल्वस्तीति गम्यते नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कुतः २५
एकमेवाद्वितीयं सत्सिद्धमत्र तु केचन विह्वला असदेवेदं पुरासीदित्यवर्णयन्॥२६॥

भेद इत्याशंक्यासतो विजातीयमसत्तस्यासत्त्वेनैव प्रतियोगित्वासंभवेन तत्प्रतियोगिको पि भेदो नास्तीत्याह वि जातीयमिति २५॥ फलितमाह एकमेवेति एकमेवाद्वितीयं सत् सिद्धमिति इदानीं स्वपक्षं भावनत्याये न सदद्वैतमेव द्रढयितुं पूर्वपक्षमाह अत्र त्विति॥२६॥ रामायनमः ॥=॥ राम राम॥ राम राम॥ ॥

पं॰भ॰
वि॰
॥ ये ॥

विकल्पेदृष्टांतमाह मगनस्येति दार्ष्टांतिके योज्यमति तयेति अस्पासद्वादिनोजातावेकवचनं धीरंतष्का, रणान्मखंडैकरसंवस्तुस्फूर्त्वा निःप्रचारा साकारवस्तुनीनीवाखंडैकरसे वस्तुनिप्रचाररहिता सतीअ तोस्माद्वस्तुनो विभेति २७॥ उक्तार्थे आचार्यसंमतिं दर्शयति गौडाचार्येति ॥२८॥ केनवा कैयेनोक्तवंत इत्याकांक्षायांतदीयंवार्त्तिकमेवपठति अस्पर्शेति योयमस्पर्शयोगाख्यो निर्विकल्पः समाधिः एषस

मगनस्याखौ यथाद्वाणि विकलानितथास्यधी अखंडैकरसंस्फूर्त्वा निःप्रचारा विभेत्यतः ॥२७॥
गौडाचार्या निर्विकल्पे समाधावन्ययोगिनां साकारब्रह्मनिष्ठानामत्यंतंभयमूचिरे २८॥
अस्पर्शयोगो नामैषदुर्दर्शः सर्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभयेभयदर्शिनः २९॥

वैयोगिभिः साकारध्याननिष्ठैर्दुर्दर्शः दुःखेनद्रष्टुंयोग्यः दुःप्राप्यः दुस्सर्थः अत्रोपपत्तिमाह योगिन इतिहियस्मात्कारणात् योगिनः एवैतत्कैवोतदर्शिनः अभयेभयंमन्येसमाधौ निजेनदेशेवालाद्

अस्पर्शयोगात्

॥ ये ॥

श्रीमत्पदाचार्यैरप्येतदभिहितमित्याह भगवदिति ॥३०॥ तत्रार्धत्रिकं पठति अनादित्वेति ३१ इदानीमसद्वा-
दं विकल्पं दूषयति अन्येति अन्यमासीदित्यनेन वाक्येन अन्यस्य सत्ता जातियोगं चासद्रूपतां वा ब्रूषे
इति विकल्पार्थः तदुभयं सत्तासंबंधसद्रूपत्वलक्षणं अन्यस्य व्याहतत्वान्न युज्यत इत्यर्थः ॥३२॥

भगवत्पूज्यपादाश्च शुष्कतर्कपटूनमून् अनुमाधार्मिकान् भ्रान्तान् चिंत्येऽस्मिन्सदात्मनि ॥३०॥
अनादित्वस्थकृतिं मेदर्श्यादिमेवैकात्ममस्विनः आपेदिरे निरात्मत्वमनुमानैकचक्षुषः ॥३१॥
अन्यमासीदिति ब्रूषे सद्योगं वा सदात्मतां अन्यस्य नन्तु तद्युक्तमुभयं व्याहतत्वतः ॥३२॥
नयुक्तोसत्तामसत्तायोनापि चासौ तमोमयः सद्रूपयोर्विरोधित्वाच्चान्यमासीत्कथं वद ३३॥
वियदादेर्नामरूपे मायया स्वविकल्पिते अन्यस्य नामरूपे च तथा चेज्जीवतां चिरं ॥३४॥

व्याहतत्वमेव दृष्टान्तपूर्वकं द्रढयति नयुक्त इति ३३ ननु भवन्मतेपि वियदादीनां निर्विकल्पे ब्रह्मणि स-
त्वे व्याहतमित्याशंक्याह वियदादेरिति तर्हि अन्यस्यापि नामरूपे सद्वस्तुनि कल्पिते इति वदतो बौद्धस्या-

पं॰भा॰टि॰

॥ ६ ॥

ननु तर्हि अन्यस्येव सद्वस्तुनोऽपि नामरूपे द्वे कल्पिते एवांगीकर्त्तव्ये भवन्मते वास्तवयोर्नामरूपयोरभा
वादिति शंकते सतोऽपीति विकल्पासहत्वादयं पक्षएवानुपपन्न इत्यभिप्रायेणपरिहरति तदेति अय
मभिप्रायः सतो नामरूपे किं सति कल्पिते उतासति अथवा जगति नाद्यः अन्यस्य रज्वादेर्नामरूपयोः
अन्यत्र शुक्तिकादावारोपदर्शनात्सतो नामरूपयोः सत्येव कल्पनायोगात् न द्वितीयः असतो निरात्म
कस्य चाधिष्ठानत्वायोगात् न तृतीयः सत उत्पन्नस्य जगतः सन्नामरूपकल्पिनाधिष्ठानत्वानुपपत्तेरि

सतोऽपि नामरूपे द्वे कल्पिते चेत्तदा वद कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदिष्यते ॥ ३५ ॥
सदासीदिति शब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुनरुक्तिः स्यान्मैवं लोके तथेक्षणात् ॥ ३६ ॥

ति मा भूदधिष्ठानं अनयोः कल्पितः किं न स्यादित्याशंक्याह निरधिष्ठान इति ॥ ३५ ॥ ननु सदेवेदमग्र आ
सीदित्यत्रैव व्याघात उक्तः तथा सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोऽस्तीति शंकते सदासीदि
ति शब्दयोरर्थभेदोऽस्ति न वा अस्ति चेद्द्वैतहानिः नास्ति चेत्पुनरुक्तिः स्यात् तथाहि सदासीदिति अत्र
ववत्वे इति द्वितीयं पक्षमादाय परिहरति मैवमिति पुनरुक्तिदोषस्य कः परिहार इत्याशंक्याह लोके इति

॥ ६ ॥

लोके एवंविधेषु प्रयोगेषु पुनरुक्त्यभावः कुत्र दृष्टः इत्याशंक्याह कर्तव्यमिति भवत्वेवं लोके अकृतौ किं स्या-
यातमित्यत आह इत्यादीति ॥३०॥ नन्वद्वितीये वस्तुनि भूतकालाभावादग्र आसीदित्युक्तिः स्वरूपमात्रेत्या-
शंक्याह कालेति ननु जगदुत्पत्तेः प्राग्जगदभावेन सहद्वितीयत्वं ब्रह्मण इत्याशंक्य श्रुतिप्रवृत्तेर्द्वैतवासनानि-
रासार्थं श्रुतिबोधनार्थत्वात् नातिशंकनीयमित्याह तेनेति ॥३१॥ इदानीं सिद्धांतरहस्यमाह चोद्यमिति
कर्तव्यं कुरुते वा कं प्रब्रूते धार्यं यस्य धारणं इत्यादिवासनाविशिष्टं प्रत्यासीत्सदितीरणम् ॥३७॥ स
कालाभावे पुरेत्युक्तिः कालवासनया प्रोक्तं शिष्यं प्रत्येव तेनात्राद्वितीये न हि शंक्यते ॥३८॥
नोद्यं वा परिहारो वा क्रियतां द्वैतभाषया अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरं ॥३९॥
तदासीत्स्तिमितं गंभीरं न तेजो न तमस्ततं अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ॥४०॥
व्यवहारदशायां चोद्यादि कर्तव्यं परमार्थतस्त्वद्वैतमेव तत्वमित्यर्थः ॥३९॥ परमार्थतो द्वैताभावे स्मृतिं
प्रमाणयति तदेति स्तिमितं निश्चलं गंभीरं दुरवगाहं मनसा विषयीकर्तुमशक्यं न तेजस्तेजस्त्वानधिकरणं
न तमः तमोविलक्षणं अनावरणस्वभावं ततं व्याप्तं अनाख्यं आख्यातुमशक्यं मभिव्यक्तं चक्षुरादिभिर
जे

दृष्टान्ताश्रयेण

ननु जनिमत्त्वेन अनित्यस्य भूम्यादेरसत्त्वमस्तु नित्याकाशस्यासत्त्वं कथमंगीक्रियत इति शंकते नन्विति ॥४९॥
दृष्टान्तावष्टम्भेन परिहरति अत्यन्तमिति अत्यन्तं निर्जगज्जगन्मात्ररहितमित्यर्थः ॥४९॥ नहि दृष्टेऽनुपपन्नमि
तिन्यायमाश्रित्य चोदयति निर्जगदिति दर्शनमेवास्तिद्धमिति परिहरति प्रकाशेति अपसिद्धान्तोऽपीत्याह किं

ननु भूम्यादिकं माभूत्परमाण्वन्तनाशतः कथं ते वियतोऽसत्त्वं बुद्धिमारोहतीति चेत् ॥५०॥
अत्यन्तं निर्जगद्व्योम यथा ते बुद्धिमाश्रितं तथैव सन्निराकाशं कुतो नाश्रयते मतिः ५१॥
निर्जगद्व्योम दृष्टं चेत्प्रकाशतमसी विना क्व दृष्टं किं च ते पक्षे न प्रत्यक्षं वियत्खलु ५२॥
सद्वस्तु शुद्धं त्वस्माभिर्निश्चितैरनुभूयते तूष्णीं स्थितौ न शून्यत्वं शून्यबुद्धेश्च वर्जनात् ५३॥

चेति ॥५३॥ ननु दर्शनाभावः सद्वस्तुन्यपि समान इत्याशंक्य सतः सर्वानुभवसिद्धत्वात्मैवमित्याह सद्वस्त्वि
ति ननु तूष्णीभावे शून्यमेव इतरस्य कस्यापि प्रतीत्यभावादित्याशंक्य शून्यस्यापि प्रतीत्यभावात् शून्यम
पि न संभवतीत्याह न शून्यत्वमिति ॥५४॥ रामराम ॥ रामराम ॥ रामराम ॥ श्रीसूर्याय नमः ॥

सत्तगो
चर

ननु तर्हि सद्बुद्ध्यभावात्सत्त्वमपि न घटत इति शंकते सद्बुद्धीति तस्य स्वप्रकाशत्वान्न तद्बुद्ध्यभावो निर्दुष्ट इति परिहरति मास्त्वस्येति ननु स्वगोचरबुद्ध्यभावे कथं सद्वस्तु अवगंतुं शक्यत इत्यत आह निर्मनस्कत्वेति ८५ एवं निःप्रपंचस्य साक्षिणस्तूष्णींस्थितौ भानं प्रदर्श्य तद्दृष्टांतबलेन सृष्टेः पुरापि सद्वस्तु तथा अवगंतुं शक्यते इत्याह मन इति ॥८६॥ मायायाः किंलक्षणमित्यत आह निस्तत्त्वेति निस्तत्त्वा जगत्कारणभूतात्सद्वस्तुनः

सद्बुद्धिरपि चेन्नास्ति मास्त्वस्य स्वप्रभत्वतः निर्मनस्कत्वसाक्षित्वात्सन्मात्रं सुगमं नृणां ॥८५॥
मनोजृंभणराहित्ये यथा साक्षी निराकुलः मायाजृंभणतः पूर्वं सत्तथैव निराकुलम् ॥८६॥
निस्तत्त्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् न हि शक्तिः क्वचित्कैश्चिद्बुध्यते कार्यतः पुरा ॥८७॥

पृथक्कृतत्वरहिता कार्यगम्या वियदादिकार्यलिंगगम्या अस्य सद्वस्तुनः शक्तिर्वियदादिकार्यजननसामर्थ्यं मायेति उच्यते वस्तुस्वरूपातिरिक्ता शक्तिसद्भावे दृष्टांतमाह अग्नीति यथाग्न्यादिस्वरूपातिरिक्तं स्फोटादिकार्यलिंगगम्यं वह्न्यादिनिष्ठं सामर्थ्यमस्ति तद्वदित्यर्थः शक्तेः कार्यलिंगगम्यत्वं व्यतिरेकमुखेन द्रढयति

एवं प्राक्तैः कार्यलिंगगम्यत्वमुपपाद्य निस्तत्त्वरूपतामुपपादयति नसद्वस्त्विति अयमभिप्रायः सद्वस्तु नः श्रा न्तेः किं सती उतासती न तावत्सती तथात्वे सतोभिन्नत्वेन तच्छक्तित्वायोगात् उक्तार्थे दृष्टान्तमाह नहि वह्नेरिति द्वितीयेपि किं नरविषाणतुल्या उत सद्विलक्षणेति विकल्पाभिप्रायेणाद्य इति सद्विलक्षणेति ॥४८॥ तत्राद्यपक्षमनूद्य दूषयति शून्येति शून्यस्य नामरूपे च तथा चेज्जीवतां चिरमित्यत्रेत्यर्थः तस्मात् द्वितीयपक्षः परिशिष्यत इत्याह नशून्यमिति मायास्वरूपं सत्त्वासत्त्वाभ्यां निर्वचनानर्हमित्यभिप्रायः॥४९॥

नसद्वस्तुसतः शक्तिर्नहि वह्नेः स्वशक्तिता सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यताम्॥४८॥

शून्यत्वमिति चेच्छून्यं मायाकार्यमितीरितं नशून्यं नापि सद्यादृक्तादृक्तत्त्वमिहेष्यताम्॥४९॥

नासदासीन्नोसदासीत्तदानीं किन्त्वभूत्तमः सद्योगात्तमसः सत्त्वं नस्वतस्तन्निषेधनात्॥५०॥

अतएव द्वितीयत्वं शून्यवन्नहि गम्यते नलोके चैत्रतच्छक्त्योर्जीवितं गण्यते पृथक्॥५१॥

अस्मिन्नर्थे श्रुतिं प्रमाणयति नासदिति तमआसीत्तमसा गूढमग्र इत्यादिश्रुतिः प्रमाणमित्यर्थः तर्हि तम आसीदिति कथं सत्त्वमुच्यते इत्यत आह सद्योगादिति कुत इत्यत आह तन्निषेधनादिति॥५०॥ फलितमा

ननु शक्त्याधिक्ये जीविताधिक्यं दृश्यते अतः शक्तेरपि पृथक् जीवितत्वमस्तीति शंकते शक्तेति न शक्तिर्जीवितवृद्धेः कारणमपि तु तत्कार्यं युद्धकृष्यादि इति परिहरति तत्रेति दार्ष्टान्तिके योजयति तथेति ॥५२॥ मायाख्यायाः द्वितीयत्वं सत्तोऽपि तत्कार्येण तद्वत्त्वमेवेत्याशंक्य तस्य तदानीमसत्त्वात्तेनापि न सद्द्वितीयत्वमित्याह

परि

शक्त्याधिक्ये जीवितं चेद्वर्धते तत्र वृद्धिकृत् न शक्तिः किं तु तत्कार्यं युद्धकृष्यादिकं तथा ॥५२॥
सर्वथा शक्तिमात्रस्य न पृथग्गणना क्वचित् शक्तिकार्यं तु नैवास्ति द्वितीयं शंक्यते कथं ॥५३॥
न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किं त्वेकदेशभाक् घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते ॥५४॥
पादोस्य सर्वभूतानि त्रिपादस्यामृतं दिवि इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः ॥५५॥

शक्तेः कार्यं नास्तीति ॥५३॥ ननु सच्छक्तिः सति सर्वत्र वर्तते उतैकदेशे नाद्यः अतत्त्वे प्राप्यवस्तुभावप्रसंगात् न द्वितीयः निरंशत्वे विरोधादित्याशंक्याद्यानंगीकारत्वात् द्वितीये परिहारो वक्ष्यते इत्यभिप्रायेण न कृत्स्नेति एकदेशवृत्तौ दृष्टान्तमाह घटेति ॥५४॥ शक्तेरेकदेशवृत्तित्वे प्रमाणमाह पादोस्येति ॥५५॥

पं.द.वि. ॥ २ ॥

न केवलं श्रुतिरेव स्मृतिरप्यस्तीत्याह विष्टभ्येति ॥५६॥ इदानीं निर्मायस्वरूपसद्भावे प्रमाणमाह सभूमिमिति विका-
रावर्त्तिचतथाहि स्थितमाहेति सूत्रकारवचनमित्यर्थः ॥५७॥ तर्हि निरंशत्वविरोध इत्यस्य कः परिहार इत्याशंक्य
वास्तवनिरंशत्वाभ्युपगमान्नविरोध इत्यभिप्रायेणोदाहृतं श्रुत्यभिप्रायमाह निरंशोप्येति ॥५८॥ यदर्थं ब्रह्मणि माया

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति कृष्णोऽर्जुनायाह जगतस्त्वेकदेशतां ॥५६॥
सभूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशांगुलं विकारावर्त्ति चात्रास्ति श्रुतिसूत्रकृतोर्वचः ॥५७॥
निरंशोप्यंशमारोप्य कृत्स्नेंशे वेति पृच्छतः तद्भाषयोत्तरं ब्रूते श्रुतिः श्रोतृहितैषिणी ॥५८॥
सत्तत्वमाश्रिता शक्तिः कल्पयेत्सति विक्रियाः वर्णा भित्तिगता भित्तौ चित्रं नानाविधं यथा ॥५९॥
आद्यो विकार आकाशः सोवकाशस्वरूपवान् आकाशोस्तीति सत्तत्वमाकाशेप्यनुगच्छति ॥६०॥

समर्थिता तदिदानीमाह वर्णेति वर्णा रक्तपीतादयो सत्तत्वमिति विक्रियाविविधत्वेन क्रियंत इति विक्रियाः कार्य
विशेषा इत्यर्थः तत्र दृष्टान्तमाह वर्णेति वर्णा रक्तपीतादयो धातुविशेषाः ॥५९॥ अत्र प्रथमकार्यविशेषं दर्शयति
आद्य इति तत्स्वरूपमाह सोवकाशेति आकाशस्य ब्रह्मकार्यत्वे हेतुमाह आकाशेति ॥६०॥ रामरामराम ॥ राम ॥ ॥ २ ॥

ततः किमित्यत आह एकेति उक्तमर्थं विशदयति नावकाश इति सति सद्वस्तुन्यवकाशो नास्ति किंतु सत्स्वभाव एक एव आकाशो न तु स च सत्स्वभावश्च एषोप्यवकाशस्वभावोपीति द्वयं स्थितं विद्यत इत्यर्थः ॥६१॥ सकाशयोरेकद्विस्वभाव त्वं प्रकारांतरेणाप्युत्पादयति यद्वेति प्रतिध्वनिर्व्योम्नो गुण इत्युपपादितमध्वस्तौ तु असौ प्रतिध्वनिः सद्वस्तुनि द्वयते नोपलभ्यते व्योम्नि तु सद्ध्वनि सद्रूपौ उभावप्युपलभ्येते तेन कारेण सदेकमेव स्वभावं वियद्विगुणं द्विस्वभावकमित्यर्थः

एकस्वभावं सत्तत्त्वमाकाशो द्विः स्वभावकः नावकाशः सति व्योम्नि सचैषोपि द्वयं स्थितं ॥६१॥ सर्वमेव ३

यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सति द्वयते व्योम्नि द्वौ सद्ध्वनितेन सदेकं द्विगुणं वियत् ॥६२॥

यामशक्तिः कल्पयेद्व्योम्नोरभिन्नतां आपाद्य धर्मधर्मित्वं व्यत्ययेनावकल्पयेत् ॥६३॥ व्योमसास २॥

॥६२॥ ननु आकाशस्य सद्रूपकार्यत्वे आकाशस्य सत्तेति सत आकाशधर्मता कुतः प्रतिभातीत्याशंक्याह यामशक्ति रिति यामायासद्वस्तुनि आकाशं कल्पयति सा प्रथमतः सद्व्योम्नोरभेदं आपाद्य कल्पयित्वा पश्चात् धर्मधर्मिभावं वैपरीत्येन कल्पयति अतः आकाशस्य सत्तेति भानमुपपद्यते इत्यर्थः ॥६३॥ ॐ रामाय नमः ॥

अभेदकल्पनानंतरम् २

विपरीतकल्पनादेव १

सत्ताधर्म्मिणाऽऽकाशो धर्म्मइतियः प्रज्ञोधर्म्मिभावस्तस्माद्वैपरीत्येन र

मायया वैपरीत्यं कथं कृतमित्याशंक्याह सत इति वस्तुतत्वविचारे क्रियमाणे सद्घटरूपत्वमिव सतो व्योमत्वमापन्नं स दृष्ट्वा नः आकाशरूपत्वं प्राप्तं लौकिकाः प्राणिनः शास्त्रेषु मध्ये तार्किकाश्च तद्वैपरीत्येन व्योम्नो गगनस्य धर्म्मिणः सत्तां सद्रूपत्वं धर्मं जातिं चावगच्छंतिजानंति ननु अन्यस्यान्यथा प्रतीतिरनुपपन्नेत्याशंक्याह माययाइति तद्विपरीतं दर्शनहेतुत्वं माययाप्युक्तमित्यर्थः ॥६४॥ मायाया विपरीतप्रतीतिहेतुत्वं लौकिकन्यायप्रदर्शनेन स्पष्टीकरोति यद्यथे ति यच्छुक्त्यादि यथा येन रजतादिरूपेण वर्तते तस्य तथात्वं शुक्त्यादिरूपत्वं प्रमाणतः स्फुरति अन्यथात्वं रजता

सतो व्योमत्वमापन्नं व्योम्नः सत्तां तु लौकिकाः तार्किकाश्चावगच्छंति मायाया उचितं हि तत् ॥६४॥

यद्यथा वर्तते तस्य तथात्वं भाति मानतः अन्यथात्वं भ्रमेणेति न्यायोयं सार्वलौकिकः ॥६५॥

एवं श्रुति विचारात्प्राग्यथा वस्तु भासते विचारेण विपर्येति ततस्तच्चिंत्यतां वियत् ॥६६॥ घट

दिरूपत्वं तद्भ्रमेण भ्रांत्या प्रतिभातीत्ययं न्यायः सार्वलौकिका सर्वलोकप्रसिद्ध इत्यर्थः ॥६५॥ एवं विपरीतप्रतिभानं दर्शयित्वा तन्निवृत्त्युपायमाह एवमिति एवमुक्तेन प्रकारेण श्रुति विचारात्प्राक् श्रुत्यर्थविचारात्पूर्वं यद्वस्तु यत्सद्रूपं ब्रह्म भ्रांत्या य गगनादिरूपेण वर्तते ततः श्रुत्यर्थपर्यालोचनेन विपर्येति गगनादिभावं परित्यज्य सद्रूपं ब्रह्मैव भवति ततः श्रुति

विचारस्वरूपमेव दर्शयति भिन्ने इति भिन्न इति प्रतिज्ञातार्थे हेतुमाह शब्देति वियत्सतो रूपयोरपर्यायत्वादित्यर्थः हेत्वं तरमाह बुद्धेश्चेति तमेव हेतुं विशदयति वाय्वादिष्विति सद्वाय्वादिष्वनुगतेषु सत्वादिषु सत्तेज इत्येवं प्रकारेणानुवृत्तं भासते व्योमतु नैवं भासत इति मज्ज्ञानं साभेदधीः भेदबुद्धिरित्यर्थः ॥६६॥ एवं सदाकाशयोर्भेदं प्रसाध्य व्योम्नः सत्तेति भ्रान्त्या प्रतीतस्य धर्मिधर्मभावस्य विचारेण व्यत्ययं दर्शयति सद्वस्त्वेति रूपरसादिष्वनुवृत्तस्य सतो धर्मित्वं रसा द्व्यस्यैव आकाशवाय्वादिष्वनुवृत्तस्य सतो धर्मित्वं रसादिभ्यो व्यावृत्तस्य रूपस्येव वाय्वादिभ्यो व्यावृत्तस्य नभसो ध

भिन्ने वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः वाय्वादिष्वनुवृत्तं सन्न तु व्योमेति भेदधीः ॥६७॥
सद्वस्त्वधिकवृत्तित्वाद्धर्मि व्योम्नस्तु धर्मता धियासतः पृथक्कारे ब्रूहि व्योम किमात्मकं ॥६८॥
अवकाशात्मकं तच्चेदसत्तदिति चिंत्यतां भिन्नं सतोऽसच्च नेति वक्षि चेद्व्याहतिस्तव ॥६९॥

र्मत्वमित्यर्थः ननु तर्हि घटाद्भिन्नस्य रूपस्य यथा वास्तवत्वं तथा सतो भिन्नस्य नभसोऽपि स्यादित्याशंक्य सद्व्यतिरिक्तस्य नभसो दुर्निरूपत्वान्नैवमित्याह धियेति ॥६८॥ दुर्निरूपत्वमसिद्धमिति शंकते अवकाशेति तर्हि सतो विलक्षणत्वादसदेव स्यादिति परिहरति असदिति सतो विलक्षणस्यासत्त्वं नास्तीति वदतो दोषमाह भिन्नमिति ॥६९॥

आकाशस्य आकाशस्य अवकाशस्वरूपत्वे र

असत्वेभानंनस्यादित्याशंक्यतुच्छविलक्षणत्वात् भातंनविरुध्यतइत्याह भातीतिचेदिति अविरोधंदर्शयितुमि

पं.भ.वि.

॥९९॥

थ्यावस्तुनोलक्षणंसदृष्टान्तमाह यदसदिति यद्वस्तुस्वरूपेणाविद्यमानमपिभासते तत्स्वप्नगजादिवन्मिथ्येत्य
र्थः॥७०॥ ननुनियमेनसहोपलभ्यमानयोर्भेदोनदृष्टचरइत्याशंक्याह जातीति॥७१॥ भेदोयद्यपिबुध्यतेत
थापिनिश्चितोनभवतीतिशंक्यते बुद्धोपीति तस्यपरिहारंवक्तुंनिश्चयाभावेकारणं पृच्छति अनैकाग्र्यादिति॥७२॥

भातीतिचेद्भातुनामभूषणंमायिकस्यतत् यदसद्भासनंतन्मिथ्यास्वप्नगजादिवत्॥७०॥

देही

जातिव्यक्तीदेहीगुणद्रव्येयथापृथक् वियत्सतोस्तथैवास्तुपार्थक्यंकोत्रविस्मयः॥७१

बुद्धोपिभेदोचित्तेननिरूढिंयातिचेत्तदा अनैकाग्र्यात्संशयाद्वारूढ्यभावोस्यतेवद॥७२॥

अप्रमत्तोभवध्यानादाद्येन्यस्मिन्विवेचनं कुरुप्रमाणयुक्तिभ्यांततोरूढतमोभवेत्॥७३॥

आद्येपरिमाणमाह अप्रमत्तः इति आद्येप्रथमेविकल्पेध्यानात्तत्रप्रत्ययैकताननताध्यानमित्युक्तलक्षणादप्र
मत्तोभवसावधानमनाभवेतियावत् द्वितीयेपरिहारमाह अन्यस्मिन्निति ततकिमित्यतआह ततइति॥७३॥

९२

ततोऽपि किमित्यत आह ध्यानादिति ध्यानं पूर्वोक्तलक्षणं मानं भिन्नं वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः इत्यत्रोक्तं यु
क्तिस्तु सद्वस्त्वधिकवृत्तित्वादित्येवं युक्ता एतैर्ध्यानादिभिर्वियत्सतोर्भेदे चित्ते निरूढे याते सति वियत्कदाचिन्न
सत्त्वं किं तु सर्वदा मिथ्यैवावभासते सद्वस्त्वपि छिद्रवदकाशवन्न च नैव भातीति शेषः॥७४॥ वियत्सतोर्विवेच

ध्यानान्मानाद्युक्तितोऽपि रूढे भेदे वियत्सतोः न कदाचिद्वियत्सत्यं सद्वस्तु छिद्रवन्न च॥७४॥
तस्य भाति सदा व्योम निस्तत्त्वोल्लेखपूर्वकं सद्वस्त्वपि विभात्यस्य निःछिद्रत्वपुरःसरं॥७५॥
वासनायां प्रवृद्धायां वियत्सत्यत्ववादिनं सन्मात्रबोधयुक्तं च दृष्ट्वा विस्मयते बुधः ७६॥
एवमाकाशमिथ्यात्वे सत्सत्यत्वे च वासिते न्यायेनानेन वाय्वादेः सद्वस्तु प्रविविच्यतां॥७७॥

नफलमाह तस्य भातीति॥७५॥ वियन्मिथ्यात्वं सतो वस्तुत्वं च सदा चिंतयतः किं भवतीत्यत आह वासनायामि
ति बुद्धो वियत्सतोस्तत्त्ववेत्ता गगनस्य सत्यत्वं ब्रुवाणं निरवकाशसद्वस्तुबोधरहितं च दृष्ट्वा विस्मयं प्राप्नोतीत्य
र्थः॥७६॥ उक्तन्यायमन्यत्राप्यतिदिशति एवमिति॥७७॥ राम राम राम॥ राम राम राम राम॥ राम राम राम॥

॥पं०भवि०॥ को
॥९२॥

नन्वंशकार्यस्यवायोरकारणभूतेनसद्वस्तुनातादात्म्यप्रतीत्ययोगात्सतोविवेचनमप्रयोजकमित्याशंक्यसाक्षात्सं
बंधाभावेपिपरंपरयासंबंधोस्तीत्याह सद्वस्तुनीति॥७८॥एवंसद्वाय्वोःसंबंधंप्रदर्श्यपतयोःधर्मतोभेदंज्ञा
पनायवायौप्रतीयमानान् धर्मानाह शोषस्पर्शाविति एवंस्विकान्धर्मानभिधायकारणतःप्राप्तांस्तान्ना

सद्वस्तुन्येकदेशस्थामायातत्रैकदेशगं वियत्तत्राप्येकदेशगतैर्वायुःप्रकल्पितः॥७८॥
शोषस्पर्शौगतिर्वेगोवायुधर्माइमेमता त्रयःस्वभावाःसन्मायाव्योम्नांयेवायुगाः॥७९॥
वायुरस्तीतिसद्भावःसतोवायौपृथक्कृते निस्तत्वरूपतामायास्वभावोव्योमगोध्वनिः॥८०॥

ह त्रयइति सन्मायाव्योम्नांयेत्रयःस्वभावाःशीलविशेषाधर्मास्तेपिवायुगावायौविद्यंत इत्यर्थः॥७९॥केते
धर्माइत्यतआह वायुरिति वायुरस्तीति व्यवहारहेतुसद्रूपत्वंसद्वस्तुनोधर्मएकःवायोःसद्वस्तुनोविवेचतेस
तियन्निस्तत्वरूपत्वंसमा याधर्मोद्वितीयःशब्दोव्योम्नःसकाशात्तआगतोधर्मस्तृतीय इत्यर्थः॥८०॥ग्रमा।

॥९२॥

ननु व्योमविवेचनप्रस्तावे वाय्वादिष्वनुवृत्तं सन्ततव्योमेति भेदधीरित्यत्र वाय्वादावाकाशानुवृत्तिर्निवारिता
इदानीं व्योमानुवृत्तिरप्यभिधीयते अतः पूर्वोत्तरविरोध इति शंक्यते सत इति व्योमानुवृत्तिरधुनोच्य
त इति शेषः ॥८१॥ पूर्वमवकाशलक्षणस्वरूपानुवृत्तिर्निवारिता इदानीं धर्मानुवृत्तिरेवाभिधीयते न

सतोऽनुवृत्तिः सर्वत्र व्योम्नो नेति पुरेरितं व्योमानुवृत्तिरधुना कथं न व्याहतं वचः ॥८१॥
छिद्रानुवृत्तिर्नेति पूर्वोक्तिरधुना त्वियं शब्दानुवृत्तिरेवोक्ता वचसो व्याहतिः कुतः ॥८२॥
ननु सद्वस्तुपार्थक्यादसत्त्वं चेत्तदा कथं अव्यक्तमायावैषम्यादमायामयता पिनो ॥८३॥
निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका साशक्ति कार्ययोस्तुल्याव्यक्ताव्यक्तत्वभेदिनोः ॥८४॥

स्वरूपानुवृत्तिरतो न व्याहतिरिति छिद्रेति ॥८२॥ ननु वायोः सद्रूपविलक्षणत्वादसत्त्वलक्षणमायामय
त्वं यद्युच्यते तर्ह्यव्यक्तस्वरूपमायावैलक्षण्यादमायामयत्वमपि किं न स्यादिति चोदयति नन्विति ॥८३॥
नाव्यक्तत्वं मायामयत्वे प्रयोजकं किं तु निस्तत्त्वरूपत्वं तच्च मायामिव वाय्वादावप्यस्तीति न मायामयत्व
हानिरिति परिहरति निस्तत्त्वेति ॥८४॥ राम राम राम ॥ राम राम ॥

ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायाम् अविशिष्टायां व्यक्ताव्यक्तत्वलक्षणो भेदः कुत इत्याशंक्य तद्विचारः प्रस्तुतानुपयुक्त इति परिहरति सदसत्त्वेति असतो मायातत्कार्यरूपस्यावांतरभेदो व्यक्ताव्यक्तत्वरूपा इत्यर्थः ॥८५॥ फलितमाह सद्वस्त्विति वायोयः सदंशस्तद्ब्रह्मरूपं शिष्टोंशो निस्तत्त्वरूपादिर्वायोः स्वरूपं स च वायुर्निस्तत्त्वरूपत्वादेव आकाशवन्मिथ्या इत्थं वायोर्मिथ्यात्वं चिरं वासयित्वा

सदसत्त्वविवेकस्य प्रस्तुतत्वात्स चिंत्यतां असतोवांतरो भेद आस्तां तच्चिंतयात्र किं ॥८५॥
सद्वस्तु ब्रह्म शिष्टोंशो वायुर्मिथ्या यथा वियत् वासयित्वा चिरं वायोर्मिथ्यात्वं मरुतं त्यजेत् ॥८६॥
चिंतयेद्वह्निमप्येवं मरुता न्यूनवर्त्तिनं ब्रह्मांडावरणेष्वेषां न्यूनाधिकविचारणा ॥८७॥

मरुतं त्यजेत् मरुत्सत्य इति बुद्धिं त्यजेदित्यर्थः ॥८६॥ वाय्वादावुक्तं विचारं तेजस्यप्यतिदिशति चिंतयेदिति ननु सद्वस्त्वेकदेशस्य मायात इत्यादिना सदादीनां न्यूनाधिकभाव उक्तः स लोकेन क्वापि दृष्ट
इत्याशंक्याह ब्रह्मांडेति ॥८७॥ रामरामरामरामरामरामराम ॥

विपदादीनां

वायोः कियतांशेनन्यूनोवह्निरित्यतआह वायोरिति तस्यवास्तत्वशंकांवारयति वायाविति नन्वयंन्यूनाधिभावः स्वक
लोपोलकल्पितइत्याशंक्याह पुराणोक्तमिति ॥८८॥ वह्नेः स्वरूपमाह वह्निरिति अत्रापिवायाविव कारणधर्मा
अनुगताइत्याह पूर्वेति केतेधर्माइत्याकांक्षामाह अस्तीति ॥८९॥ एवमग्नेःकारणधर्मानुगत्यनुवादपूर्व

वायोर्दशांशतोन्यूनोवह्निर्वायौप्रकल्पितः पुराणोक्तंतारतम्यंदशांशैर्भूतपंचके ॥८८॥
वह्निरुष्णप्रकाशात्मापूर्वानुगतिरत्रच अस्तिवह्निःसनिस्तत्वः शब्दवान्स्पर्शवानपि ॥८९॥
सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजोगुणः रूपंतत्रसतः सर्वमन्यद्बुद्ध्याविविच्यतां ॥९०॥
सतोविवेचितेवह्नौमिथ्यात्वेसतिवासिते अपांदशांशतोन्यूनाः कल्पिताइतिचिंतयेत् ॥९१॥

कं स्वकीयंधर्मंदर्शयति सन्मायेति इत्थंसविशेषणएववह्निस्वरूपंव्युत्पाद्येदानींसद्वस्तुनोवह्निंविविनक्ति तत्रेति
तत्रतेषुमध्येसतः सद्वस्तुनोन्यत्सर्वंधर्मजातंमिथ्येतिबुद्ध्याविविच्यतां पृथक्क्रियतामित्यर्थः ॥९० एवंव
ह्नेर्मिथ्यात्वनिश्चयानंतरमपांमिथ्यात्वंचिंतयेदित्याह ॥ सतइति ॥ ९१ ॥ रामरामरामरामरामरामरामराम

॥पंभवि॥

॥१२॥

अस्य विकारस्य धर्मान्स्वधर्मांश्च विभज्य दर्शयति संत्याप इति शब्देन सह वर्त्तत इति सशब्दः सशब्दश्चासौ स्प
र्शश्च सशब्दस्पर्शः स्तेन युक्ताः इत्यर्थः ॥२२॥ विवेकध्यानाभ्यामपां मिथ्यात्वं निश्चित्यानंतरं भूमेर्मिथ्यात्वं
चिंतनीयं इत्याह सत इति ॥२४॥ तस्यां मिथ्यात्वे चिंतनाय तद्धर्मानपि विभज्यते अस्ति भूरिति तेभ्यः सत्ताम
संत्यापोम्नः अन्यतत्वाः सशब्दस्पर्शसंयुताः रूपवंत्योन्यधर्मानुवत्यास्वीयो रसो गुणः ॥२३॥
सतो विवेचितास्वपत्नं मिथ्यात्वे च वासिते भूमिर्दर्शं शतोन्यनाकल्पिताश्चिति चिंतयेत् ॥२६
अस्ति भूस्तत्वमन्यांस्यां शब्दस्पर्शौस्त रूपको रसश्च परतो गंधो नैजस्तत्ताविविच्यतां ॥२७॥
एवंकृतायां सत्तायां भूमिर्मिथ्याव शिष्यते भूमेर्दर्शं तोन्यत्तं ब्रह्मांडं भूमिमध्यगं ॥२५॥
ब्रह्मांडमध्येतिष्ठंति भुवनानि चतुर्दश भुवनेषु वसंत्येषु प्राणिदेहा यथायथं ॥२६॥
ब्रह्मांडलोकदेहेभ्यः सद्वस्तुनि पृथक्कृते असतां ब्रह्मांडादीनां तत्त्वतन्नेषीहकाद्वेति ॥२७॥ रामरामा॥
तं पृथक्कर्त्तव्यमित्याह सत्तेति २४॥ सत्तापृथक्करणे फलमाह पूर्वमिति इदानीं भौतिकेभ्यः ब्रह्मांडादिभ्यः
सतो विवेचनाय तदवस्थानप्रकारं दर्शयति भूमेरिति ॥२५॥ तेषु सद्विवेचने फलमाह ब्रह्मांडेति ॥२६॥

॥१४॥

तद्ज्ञानेकादत्तिरित्युक्तमेवार्थंस्फुटीकरोति भूतेतिभूतानामाकाशादीनांभौतिकानांब्रह्मांडादीनांमायायाश्चतत्कारण
भूतायामिथ्यात्वेविवेकध्यानाभ्यांचित्तेदृढंवास्थितेसतिसद्वस्तुनोद्वैतत्वबुद्धिःकदाचिन्नविहन्यतइत्यर्थः२८
ननुभूतस्यादीनामसत्त्वेविदुषोव्यवहारलोपःप्रसज्येतेत्याशंक्यविवेकेनमिथ्यात्वनिश्चयेपिभूतस्यादेःस्वरूपोप
मर्दनाभावात् नव्यापारोलुप्यतेइत्याह सदद्वैतादिति॥२९॥ ननुसत्त्वस्याद्वैतरूपत्वेसांख्यादिभिर्विधीयमानस्यभे प्रपंचस्य

भूतभौतिकमायानामसत्त्वेत्यंतवासिते सद्वस्त्वद्वैतमित्येषाधीर्विपर्येतिनक्वचित्॥२८॥
सदद्वैतात्स्वप्नभूतेद्वैतेभूस्यादिरूपिणि तत्तदर्थक्रियालोकेयथादृष्टातथैवसा॥२९॥
सांख्यकाणादबौद्धाद्यैर्जगद्भेदोयथायथा उत्प्रेक्ष्यतेनेकयुक्त्याभवत्वेषःतथातथा॥१०॥
अवज्ञातंसदद्वैतंनिःशंकैरन्यवादिभिः एवंकाद्वत्तिरस्माकंतत्रद्वैतमवजानतां॥१०२॥

दस्यकुतोननिरासःक्रियतेइत्याशंक्यव्यावहारिकभेदस्यास्माभिरभ्युपगमत्वान्ननिरासायप्रयत्यतइतिश्लाह॥
प्रपंच सांख्येति॥१०॥ ननुप्रमाणसिद्धस्यसत्त्वभेदस्यावज्ञानुपपन्नेत्याशंक्याह अवज्ञातमिति यथान्यवादिभिःसां
ख्यादिभिःनिःशंकैःश्रुत्यादिसिद्धस्यापिसदद्वैतस्यावज्ञाक्रियते तथाश्रुतियुक्त्यनुभवावष्टंभेनास्माकं
तदीयद्वैतानादरेणकिंहीयतइत्यर्थः॥१०२॥ रामरामरामरामरामरामरामरामरामरामा॥

ननु निःप्रयोजनेयं द्वैतावज्ञेत्याशंक्य जीवन्मुक्तलक्षणप्रयोजनसद्भावान्मैवमित्याह द्वैतेति ॥१·२॥ न केवलं
जीवन्मुक्तिरेव प्रयोजनमपितु विदेहमुक्तिरपीत्यभिप्रायेणोक्तस्मवाक्यमुदाहरति एषेति ॥१·३॥ अंतका
लपदेन वर्त्तमानदेहपातोभिधीयत इत्याशंकां वारयितुं विवक्षितमर्थमाह सदद्वैतेति सद्रूपे द्वैतेऽन्यत्र

द्वैतावज्ञासुस्थिता चेदद्वैते धीः स्थिरा भवेत् स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते ॥१·२॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ॥१·३॥
सदद्वैतेनृते द्वैते यदन्योन्यैक्यवीक्षणं तस्यांतकालस्तद्भेदबुद्धिरेव न चेतरः ॥ १·४॥
यद्वांतकालः प्राणस्य वियोगस्तु प्रसिद्धितः तस्मिन्काले पि नभ्रांते गंतायाः पुनरागमः ॥१·५॥

रूपे द्वैते यदन्योन्याध्यासलक्षणमैक्यज्ञानमस्ति तस्यैक्यभ्रमस्यांतकालो नाम तयोरद्वैतयोः सत्यानृतरूपे
ण भेदबुद्धिरेव नापरो वर्त्तमानदेहपात इत्यर्थः ॥१·४॥ इदानीं लोकप्रसिद्धार्थस्वीकारेपि न दोष इत्यभिप्रा
येणाह यद्वेति ॥१·५॥ रामरामरामराम रामरामरामराम रामराम रामरामरामराम ॥ ॥ ॥ रामरामरामराम

उक्तमेवार्थं प्रपंचयति नीरोग इति ॥ ६२ ॥ ननु प्राणवियोगकाले मूर्छादिना ज्ञाननाशे भ्रांतिः स्यादेवेत्याशंक्य ज्ञान
नाशाभावे दृष्टांतमाह दिने इति यथा प्रत्यहमधीते वेदे स्वप्नसुप्त्योः प्राप्तयोरवस्थयोर्विस्मृतेपि परेद्युरनधीतवेदत्वं ना
स्ति तथांतकालेपि तत्त्वानुसंधानाभावेपि ज्ञाननाशाभाव इत्यर्थः ॥ ६३ ॥ ज्ञाननाशाभावमेवोपपादयति ।

नीरोग उपविष्टो वा रुग्णो वा विलुठन्भुवि मूर्छितो वा त्यजत्वेष प्राणान्भ्रांतिर्न सर्वथा ॥ ६२ ॥
दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेप्ययं परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति ॥ ६३ ॥
प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना न नश्यति न वेदांतात्प्रबलं मानमीक्ष्यते ॥ ६४ ॥
तस्माद्वेदांतसंसिद्धं सदद्वैतं न बाध्यते अंतकालेप्यतो भूतविवेकान्निर्वृतिः स्थिता ॥ ६५ ॥

प्रमाणेति ॥ ६४ ॥ उपपादितमर्थमुपसंहरति तस्मादिति ॥ ६५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभा
रतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता महाभूतविवेकस्य तात्पर्यदीपि
का समाप्ता ॥ = ॥ २ ॥ रामायनमः कृष्णायनमः ॥ श्रीगोविंदायनमः रामरामरामरामरामरामराम ॥ ॥ = ॥

२ भक्तविवेक॥पत्रे १६॥

॥४॥

29

ॐ श्रीगुरवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ मयाद्वैतविवेकस्य क्रियते पदयोजना ॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिपूरणायाभिलषितदेवतातत्वानुस्मरणलक्षणं मंगलमाचरन्नस्य वेदांतप्रकरणत्वाच्छास्त्रीयमेवानुबंधचतुष्टयं प्रसिद्धवत्कृत्य ग्रंथारंभं प्रतिजानीते ईश्वरेणेति ईश्वरेण कारणोपाधिकेनांतर्यामिणा जीवेनापि कार्योपाधिकेनाहंप्रत्ययिना च सृष्टमुत्पादितं द्वैतं जगद्विविच्यते विभज्य प्रदर्श्यते अस्य द्वैतविवेचनस्य काकदंतपरीक्षावन्निःप्रयोजनत्वं वारयति विवेक इति विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने कृते सति

ना

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते विवेके सति जीवेन हेयो बंधः स्फुटीभवेत् ॥१॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः ॥२॥

जीवेन पूर्वोक्तेन हेयः परित्याज्यो बंधो बंधहेतुर्द्वैतं स्फुटीभवेत् स्पष्टतां गच्छेत् एतावज्जीवेन हेयमिति निश्चीयत इत्यर्थः ॥१॥ ननु दृष्टिसृष्टिवादे जीवानामेव जगद्धेतुत्वं वादिनो वर्णयंतीत्यतः कथमीश्वरस्य स्रष्टृत्वमुच्यते जगत इत्याशंक्य बहुश्रुतिविरोधान्नेदं चोद्यमुत्थापयितुमर्हतीत्यभिप्रेत्य श्वेताश्वतरवाक्यं तावदर्थतः पठति ॥ मायां त्विति मायोपाधिकमीश्वरं प्रसिद्धं त्यास्मान्मायी सृजते विश्वमेतदिति तस्यैवेश्वरस्य जगत्स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयंतीत्यर्थः ॥२॥ रामरामरामरामरामरामरामरामराम ॥

पं
ध्या
दी
१९

ननु विदुषामपि वासनानिवृत्तये ध्यानं कर्तव्यमित्याशंक्य सम्यग्ज्ञानिनो वासनैव नास्तीत्याह । आत्मेति १४
भवत्वेवं प्रकृते किमायातमित्यत आ एवमिति ॥ कस्मात् इति सङ्ग इत्यत आह ॥ प्रसंग इति १५॥
एवं को दोष इत्यत आह ॥ विध्यभावादिति ॥ दार्ष्टान्तिके योजयति स्यात्कुत इति ॥ १६॥ बालस्य विध्यभा
वप्रयोजकमज्ञत्वमस्ति न विदुष इत्याशंक्य तस्याज्ञत्वाभावेपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह ॥

आत्मानं गतस्ततोन्यत्स्यादिंद्रजालं हि मायिकं इत्थं वेचल निर्णीते कुतो मनसि वासना १७ ॥
एवं नास्ति प्रसंगोपि कुतोस्यातिप्रसंजनं ॥ प्रसंगो यस्य तस्यैव शंक्येतातिप्रसंजनं ॥ १५॥
विध्यभावान्न बालस्य दृश्यतेतिप्रसंजनं ॥ स्यात्कुतोतिप्रसंगोस्य विध्यभावे समे सति १६॥
न किंचिद्वेत्ति बालश्चेत्सर्वं वेत्त्येव तत्त्ववित् अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः १७॥
शापानुग्रहसामर्थ्यं यस्यासौ तत्त्ववित्तत शापानुग्रहसामर्थ्यफलं स्यात्तपसो यतः ॥१८॥

न किंचिदिति । तर्हि विध्यधिकारः कस्येत्याशंक्य अल्पज्ञस्येति ॥१७॥ ननु व्यासादिवच्छापानुग्रहसा
मर्थ्यं यस्य स एव तत्त्वविन्नान्य इति शंकते शापानुग्रहेति परिहरति न तदिति ॥ तत्र हेतुमाह शापानुग्रहेति

१९

विधिशास्त्रस्याविद्वद्विषयत्वमेवदर्शयति वर्णाश्रमेति॥१००॥ ननुतत्वविदोपिदेहधारित्वेन वर्णाश्रमाद्यभिमा
नित्वमस्तीत्याशंक्याह वर्णाश्रमादय इति॥१०१॥ ननुतत्वविनिश्चयस्तावत्तिष्ठतुशंस्त्वंतुतस्यकर्तव्यंप्रति
पादयतीत्याशंक्यतदपितस्यकर्तव्याभावमेवबोधयतीत्याह॥ समाधिमिति योहृदयेनबुद्ध्याअस्तसर्वास्था
ना: परित्यक्ता: सर्वेअशेषाअस्थाआसक्तिविशेषा: यस्यसतथाविध: अतएवोत्तमाश्रयोभिप्रायोनिर्मलंत्ना

वर्णाश्रमवयोवस्थाभिमानोयस्यविद्यते तस्यैवंचनिषेधाश्चविधय:सकलाअपि॥१००॥
वर्णाश्रमादयोदेहेमाययापरिकल्पिता: नात्मनोबोधरूपस्यैत्येवंतस्यविनिश्चय:॥१०१॥
समाधिमथकर्माणिमाकरोतुकरोतुवा॥ हृदयेनास्तसर्वास्थोमुक्तात्मावोत्तमाशय:॥१०२॥
नैष्कर्म्येणनतस्यार्थोतस्यार्थोस्तिनकर्मभि:॥नसमाधानजप्याभ्यांयस्यनिर्वासनंमन:॥१०३॥

नंयस्यसतथोक्त: समुक्तएवातासमाधिमथकर्माणि इत्यन्वय:॥१०२॥ विदुष: कर्तव्यंनास्तीत्यत्रवचनांतर
मुदाहरति॥ नैष्कर्म्येणेति॥ नैष्कर्म्यंकर्मराहित्यंतेनकर्मत्यागेनेत्यर्थ: समाधानसमाधिजप्यंजप:॥५१३॥

पं.
ध्या
॥ ९५ ॥

सममात्मनीत्युक्तमर्थं विवृणोति निश्चित्येति ॥ १५ ॥ ननु तत्त्वविदप्युपासकवदात्मानुसंधानवशाज्जगदनुसंधा
नरहितो दृश्यते इत्याशंक्य सोऽनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह ॥ उपासक इवेति १६ ॥
ननु तत्त्वविदापि नित्यसिद्धये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते तत्तमे
व विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिशास्त्रसद्भावान्नमो
क्षाय ध्यानं कर्तव्यमित्याह ध्यानं त्विति १७ ॥ ननु तत्त्वविदो ध्यानानभ्युपगमे तस्य सदा बहिःप्रवृत्तिः स्यादित्या
निश्चित्य सकृदात्मानं यदापेक्षा तदैव तं वक्तुं मंतुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववित् १८ ॥ उपासक इव ध्यायं
लौकिकं विस्मरेद्यदि विस्मरत्वेव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ॥ १९ ॥ ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्ति
सिद्धितः ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिंडिमः ॥ २० ॥ तत्त्वविद्यदि न ध्यायेत्प्रवर्तेत तदा बहिः प्रवर्ततां
सुखेनायं को बाधोऽस्य प्रवर्तने ॥ २१ ॥ अतिप्रसंग इति चेत्प्रसंगं तावदीरय प्रसंगो विधिशास्त्रं चेन्न तत्तत्त्ववि
शंकाबाधकत्वात्प्रवृत्तिः साभ्युपेयत इत्याह तत्त्वविद्यदीति ॥ २२ ॥ ननु बहिःप्रवृत्त्यभ्युपगमेऽतिप्रसंगः स्या
दित्याशंक्य अतिप्रसंगस्य दुर्निरूप्यत्वान्मैवमिति हरन्ति अतिप्रसंग इति ॥ न प्रसंगो दुर्निरूपो विधिशास्त्र
प्रसंगः शास्त्रे न विवक्षितत्वादिति चेत्तस्य ज्ञानिविषयत्वेन तत्त्वज्ञानिविषयत्वाभावादित्याह ॥ प्रसंग इति

कानि तानि व्यवहारसाधनानि इत्यत आह मनोवागिति ॥ तथा बाह्यापदार्था गृहदेशादयस्तान् मन आदीं स्तत्त्वज्ञा
नी न विचारयति । अतोऽस्य ज्ञानिनो व्यवहारः कुतो न भवति भवत्येवेत्यर्थः ॥ २० ॥ ननु विषयानुपमर्दनेऽपि
तत्त्वविच्चित्तोपमर्दनं कार्यमित्याशंक्याह ॥ तथा करणे तत्त्वविदेव न स्यादित्याह ॥ उपमृद्नाति ॥ ननु तत्त्व
विदा चित्तेनोपमर्द्य घट इत्येतज्ज्ञेयं दृष्टमित्याशंक्याह ॥ न बुद्धिमिति घटतत्त्वस्य वेदिता ज्ञाता बुद्धिं मर्दन्नी उपमृद्नन्न का
गं कुर्वन्नुरूपेणा न दृष्टो नोपलब्ध इत्यर्थः ॥ २१ ॥ ननु घटस्य स्थूलत्वेन स्पष्टत्वात्तद्दर्शने चित्तपीडनं नापेक्षते ॥
मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान् तत्त्वविन्नोपमृद्नाति व्यवहारोऽस्य नो कुतः ॥ २० ॥ उपमृद्नाति चित्तं
चेद्ध्यातासौ न तु तत्त्ववित् न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता ॥ २१ ॥ सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा
स्वप्रकाशोऽयमात्मा किं घटवच्च न भासते ॥ २२ ॥ स्वप्रकाशतया किं ते तत्त्वबुद्धिस्तत्त्ववेदनं बुद्धिश्च क्षणनाश्येति
चोद्यं तुल्यं घटादिषु ॥ २३ ॥ घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः दृष्टो नेतुं तदा शक्य इति चेत्सममात्मनि ॥ २४ ॥
वृत्तेः क्षणिकत्व तथात्वात्तज्ज्ञाने तदपेक्षत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादपि स्पष्टतरत्वाच्चित्तनिरोधनं ने
नापेक्षत इत्याह ॥ सकृदिति ॥ २२ ननु ब्रह्मणः स्वप्रकाशत्वेऽपि तज्ज्ञानावरणाय बुद्धिवृत्तेरेव तत्त्वज्ञानत्वात्त
स्याश्च क्षणिकत्वेन ब्रह्मणोऽपि पुनरवस्थानमपेक्षत इत्याशंक्येदं चोद्यं घटादिष्वपि समानमित्याह
स्यापि समानमित्याह ॥ घटादाविति ॥ २४ ॥

ध्या॰
९४॥ ननु प्रारब्धकर्मवशाद्विषयाननुभवतः कथं नैरंतर्येण भावनासिद्धिरित्याशंक्यास्यातिप्राये सति विषयव्यसने व भा
वनासिद्धिः स्यादित्याह ॥ भुंजान इति ॥ ८३ ॥ दृष्टांतं विवृणोति ॥ परेति ॥ ८४ ॥ परसंगास्वादने गृहकृत्यविच्छेदः
स्यादित्याशंक्याह ॥ परसंगमिति ॥ ८५ ॥ आपाततैनैव वर्तते इत्युक्तमर्थं विवृणोति गृहकृत्येति ८६ ॥ दार्ष्टा
भुंजानोपि निजारब्धमास्थातिशयतोऽनिशं ॥ ध्यातृं शक्तोन संदेहो विषयं व्यसनी यथा ॥ ८३ परव्यसनि
नी नारी व्यग्रापि गृहकर्मणि ॥ तदेवास्वादयत्यंतः परसंगरसायनं ॥ ८४ ॥ परसंगं स्वादयंत्या अपि नो गृहक
र्म तत् कुंठीभवेदपि त्वेतदापातेनैव वर्तते ॥ ८५ ॥ गृहकृत्यव्यसनिनी यथा सम्यक् करोति तत् परव्य
सनिनी तद्वन्न करोत्येव सर्वथा ॥ ८६ ॥ एवं ध्यानैकनिष्ठोपि लेशाल्लौकिकमाचरेत् तत्त्ववित्त्वविरोधि
त्वाल्लौकिकं सम्यगाचरेत् ८७ ॥ मायामयः प्रपंचोयमात्मा चैतन्यरूपधृक् इति बोधे विरोधः को लौ
किकव्यवहारिणः ॥ ८८ ॥ अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तुतां नाप्यात्मजाड्यं किं त्वेषा साधनान्येव कांक्षति
ति के योजयति एवमिति ननु तत्त्वविदपि लौकिकव्यवहारं किं लेशेनाचरति किं वा सम्यगिति विषयव्यवहा
रस्य तत्त्वज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह तत्त्वविदिति ॥ ८७ ॥ अविरुद्धत्वमेव दर्शयति ॥ मायामय इति

उपासकस्य तद्रूपत्वाभिमानमुदाहरणप्रदर्शनेन स्पष्टीकरोति ब्रह्मचारीति॥ कश्चित्संवर्गत्वगुणविशिष्टप्राणो-
पासको ब्रह्मचारी भिक्षार्थमागत्याभिप्रतारिनाम्नो राज्ञः पुरतो महात्मानश्चतुरो देव एकः कः सोजगा-
र भुवनस्य गोप्ता तं कापेय नाभिपश्यंति मर्त्याः अभिप्रतारिन्बहुधा वसंतमिति मंत्रेण स्वात्मनः संवर्गरूप
त्वं चित्ते धृत्वा प्रकटीकृतवानिति छांदोग्ये श्रूयते इत्यर्थः ७८। आमृतिधारणे निमित्तं दर्शयन्नन्निच्छायं ननि
ब्रह्मचारी भिक्षमाणो युतः संवर्गविद्यया॥ संवर्गरूपतां चित्ते धारयित्वाह्यभिक्षत॥ ७९॥ ॥
पुरुषस्येच्छया कर्त्तुमकर्त्तुं कर्त्तुमन्यथा॥ शक्योपास्तिरतो नित्यं कुर्यात्सत्यपसंततिः ८०
वेदाध्यायी ह्यप्रमत्तोऽधीते स्वप्नेऽपि वासितः॥ जपिता तज्जपत्येव तथा ध्याऽपि वासयेत्॥ ८१॥
विरोधिप्रत्ययं त्यक्त्वा नैरंतर्येण भावयन्॥ लभते वासनावेशात्स्वप्नादावपि भावना ८२॥
वर्त्तयेदित्युक्तो हेतुः धा है लक्षणमाह॥ पुरुषस्येति उपास्तिः पुरुषस्योपासकस्येच्छया कर्त्तुमकर्त्तुमन्यथा वा
प्रकारांतरेण कर्त्तुं शक्या अतः पुरुषस्येच्छाधीनत्वादुपासनं सर्वदा कुर्यादित्यर्थः॥ ८०॥ एवं सर्वदा चिंतनेन
किं भवतीत्यत आह॥ वेदेति। अप्रमत्तो वेदाध्यायी सदाध्ययनशीलः जपिता सदा जपशीलो वा वासितः ८१।

वैलक्षण्यांतरसिद्धये बोधस्य हेतुत्वादिकं दर्शयति ।। विचाराज्जायते बोध इत्यादिश्लोकद्वयेन ।। विचाराद्धस्तत
त्त्वविचाराद्बोधो जायते किं विचारबलात् जायमानं यं बोधमनिच्छावो धीमान् भ इत्येवं रूपानि निवर्तयेन्न नि
वारयेत् उत्पद्यमानश्च बोधः स्वजन्ममात्रात्संसारेऽखिलप्रपंचस्य सत्यतां दहति नाशयति ।।१५।। तावता
विचाराज्जायते बोधोऽनिच्छायं न निवर्तयेत् ।। स्वोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां ।।१५।।
तावता कृतकृत्यः स नित्यतृप्तिमुपागतः ।। जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ।।१६।।
आप्तोपदेशं विश्वस्य श्रद्धावान् विचारयन् चिंतयेत्प्रत्ययैरन्यैरनंतरितवृत्तिभिः ।।१७।। ल
यावद्ब्रह्मत्वस्वरूपत्वाभिमानः स्वस्य जायते ।। तावद्विचिंत्य पश्चाच्च तथैवामृति धारयेत् ।।१८।।
तत्त्वज्ञानोत्पत्तिमात्रेण निरतिशयं सुखं प्राप्नोतीत्यर्थः ।।१६।। उपासनायाश्च बोधाद्वैलक्षण्यांतरसि
द्धये तद्दर्शयति आप्तेति ।। आप्तस्य गुरोरुपदेशमुपास्य स्वरूपप्रतिपादिकं वाक्यादिजातं विश्वस्य विश्वासं
कृत्वा विचारयन्नुपास्य तत्त्वं प्रत्ययैरन्यैर्घटादिविषयैरनंतरितवृत्तिभिरव्यवहितवृत्तिभिश्चिंतयेदिति

हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तीनामनभिधानादिदं निर्गुणोपासनमेवेति चेन्न हि न विरोध इत्याह । हि
हिरण्येति । हिरण्यश्मश्रुः सर्वादिमूर्तीनां हिरण्मयाणि श्मश्रूणि यस्यासौ हिरण्यश्मश्रुः तथाविधः स
र्यः सर्वादिर्येषां ते हिरण्यश्मश्र्वादयः तेषां मूर्तयो हिरण्यश्मश्र्वादिमूर्तयस्तासां विग्रहः ॥ २१ ॥ नन्वा
नंदादीनामस्थूलादीनां उपास्यतत्त्वेऽन्तःप्रवेशाभावात् न गुणविशिष्टत्वेन कथमुपास्यमित्याशंक्य तेषां तत्त्वं

हिरण्यश्मश्रुत्वादिमूर्तीनामनुदाहृतेः ॥ अविरुद्धं निर्गुणत्वमिति चेन्नुच्यतां त्वया ॥ २१ ॥
गुणानां लक्षकत्वेन न तत्त्वेऽन्तःप्रवेशनं ॥ इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यतां ॥ २२ ॥
आनंदादिभिरस्थूलादिभिश्चा... त्मात्र लक्षितः ॥ अखंडैकरसः सोऽहमस्मीत्येवमुपासते २३
बोधोपास्त्योर्विशेषः क इति चेदुच्यते शृणु ॥ वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनं ॥ २४ ॥

तःप्रवेशाभावेऽपि तेषां लक्षकत्वसंभवात् नैर्लेह्यितं ब्रह्मोपास्यमित्याह ॥ गुणानामिति ॥ २२ ॥ यथोपासनप्रका
रमेव दर्शयति ॥ आनंदादिभिरिति ॥ अत्रास्मच्छ्रुतिषु योऽखंडैकरस आत्मा आनंदादिभिरस्थूलादिभिश्च गुणैर्लक्षित
सोऽहमस्मीति एवमुपासते मुमुक्षव इति शेषः ॥ २३ ॥ नन्वेवं सति विद्योपासनयोः कुतो भेद इत्याशंक्य वस्तुतंत्रत्व

पं
धा
२२

म

षेधा स्थूलमनण्वह्रस्वमदीर्घमपत्तददेश्यमग्राह्यमगोत्रमवर्णमशब्दमस्पर्शमरूपमव्ययमित्यादयो नि
षेधगुणास्तत्र तत्र श्रुतास्तेषामुपसंहारोऽक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं
मित्यस्मिन्नधिकरणे भणितमित्याह ॥ स्थूलादेरिति अक्षरे बृहदारण्यकोक्तास्थूलत्वादिप्रपंचनि
षेधधियामाथर्वणोक्ताऽद्रेश्यत्वादितदुक्तीनां च उपसंहारः कर्तव्यः कुतः द्वैतनिषेधस्योभयत्र समा
अस्थूलादेर्निषेधस्य गुणसंघस्य संहृतिः ॥ तथा व्यासेन सूत्रेऽस्मिन्नुक्तादक्षरधियां त्विति हेतो ॥
निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः ॥ न युज्यते तत्रूपालंभो व्यासं प्रत्येवमांतन ॥ ॥२०॥
नत्वात् तस्मात्तरस्य ब्रह्मणः उभयत्र सद्भावाच्च ॥ यथा याजुर्वैदिकोपनिषद्यंगामंत्राणां सामवेदेस्थि
पित्र तानामध्येर्गुणसंबंधः जैमिनिनाप्युक्तं ॥ याजुर्वैदिके प्राधान्येनाम्नातानां सर्वेषां याजुर्वैदिकस्वरेण
सामवेदस्वर उपदेश इत्यर्थः ॥ ननु निर्गुणब्रह्मतत्त्वविद्यायां न गुणोपसंहारो युज्यते निर्गुणवि
द्यात्वविरोधादित्याशंक्य सूत्रकारेणैवमभिहितस्योपसंहारस्यास्माभिरभिधीयमानत्वान्नास्मा
स्वतीदं चोद्यमुचितमित्याह ॥ निर्गुणब्रह्मतत्त्वस्येति ॥२०॥

ब्रह्मणो सिद्धस्यानुष्ठानाभावे नापरित्याज्यत्वे दृष्टांतमाह ॥ इतोपीति ॥ अयमभिप्रायः यथा सगुणोपासने
भ्यः कालांतरभाविभाविफलेभ्यो वश्यादिकारिमंत्रेभ्य ऐहिकफलप्रदत्वमतिशयं बुद्ध्वा मूढानां तन्मंत्रज
पादौ प्रवृत्तावपि विवेकिभिः सगुणोपासनं न परित्यज्यते तथा वाग्नियमानुष्ठानापेक्षेभ्यस्तेभ्यो
पि मंत्रेभ्यः कृष्यादावतिप्राबल्यं नियमनैरपेक्ष्यं मत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मंत्रानुष्ठानं त्यज्य
ते तथा सांसारिकफलेप्सूनां निर्गुणोपासनानुष्ठानाभावेपि न मुमुक्षुभिर्निर्गुणोपासनं त्यज्यत इति ॥६६॥
इतोप्यतिप्राबल्यं मत्वा मंत्रान्वश्यादिकारिणः । मूढा जपंतु तेभ्योतिमूढाः कृषिमुपासतां ॥६६॥
तिष्ठंतु मूढाः प्रकृतानिर्गुणोपास्तिरीर्यते । विद्यैक्यात्सर्वशाखास्थानुगुणानत्रोपसंहरेत् ॥६७॥
आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः । आनंदादय इत्यस्मिन्सूत्रे व्यासेन वर्णिता ॥६८॥
वं प्रासंगिकं समाप्य प्रकृतमनुसरति । तिष्ठंत्विति सर्ववेदांतप्रत्ययं चोदनाद्यविशेषादिति न्यायेन निर्गुणोपा
नस्यैकत्वात्सर्वशाखास्थान् श्रुतानुपास्यगुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह विद्यैक्यादिति ॥६७॥
ते च गुणाः द्विप्रकाराः विधेयाः निषेध्याश्चेति तत्रानंदो ब्रह्म विज्ञानमानंदं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो
निरंजनो विभुरद्वयानंदः परः प्रत्यगेकरस इत्याद्यो विधेयं गुणास्तेषामुपसंहार आनंदादयः प्रधानस्येत्य
त्रोक्तः ... ब्रह्मपरासु श्रुतिषु आनंदादिस्वरूपत्वविज्ञानघनत्वापरिच्छिन्नत्वाद्वितीयत्वाद्यो धर्मा [illegible] के चित्क्वचि
त्सर्वं पदे प्रायेण ब्रूमः प्रधानस्य ब्रह्मण आनंदादयः [illegible] सर्वे उपसंहर्तव्याः वेद्यैक्येन विद्यै क्यादिति पर्वसूत्रे

देहस्मृतिबुधस्तेनादित्युक्तमर्थं विवृणोति ॥ उत्तरस्मिन्निति ॥ तापनीयोपनिषदि तावद्देवा ह वै प्रजापतिम
ब्रुवन्नणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेत्यादिना प्रश्नेन बहुधा निर्गुणोपासनमभिधीय
ते शैब्यप्रश्ने प्रश्नोपनिषदि पंचमे प्रश्ने यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्या
यीतेति काठके कठवल्ल्यां सर्वे वेदा यत्पदमामनन्तीत्युपक्रम्य एतद्ध्येवाक्षरं ब्रह्म एतदालंबनं श्रेष्ठमित्या
दिना प्रणवोपासनमुच्यते माण्डूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वमित्यादिना ऽवस्थात्रयातीतत

उत्तरस्मिंस्तापनीये शैब्यप्रश्ने ऽपि काठके ॥ माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥ ६३ ॥
अनुष्ठानप्रकारो ऽस्याः पंचीकरण ईरितः ॥ ज्ञानसाधनमेतत्स्यान्नेति केनात्र वारितं ॥ ६४ ॥
नानुतिष्ठति को ऽप्येतदिति चेन्मानुतिष्ठतु ॥ पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यति ॥ ६५ ॥

रीयोपासनमेवाभिधीयत इत्यर्थः आदिशब्देन तैत्तिरीयकमुंडकादयो गृह्यंते ॥ ६३ ॥ ननु निर्गुणोपासनेक
थमनुष्ठेयमित्यत आह ॥ अनुष्ठानेति ननु तदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशंक्य ब्रह्मतत्
त्वोपासनापि मुच्यते इति वदतामस्माकमनुकूलमित्याह ॥ ६४ ॥ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न

उपास्यत्ववद्वेद्यत्वस्यापि तन्निषेधः समान इत्याह विदितादिति अन्यदेव तद्विदितादथो अविदितादधीति
ब्रह्मणो वेद्यत्वमपि निवारयतीत्यर्थः विदिताज्ज्ञातादित्यर्थः विदिताभ्यामन्यत्र्हले तिश्रुतिप्रतिपादयती
ति चेत्तर्हि तस्यैव तज्ज्ञानीयादित्याशंक्योपास्ये नैव तत्समानमित्याह ॥ यथेति ॥६०॥ ननु वेद्यत्वं ब्रह्मणो
वास्तवेन भवतीत्याशंक्योपास्यत्वमपि तथेत्याह अवास्तवीति ननु वेदन प्रद्योव तेर्ब्रह्माकारत्वमस्तिनो
विदितादन्यदेवेति श्रुतेर्वेद्यत्वमस्मन ॥ यथा श्रुत्यैव वेद्यत्वे तथा श्रुत्या ह्युपास्यतां ॥ = ॥६०॥
अवास्तवी वेद्यताचेदुपास्यत्वं तथा न किं वृत्तिव्याप्तिर्वेद्यता चेदुपास्यत्वेपि तत्समं = ॥६१॥
कातेभक्तिः स्यापास्तौ चेत्क स्तेद्वेषस्तदीरय ॥ मानाभावो न वाच्योऽस्यां बहुश्रुतिषु दर्शनात् ॥६२॥
पास्यत्व इत्याशंक्य प्राद्ववलादाकारत्वमुभयत्र समानमित्याह ॥ वृत्तिव्याप्तिरिति ॥६१॥ एवं तर्ह्यन्य उपा
लंभस्तत्त्वस्य द्वेपि समान इत्याह कातेभक्तिरिति ॥ ननु निर्गुणोपासने प्रमाणं नास्तीत्याशंक्यानेक श्रुति
षु उपलभ्यमानत्वान्नैवमित्याह मानाभाव इति ॥६२॥ रामायनमः रामायनमः

नन्नु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वान्न ह्युपासनं न घटते इत्याशंक्योपासनस्य प्रत्ययावृत्तिरूपत्वात्सगुणब्रह्मणी
व निर्गुणेऽपि तत्संभवतीत्याह ॥ निर्गुणेति ॥ ९ ॥ ननु निर्गुणस्य ब्रह्मणो वाङ्मनसगोचरत्वाभावान्नोपास्यत्वमि
त्याशंक्य वेदनपदेऽप्ययं दोषः समान इत्याह ॥ अवाङ्मनसेति ॥ १० ॥ ननु ब्रह्मावाङ्मनसगोचरमित्येवं ज्ञातुं
शक्यं वेद्यत्वे मित्याशंक्यैवोपासितुमपि शक्यमित्याह ॥ वागाद्येति ॥ ११ ॥ ब्रह्मण उपास्यत्वे सगुणत्वप्रस
ज्येतेत्याशंक्य वेद्यत्वेऽपि तत्सगुणत्वं स्यादित्याह ॥ सगुणत्वमिति ॥ तत्सगुणत्वमित्यर्थः ननु लक्षणावृत्त्या

निर्गुणब्रह्मतत्त्वस्य न ह्युपास्तेरसंभवः ॥ सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ॥ ९ ॥ अवाङ्मनसगम्यं तन्नो
पास्यमिति चेत्तदा ॥ अवाङ्मनसगम्यस्य वेदनं च न संभवेत् ॥ १० ॥ वागाद्यगोचराकारमित्येवं यदि वेत्त्यसौ ॥ वा
गाद्यगोचराकारमित्युपासीत नो कुतः ॥ ११ ॥ सगुणत्वमुपास्यत्वाद्यदि वेद्यत्वतोऽपि तत् । वेद्यं चेल्लक्षणावृ
त्त्या लक्षितं समुपास्यताम् ॥ १२ ॥ ब्रह्म विद्धि तदेव त्वं न त्विदं यदुपासते इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि ॥ १३ ॥

श्रयणान्न वेद्यत्वे सगुणत्वप्रसंग इत्याशंक्योपासनमपि तथैव क्रियतामित्याह ॥ वेद्यं चेदिति ॥ १२ ॥ ननु ब्रह्मण उपा
स्यत्वं श्रुत्या निषिध्यत इति यद्ब्रह्मेति यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रु
तिरुपास्यस्य ब्रह्मत्वं निषेधयतीत्यर्थः ॥ त्वं पदवाङ्मनसगम्यं तदेव ब्रह्म विद्धीदमिति यदुपासते पुरुषास्तन्न विद्धि

पं.: ध्या = १० ज्ञानपदे वमे शं.क.ते

१०

नकुर्वीत तस्य कदाचिदपि मुक्तिर्न स्यादित्याशंक्याह ॥ वेदांतेति ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धस
त्वास्ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मा
प्रविशंति परं पदमित्यादिशास्त्राद्ब्रह्मलोकप्राप्त्यनंतरं तत्वसाक्षात्कारेण ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः
॥ ५१ ॥ एवं तत्वविचारे क्रियमाणे प्रतिबंधवशाद्यदि साक्षात्कारो न जायेत इत्यभिधाय तीव्रपापिनां तु सोऽपि विचा
रो दुर्लभ इत्याह ॥ केषांचिदिति ॥ तत्र प्रमाणमाह ॥ श्रवणायेति ॥ यः परमात्मा बहुभिः पुरुषैः श्रवणायापि श्रोतु
वेदांतविज्ञानसुनिश्चितार्थाः इति शास्त्रतः ब्रह्मलोके सकल्पांते ब्रह्मणा सह मुच्यते ॥ ५२ ॥
केषांचित्स विचारोऽपि कर्मणा प्रतिबध्यते ॥ श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः ॥ ५३ ॥
अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशं ॥ ५४ ॥
मपि न लभ्यः दुर्लभ इत्यर्थः ॥ ५३ ॥ एतावता सति प्रतिबंधे तत्वसाक्षात्कारस्तत्साधनभूतो विचारश्च न संभवती
त्यभिधायेदानीं विचारासमर्थेन मुमुक्षुणा पुरुषार्थार्थिना किं कर्तव्यमित्यपेक्षायां विचारासमर्थस्य तदुपास
नोरितिपत प्राक् प्रतिज्ञातं तदुपपादयति ॥ अत्यंतेति ॥ सामग्र्यसंभवो नाम तत्वोपदेष्टुर्गुरोरध्यात्मशास्त्रस्य दे
शकालादेर्वाऽसंभवस्तस्मादित्यर्थः ॥ ५४ ॥ ग्गमममममममम ममममममम ममममम ॥

पक्षांतरमाह ॥ अथवेति ॥ निस्पृहः स्वयमतिविरक्तो वृद्धतत्त्वविचारादेव धीमतामात्मतत्त्वनिश्चयविचारवतां
योगिनां चित्तैकाग्र्यवतां कुले भवति जायत इत्यर्थः ॥ पूर्वस्मात्पक्षात्कोऽतिशय इत्यत आह ॥ एतद्धीति ॥ हि यस्मा
त्कारणात्तद्योगिकुले जन्म दुर्लभम् अल्पपुण्येनालभ्यमित्यर्थः ॥ ४२ ॥ तस्य दुर्लभत्वमुपपादयति ॥ तत्रे
तमिति हि यस्मात्कारणात्तत्र तस्मिन् जन्मनि पौर्वदेहिकं पूर्वदेहभवं तं बुद्धिसंयोगं तत्त्वविचारगोचरबुद्धिसंबं

अथवा योगिनामेव कुले भवति धीमतां ॥ निस्पृहो वृद्धतत्त्वस्य विचारात्तद्धि दुर्लभं ॥ ४२ ॥
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ॥ यतते च ततो भूयस्तस्मादेतद्धि दुर्लभं ॥ ४३ ॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिं ॥ ४४ ॥
वृद्धलोकाभिवांछायां स्वस्य कुत्सितां निरुध्य तां विचारयेद्य आत्मानं तत्त्वसाक्षात्कारोऽस्य येन ॥ ४५

धं शीघ्रं लभते प्राप्नोति न केवलं बुद्धिसंबंधमात्रलाभः किं तु ततः पूर्वस्मात्प्रयत्नाद्भूयो यतते चाधिकं प्रयत्नं क
रोति तस्मादेतज्जन्म दुर्लभमित्यर्थः ॥ ४३ ॥ अभ्यासो कारणमाह ॥ पूर्वेति संयोगभ्रष्टस्तेन पूर्वाभ्यासेनैवाव
शोऽस्वाधीनोऽपि ह्रियत आकृष्यते एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्त्वज्ञानसंपन्नस्ततस्तस्मात्त

प्रतिवंधस्यनिवर्त्तने उचितैर्योगैस्तस्मिन्प्रतिवंधेक्षयंनीतेसतितद्विनाशेसत्यतः प्रतिवंधापगमादेवस्वस्यप्रत्य
गात्मनोब्रह्मत्वंप्राप्नोतीत्यर्थः ॥४४॥ इदानींभावीप्रतिवंधं दर्शयति ॥ आगामीति ॥ आगामीप्रतिवंधोजन्मां
तरहेतुकर्मशेषविशेषइत्यर्थः तस्यचभोगमंतरेणनिवृत्त्यभावात्तन्निवृत्तौकालनियमोनास्तीत्याह। एकेने
ति ॥ सचएकेनजन्मनाक्षीणोवामदेवस्येति। शेषः भरतस्यत्रिजन्मभिः क्षीण इत्यनुषज्यते। नन्वेकेनजन्मना
त्रिजन्मभिरितिनियतकालत्वंभवतैवोच्यतइत्याशंक्याह ॥ योगेति योगभ्रष्टस्तत्त्वसाक्षात्कारपर्यंतविचार

आगामीप्रतिवंधश्चवामदेवेसमीरितः ॥ एकेनजन्मनाक्षीणोभरतस्यत्रिजन्मभिः ॥४५॥
योगभ्रष्टस्यगीतायामतीतेवहुजन्मनि ॥ प्रतिवंधक्षयः प्रोक्तोनविचारोप्यनर्थकः ॥ ४६॥
प्राप्यपुण्यकृतांलोकानात्मतत्वविचारतः ॥ शुचीनांश्रीमतांगेहेसाभिलाषोभिजायते ॥४७॥

रहितइत्यर्थः तर्हितत्वविचारोनिष्फलः स्यादित्याशंक्याह ॥ नविचारोपीति ॥ प्रतिवंधनिवृत्त्यनंतरमेवापरोक्ष
ज्ञानलक्षणफलस्यसद्भावादितिभावः ॥४६॥ गीतायांप्रतिपादितमर्थंदर्शयति ॥ प्राप्येति प्राप्यपुण्यकृतामि
त्यादिनाततोयातिपरांगतिमित्यंतेन ॥ योगभ्रष्टआत्मतत्वविचारवलादेवपुण्यकृतांपुण्यकारिणांलोकान्स्वर्गा
विशेषान्प्राप्यतत्रवहुकालंसुखमनुभूयतद्भोगावसानेसाभि

॥ पं॰ कौ॰ ॥
दी॰
॥ १६ ॥

ननु जडाया अस्या जगन्निर्मायकत्वं न युज्यत इत्याशंक्याह चिच्छायेति सा शक्तिश्चिच्छायावेशात्तच्चिदाभासप्रवे
शाच्चेतनेव विवेचनत्वं मापन्नेव विभाति प्रतीयते अतोऽस्या निर्मायकत्वं घटत इति भावः अस्त्वेवं तर्हि किं माया
तमित्याह तच्छक्तीति सा चासौ शक्तिश्चेति कर्मधारयः सैवोपाधिस्तेन संयोगः संबंधस्तस्माद्ब्रह्मैव सत्यादि
लक्षणमीश्वरतां सर्वज्ञत्वादिधर्मयोगितां व्रजेत्प्राप्नुयात् ॥४०॥ जीवत्वोपाधिभूतानां कोशानां प्रागेवाभिहि
तत्वात्तन्निमित्तकं जीवत्वमिदानीमाह कोशोपाधीति कोशा एव उपाधिः कोशोपाधिस्तद्विवक्षायां पर्याये

चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा तच्छक्त्युपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत् ॥४०॥ कोशो
पाधिविवक्षायां याति ब्रह्मैव जीवतां पिता पितामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥४१॥ रामराम

लोचनायां क्रियमाणायां ब्रह्मैव सत्यादिलक्षणमेव जीवतां जीवव्यवहारविषयतां गच्छति नन्वेकस्यैव विरुद्ध
प धर्मद्वययोगित्वं युगपन्न क्वापि दृष्टचरमित्याशंक्याह पितेति यथैक एव देवदत्त एकं स्वपुत्रं प्रति पिता भव
ति पौत्रं प्रति तु पितामह एवं ब्रह्मापि कोशोपाधिविवक्षायां जीवो भवति शक्त्युपाधिविवक्षायामीश्वरश्च
भवतीत्यर्थः ॥४१॥ रामराम रामराम रामराम ॥ रामराम रामराम

॥ १६ ॥

नियम्या नाम्ना ३८

किंतदुपाधिरूपमित्याकांक्षायां तदुभयं क्रमेण दिदर्शयिषुरादावीश्वरोपाधिभूतां शक्तिं निरूपयति शक्तिरिति ऐश्वरी ईश्वरोपाधितयेश्वरसंबंधिनी काचित्सदसत्त्वादिभिरूपैर्निर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषां अंतर्यामिब्राह्मणोक्तानां पृथिव्यादीनां वस्तूनां नियमनकर्त्री शक्तिरस्ति सा कुत्र तिष्ठति कुतो वा नोपलभ्यते इत्याशंक्याह आनंदेति आनंदमयादिषु ब्रह्मांडांतेषु सर्वेषु वस्तुषु गूढा वर्त्तते नैवोपलभ्यते इत्यर्थः ॥३९॥ नियमेनानुपलभ्यमा

शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका आनंदमयमारभ्य गूढा सर्वेषु वस्तुषु ॥ ३८॥

वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा अन्योन्यधर्मसांकर्याद्विप्लवेत जगत्खलु ३९॥

नायाः तस्याः असत्त्वमेव किं न स्यादित्याशंक्य जगन्नियमनान्यथानुपपत्त्या सावश्यमभ्युपेयेत्याह वस्तुधर्मेति वस्तूनां पृथिव्यादीनां धर्माः काठिन्यद्रवत्वादयो यदा शक्त्या न व्यवस्थाप्यंते तदा तेषां धर्माणां सांकर्याद्विमिश्रणेनैकत्रावस्थानाज्जगद्विप्लवेत अनियतव्यवहारविषयतां प्राप्नुयायादित्यर्थः ; खल्विति प्रसिद्धं द्योतयति ॥=॥३९॥=॥ ॐ नमः गणपतये ॥ रामरामराम रामरामराम रामरामरामराम ॥ रामराम ॥

ननु तत्रोपासनाविचाराभावात्तदनुष्ठानं न संभवेदित्याशंक्याह ॥ उपासीनानिति ॥ आर्षग्रंथेषु वाल्मवासि
ष्ठादिमंत्रकल्पेषूपासनानुष्ठानप्रकारो वर्णितः ततो विचारासमर्था मनुष्याः कल्पेषूक्तं तत्तदुपासनं गुरुमुखाद
वगत्यानुतिष्ठंतीत्यर्थः ॥ १८ ॥ ननु तर्हि इदानीं तनैरपि ग्रंथकर्तृभिः वेदवाक्यविचारः कुतः क्रियते इत्याशं
क्य स्वबुद्धिपरितोषायैव क्रियते नानुष्ठानसिद्धय इत्याह ॥ वेदेति ॥ १९ ॥ ननु ब्रह्मोपासनवद्ब्रह्मसाक्षात्कारस्या
पि उपदेशमात्रादेव सिद्धिः किं न स्यादित्याशंक्याह ॥ ब्रह्मसाक्षादिति ॥ २० ॥ आप्तोपदेशमात्रेणोपासनानुष्ठा
उपासीनामनुष्ठानमार्षग्रंथेषु वर्णितं ॥ विचाराक्षममर्त्यास्तच्छ्रुत्वोपासते गुरोः ॥ १८ ॥ वेदवाक्यानि निर्णेतु
मिच्छन्मीमांसतां जनः ॥ आप्तोपदेशमात्रेण ह्यनुष्ठानं हि संभवेत् ॥ १९ ॥ ब्रह्मसाक्षात्कृतस्त्वेवं विचारेण विना नृणां
आप्तोपदेशमात्रेण न संभवति कुत्रचित् ॥ २० ॥ परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरत् अविचारोऽपरोक्षस्य प्रति
बंधकः ॥ २१ ॥ विचार्याप्यपरोक्षेणैव ब्रह्मात्मानं न वेद चेत् अपरोक्षावसानत्वाद्भूयो भूयो विचारयेत् ॥ २२ ॥ ॥
नोपयोगि परोक्षज्ञानमुत्पद्यते ॥ अपरोक्षज्ञानं तु विचारमंतरेण न जायते इत्युक्तं तत्र कारणमाह ॥ परोक्षेति ॥
यतोऽविश्वास एव परोक्षज्ञानं प्रतिबध्नाति नाविचारः तस्मात्तन्निवृत्त्यास्तिक्यदुपदेशादेव परोक्षज्ञानजन्मोत्पद्य
ते अविचारप्रतिबद्धस्यापरोक्षज्ञानस्य तु विचाराभावात्तन्निवृत्तिमंतरेणोत्पत्तिर्न संभवति अतो विचारः क
र्तव्यः इतिभावः ॥ २१ ॥ ननु विचारे कृतेऽपि यदा परोक्षज्ञानं न जायते तदा किं कर्तव्यमित्यत आह ॥ विचार्यापीति

अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टांतमाह अपरोक्षेति विरोधाभावमेवोदाहृत्य दर्शयति ॥ प्रतिमा
मादिष्विति ॥२३॥ केचन प्रतिपद्यमाना उपलभंत इत्याशंक्याह ॥ अश्रद्धालोरिति ॥ कुत इत्यत आह । अश्रद्धा
लोरिति ॥ सर्वेषु वेदोक्तानुष्ठानेषु अश्रद्धालोरेव अश्रद्धावृत्त एवाधिकारित्वादित्यर्थः ॥२४॥ एतावता परोक्षज्ञा
ने किं मायातमित्यत आह ॥ सकृदिति ॥ उक्तमर्थं लोकानुभवेन दृढयति विष्णुमूर्तिरिति ॥२५॥ ननु तर्हि कुतः शा
षु विचारः क्रियंत इत्याशंक्यानुष्ठेययोः कर्मोपासनयोः संदेहसंभवान्निर्णयाय विचारः क्रियंत इत्याह ॥ कर्मोपा

अपरोक्षत्वशिलाबुद्धिर्न परोक्षेण तां नुदेत् प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते ॥२३॥ अश्रद्धालोरविश्वासो
नोदाहरणमर्हति ॥ अश्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारतः ॥२४॥ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत् ॥ वि
ष्णुमूर्त्युपदेशो हि न मीमांसामपेक्षते ॥२५॥ कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात् ॥ बहुशाखावि
प्रकीर्णत्वान्निर्णेतुं कः प्रभुर्नरः ॥२६॥ निर्णीतोऽर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः ॥ विचारमंतरेणापि शक्तोऽनुष्ठा
तुमंजसा ॥२७॥

स्तीति ॥ संदेहसंभवमेवोपपादयति ॥ बहुशाखेति ॥ अनेकासु शाखासु तत्र तत्र चोदितं कर्म उपासनं वा एकत्र समा
हृत्य निर्णेतुमस्मदादिर्नरः कः प्रभुः समर्थो न कोऽपीत्यर्थः ॥२६॥ ननु तर्ह्यननुष्ठेयत्वमेव कर्मोपासनयोः प्राप्त
मित्याशंक्य ॥ निर्णीत इति ॥ जैमिन्यादिभिः एवं विचार्य निश्चितोऽर्थः आश्वलायनप्रकारैः कल्पसूत्रैः संगृहीतोऽस्ति तावता

वे॰धा॰ नदी॰ ॥२॥

ननुसम्यक्ज्ञानस्यप्रमाणप्रमेयवस्तुपरतंत्रत्वात्तत्प्रमाणस्यचतत्वमस्यादिवाक्यरूपस्यसद्भावाद्धस्तनस्रव
सैकालक्षणस्यविद्यमानत्वात्कुतोविचारमंतरेणदुर्वोधत्वमित्याशंक्याह॥ देहादीति॥ ब्रह्मात्मैक्य
त्वापरोक्षज्ञानविरोधिनोदेहेंद्रियादिष्वात्मत्वभ्रमस्यविचारं निवर्त्यस्यसद्भावात्तन्निवृत्तयेविचारापे

देहाद्यात्मत्वविभ्रांतौजाग्रत्यांनहठात्पुमान्॥ ब्रह्मात्मत्वेनविज्ञातुंक्षमतेमंदधीत्वतः॥२१॥
ब्रह्ममात्रंसुविज्ञेयंश्रद्धालोःशास्त्रदर्शिनः॥ अपरोक्षाद्वैतबुद्धिःपरोक्षाद्वैतबुध्यनुत॥२२॥

क्षतइत्यर्थः॥२१॥ ननुतर्हिदेहेंद्रियादिगोचरस्यद्वैतभ्रमस्यसद्भावाद्द्वितीयब्रह्मगोचरंपरोक्षज्ञानम
पिमोदयादित्याशंक्य अपरोक्षद्वैतभ्रमस्यपरोक्षाद्वैतज्ञानाविरोधित्वाच्छ्रद्धावतः पुंसः शास्त्रात्परोक्षज्ञा
नमुत्पद्यतएवेत्याह॥ ब्रह्ममात्रमिति॥ अपरोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुध्यनुदतोब्रह्ममात्रंसुविज्ञेय

कथंतर्हितथाविधब्रह्मगोचरस्यज्ञानस्यतत्वज्ञानत्वमित्याशंक्यागमप्रमाणजन्यत्वादित्याह॥शास्त्रेति तज्ज्ञानं
परोक्षमपिशास्त्रोक्तेनैवप्रकारेणब्रह्मणः सच्चिदानंदरूपनिश्चायकत्वात्सम्यग्ज्ञानमेवनभ्रमइत्यर्थः
नेनसत्यज्ञानानंतादिवाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिवतत्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपितस्यबोधय

शास्त्रोक्तेनैवमार्गेणसच्चिदानंदनिर्णयात्॥परोक्षमपितज्ज्ञानंतत्वज्ञानंनतुभ्रमः॥१९॥
ब्रह्मयद्यपिशास्त्रेषुप्रत्यक्त्वेनैववर्णितं॥ महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः॥ २०॥

तदेवातः शास्त्रजन्यस्यापिज्ञानस्यप्रत्यग्ब्रह्मत्वानुल्लेखित्वादपरोक्षमेवेत्याशंक्याह॥ ब्रह्मेति॥यद्य
पिवेदांतेषुमहावाक्यैर्ब्रह्मप्रत्यगात्मत्वेनैवोपदिष्टंतथाप्येतत्प्रत्यग्रूपत्वमन्वयव्यतिरेकाभ्यांतत्वंपदा
र्थविवेकशून्यस्यदुर्बोधंबोद्धुमशक्यमतः केवलाद्वाक्यान्नापरोक्षज्ञानमुत्पद्यतेइत्यर्थः॥ ॥२०॥

१. ध्या. ॥ पं॥

ननु विश्वादिगोचरस्य ज्ञानस्य व्यत्युल्लेखित्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणेन जनितत्वान्न भ्रमत्वमित्याह ॥ परोक्षत्वेति ॥ परोक्षज्ञानत्वं भ्रांतिज्ञानत्वे कारणं न भवति किं तु विषयासत्यत्वमिह तु प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया विश्वादिमूर्तेरवभासनान्न भ्रमत्वमित्यर्थः ॥ ननु सच्चिदानंदव्यत्युल्लेखिनो ब्रह्मतत्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षतेत्याशंक्याह परोक्षत्वप्रयोजकव्यत्युल्लेखाभावादित्या

परोक्षत्वापराधेन भवेन्नातत्ववेदनं ॥ प्रमाणेनैव शास्त्रेण सत्यमूर्तेर्विभासनात् ॥ ॥ १७॥
सच्चिदानंदरूपस्य शास्त्राज्ज्ञानेप्यनुल्लिखन् ॥ प्रत्यंचं साक्षिणं तत्तु ब्रह्म साक्षान्न वीक्षते ॥ १८॥

ह ॥ सच्चिदानंदेति सत्यं ज्ञानमनंतं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः सद्धीदं सर्वं तत्सदिति चिद्धीदं सर्वं प्रकाशत इत्यादिशास्त्रात्सच्चिदानंदरूपस्य ब्रह्मणो भानेपि प्रत्यंचं साक्षिणमनुल्लिखंस्तस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानन् तद्ब्रह्म साक्षान्न वीक्षते तेनैव पश्यति ॥ १८॥ रामराम

५

प्रत्यक्षब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किंरूपमित्याकांक्षायामाह॥ प्रत्यगिति प्रत्यग्व्यक्तिं बुद्ध्यादिसा
क्षिणमानंदात्मानमनुल्लिख्याविषयीकृत्य शास्त्रात् सत्यज्ञानादिवाक्यज्ञानाद्ब्रह्मास्तीत्येवं सामान्याकारे
ण जायमानं ज्ञानमत्रास्यामुपासनायां परोक्षधीः परोक्षज्ञानं विवक्षितमित्यर्थः। तत्र दृष्टांतः विष्ण्वादि
ति॥ विष्ण्वादिमूर्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः॥ ननु शास्त्रे विष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशे
प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्विष्ण्वादिमूर्तिवत् अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधी॥ ॥१५॥
चतुर्भुजाद्यवगतावपि मूर्तिमनुल्लिखन्॥ अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षते॥ ॥१६॥
षप्रतीतेस्तज्ज्ञानस्यापि कुतः परोक्षत्वमित्याशंक्याह॥ चतुर्भुजादीति शास्त्रे चतुर्भुजत्वमित्यादिविशेषप्र
तीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तिमविषयीकुर्वन् पुरुषः परोक्षज्ञान्येव॥ तत्रोपपत्तिमाह॥ न तदे
ति॥ तदा उपासनकाले विष्णुमुपास्यं नेक्षते नेंद्रियैर्विषयीकरोतीत्यर्थः॥१६॥ रामरामराम ॐ

ननुब्रह्मोपासनस्यायथावस्तुविषयस्यकथंसम्यग्ज्ञानंसाध्यमुक्तिफलप्रदत्वमित्याशंक्यसंवादिभ्रमवदेवेत्याह ॥ स्वयमिति ॥ ननुब्रह्मतत्वंज्ञात्वोपासनंक्रियतेऽज्ञात्वावा आद्ये उपासनावैयर्थ्यंमोक्षसाधनस्यज्ञानस्यैवविद्यमानत्वात् द्वितीयेविषयापरिज्ञानादुपासनमेवनघटत इत्याशंक्याह ॥

स्वयंभ्रमोपिसंवादीयथासम्यक्फलप्रदः ॥ ब्रह्मतत्वोपासनापितथाफलप्रदा ॥ १३ ॥
वेदांतेभ्योब्रह्मतत्वमखंडैकरसात्मकं ॥ परोक्षमवगत्यैतदहमस्मीत्युपासते ॥ १४ ॥

वेदांतेभ्य इति ॥ अयमभिप्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्यमोक्षसाधनस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं ॥ शास्त्रात्परोक्षतयावगतत्वाद्ब्रह्मण उपासनाविषयत्वमिति ॥ १४ ॥ रामरामरामरामराम ॥

बाधकांतरमाह अग्नित्वादीति पंचाग्निविद्यायां योषावाव गौतमाग्निः पुरुषोवाव गौतमाग्निः पृथिवीवाव गौतमाग्निः पर्जन्योवाव गौतमाग्निरसौवाव द्युलोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपृथिवी पर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोकावाप्तिफलं न लभवेदित्यर्थः आदिपदादन्नमनोब्रह्मेत्युपा

अग्नित्वादिधियोयास्याः कथंवायोषिदादयः ॥११॥ अयथावस्तुविज्ञाना

त्फलं लभ्यत ईप्सितं ॥ काकतालीयतः सोयं संवादिभ्रम उच्यते ॥१२॥ ॥

सीत् आदित्योब्रह्मेत्यादेश इत्येवमादयो गृह्यंते ॥११॥ इदानीं बहुभिर्ग्रंथैरुपपादितं संवादिभ्रमं बुद्धिसौ कर्यायसंक्षिप्य दर्शयति ॥ अयथेति ॥ विहितादविहिताद्वा यस्मादयथावस्तुविज्ञानाद्विपरीतज्ञाना दीप्सितमभिलषितं फलं काकतालीयतो दैवगत्या लभ्यते सोयं संवादिभ्रमः इत्यर्थः ॥ १२॥ ओम्

पं० ध्या० ॥ ३ ॥

उदाहरणांतरमाह ॥ ज्वरेणेति ॥ ज्वरेण सन्निपातं प्राप्तः पुरूरवद्दं नारायणस्मरणं मम स्वर्गसाधनमि
ति ज्ञानमंतरेणापि सन्निपातप्रयुक्तभ्रमवशात्साधारणपुरुषतया चेत्यादिवन्नारायणं स्मरन्मृतः स्व
र्गमवाप्नोत्येव हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः आकृष्य पुत्रमघवान्यदजामिलोपि नारायणे
ति म्रियमाण उपैति मुक्तिमित्यादिपुराणवचनेभ्यः अत्रापि नारायणनाम्नः पुत्रनामत्वज्ञानं भ्रांति

ज्वरेण प्राप्तः सन्निपातं भ्रांत्या नारायणं स्मरन् ॥ मृतः स्वर्गमवाप्नोति स संवादि
भ्रमो मतः ॥ ९ ॥ प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरे ॥ उक्तन्यायेन
संवादिभ्रमाः संति सहस्रशः ॥ १० ॥ अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथं ॥

रेव ॥ ९ ॥ एवं त्रिविधसंवादिभ्रमोदाहरणेन सिद्धमर्थमाह ॥ प्रत्यक्षस्येति ॥ १० ॥ विपक्षे बाधकप्रदर्शने
नोक्तमर्थं द्रढयति ॥ अन्यथेति ॥ अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन पूज्या
भवेयुः स्वतो देवतात्वाभावादित्यर्थः ॥ रामरामरामरामराम रामरामरामरामराम रामरामराम

॥ ३ ॥

एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वाऽनुमानविषयेऽपि तं दर्शयति॥ बाष्पमिति॥ क्वचित्प्रदेशे स्थितं बाष्पं धूमत्वेन निश्चित्य तन्मूलप्रदेशोऽयं प्रदेशोऽग्निमान् धूमवत्त्वादित्यनुमाय प्रवृत्तेन पुरुषेण दैवगत्या वह्निस्तत्रोपलभ्यते तदा बाष्पविषयं धूमज्ञानं संवादिभ्रमो मतः॥७॥ आगमविषयेऽपि तं दर्शयति

बाष्पं धूमतया बुद्ध्वा तत्राङ्गारानुमानतः॥ वह्निं यदृच्छया लब्ध्वा
स संवादिभ्रमो मतः॥७॥ गोदावर्युदकं गाङ्गोदकं मत्वा विशुद्धये
संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः॥८॥ रामाय नमः

गोदावरीति॥ द गोदावर्युदकस्यापि विशुद्धिहेतुत्वमागमसिद्धमतस्तत्प्रोक्षणादपि शुद्धिरस्त्येवाथापि गोदावर्युदके या गाङ्गोदकबुद्धिः सा भ्रान्तिरेव॥ =८॥ रामरामरामरामरामरामरामरामरामरामरामा॥

पं. धा. ॥२॥

दीपप्रभेवरत्नसमानोपलभ्यते॥ तथाविधं प्रभाद्वयं दूरतो दृष्ट्वायं मणिरयं मणिरिति बुद्ध्या बुद्धौ पुरुषा
वभिधावनं कुरुतस्तयोर्द्वयोरपि प्रभाविषये जायमानं मणिज्ञानं भ्रांतमेवाथापि दीपप्रभायां मणिबुद्धिं
कृत्वाधावावापुरुषेण मणिर्न लभ्यते॥ मणेः प्रभायां मणिबुद्ध्या धावता तु मणिर्लभ्यत एव॥५॥ अत्र

दीपप्रभामणिभ्रांतिर्विसंवादिभ्रमः स्मृतः॥
मणिप्रभामणिभ्रांतिः संवादिभ्रम उच्यते॥६॥

त्वेवं वार्त्तिककार्यैः प्रकृतोपक्रमायासमित्यत आह॥ दीपप्रभेति॥ या दीपप्रभायां मणिर्भ्रांति रस्ति स विसं
वादिभ्रम इति स्मृतो विद्वद्भिर्मणिलाभलक्षणार्थक्रियारहितत्वात् मणिप्रभायां मणिबुद्धिस्तु मणिला
भलक्षणार्थक्रियावत्वात्संवादिभ्रम इत्युच्यत इत्यर्थः॥६॥ रामरामरामराम रामरामरामराम राम ॥२॥

संवादिभ्रमवदित्युक्तं दृष्टांतं प्रपंचयितुं संवादिभ्रमप्रतिपादकं वार्त्तिकं पठति ।। मणिप्रदीपेति ।। मणिश्च
प्रदीपश्च मणिप्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः ।। मणिप्रभायां दीपप्रभायां च यथा
मणिबुद्धिः सा मिथ्याज्ञानमेवातस्मिंस्तद्बुद्धित्वाद्यापि मणिप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य
मणिलाभो भवति इतरस्य तु स नास्तीत्यर्थः ।। क्रियायां वैषम्यमस्तीत्यर्थः ।। =।।३।। वार्त्तिकं व्याचष्टे ।। दीपो॰

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।। मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ।। १ ।।
दीपोऽपवरकस्यांतर्वर्त्तते तत्प्रभा बहिः ।। दृश्यते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा ।। =।। २ ।।
दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ।। प्रभायां धावतावश्यं लभ्यते तु मणिर्मणेः ।। ३ ।।
दीप्रभायां धावता मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ।। ४ ।। न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता ।। ५ ।।

पवरकस्यांत इत्यादिना श्लोकत्रयेण कस्मिंश्चिन्मंदिरेऽपवरकस्यांतर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदे
शे रत्नमिव वर्तुलोपलभ्यते ।। तथान्यस्मिन्मंदिरेऽपवरकस्यांतः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे ।।

पं. ध्या. टी.

ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया ॥ इह तावद्वेदांतशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नस्य सम्यक्श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकं महावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं ॥ अत्र श्रुतोपनिषत्कस्यापि बुद्धिमांद्यादिना केनकेनचित्प्रतिबंधेन वाक्यार्थविषयापरोक्षप्रतीत्यनुत्पत्तौ सत्यां तदुत्पादनद्वारा मोक्षफलकोपासनां दिदर्शयिषुः

संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते ॥ उत्तरे तापनीयेतः श्रुतोपास्तिरनेकधा ॥ १ ॥

वादी तावत्सदृष्टांतं ब्रह्मतत्त्वोपासनयापि मोक्षो भवतीति जानीते ॥ संवादीति ॥ यथा संवादिभ्रमेण प्रवृत्तस्याभिप्रेतार्थलाभो भवत्येवं ब्रह्मतत्त्वोपासनयाप्यभिलषितब्रह्मभावलक्षणो मोक्षो भवतीत्यर्थः ॥ तत्र किं प्रमाणमित्यत आह ॥ उत्तर इति ॥ यत उपासनयापि मोक्षोस्त्यतस्तापनीयोपनिषद्यनेकप्रकारेण ब्रह्मतत्त्वोपासना श्रुतेत्युक्तेत्यर्थः ॥ = ॥ १ ॥ = ॥ रामरामराम रामराम ॥ ॐ

१

ध्यानस्य सम्यग्ज्ञानोपायत्वे दृष्टांतमाह यथेति ॥ दार्ष्टान्तिके योजयति । मल्लाभेपी ॥ १५३ ॥ व्यंतिति
देहेणोक्तमर्थमन्वयमुखेनाह ॥ देहोपलमिति ॥ १५४ ॥ ज्ञानेऽसमर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यां
रं पठति अनुभूतेरिति ध्यानाद्ब्रह्मप्राप्तौ कैमुतिकन्यायमाह ॥ अप्यसदिति ॥ उपासकस्य पूर्व

यथागाधनिधेर्लब्धौ नोपायः खननं विना । मल्लाभेऽपि तथा स्वात्मचिंतां मुक्त्वा न चापरः ॥ १५३ ॥
देहोपलमपाकृत्य बुद्धिकुद्दालकात्पुनः । खात्वा मनोभुवं भूयो गृह्णीयात्मनिधिं पुमान् ॥ १५४ ॥
अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिंत्यताम् । अप्यसत्प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किं पुनः ॥ १५५
अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने । पश्यन्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद ॥ १५६ ॥

सविद्यमानमपि देवत्वादिकं ध्यानात्प्राप्यते किल स्वस्वरूपत्वेन नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात्प्रा
प्यत इति किमु वक्तव्यमित्यर्थः ॥ १५५ ॥ ब्रह्मध्यानफलप्रत्यक्षत्वादपि ध्यानं कर्त्तव्यमित्या

पं० इदानीमुपपादितमर्थं संक्षिप्य दर्शयति देहाभिमानमिति ॥ मरणशीलदेहेऽहमित्यभिमानपरित्या
ध्या० गात्स्वयममृतोऽमृतो भूत्वा त्रास्मिन्नेव शरीरे स्वस्य निजं स्वरूपं सदानंदचिद्रूपं ब्रह्म प्राप्नोतीत्यर्थः ॥
दी० ॥ २२ ॥

देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयं ॥ पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र
ब्रह्म समश्नुते ॥ १५७ ॥ ध्यानदीपमिमं सम्यक् परामृशति यो नरः ॥ मुक्तसंश
य एवायं ध्यायति ब्रह्म संततं ॥ १५८ ॥ इति ध्यानदीपः समाप्तः ॥ ९ ॥ राम ॥

॥ १५७ ॥ ध्यानदीपानुसंधानफलमाह ॥ ध्यानदीपमिति ॥ १५८ ॥ इति श्रीमत्परमहंसपरिव्राजका
चार्यश्रीभारतीतीर्थविद्यारण्यमुनिकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता ध्यानदीपव्याख्या
समाप्ता ॥ ९ ॥ रामरामराम ॥ रामराम ॥

॥५॥

म॰वि॰
॥१॥

ॐ श्रीगुरवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः ॥१॥ मुमुक्षो
र्मोक्षसाधनब्रह्मात्मैकत्वावगतिसिद्धये प्रसिद्धानां चतुर्णां महावाक्यानां अर्थं क्रमेण निरूपयन्प्रथमबह्वृचपठराचा
र्यं श्रादौ तावदैतरेयारण्यकगते प्रज्ञानं ब्रह्मेति महावाक्ये प्रज्ञानशब्दस्यार्थमाह येनेक्षते इति येन[च]क्षुर्द्वारानिर्गता
तःकरणवृत्त्युपहितचैतन्येन इदं दर्शनयोग्यं रूपमीक्षते पश्यति येन श्रोत्रद्वारानिर्गतांतःकरणवृत्त्युपा
धिकेन येन शब्दजातं शृणोति तथैव घ्राणद्वारानिर्गतांतःकरणवृत्त्युपहितेनौपाधिकेन येन गंधजातं जिघ्र

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च स्वाद्वस्वादू विजानाति तत्प्रज्ञानमुदीरितं ॥१॥

ति येन वागिंद्रियोपहितेन व्याकरोति शब्दजातं व्याहरति येन रसनेंद्रियद्वारानिर्गतांतःकरणवृत्त्युपाधिकेन
स्वाद्वस्वादु रसौ विजानाति अत्र चकारः समुच्चयार्थः शब्दः तथा चोक्तानुक्तैः सकलेंद्रियैरंतःकरणवृत्तिभेदै
श्चोपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्युच्यते इत्यर्थः अनेन येन वा पश्यतीत्यादेः श्रुतेरपि वेतानि
प्रज्ञानस्य नामधेयानीत्यंतस्यावांतरवाक्यसंदर्भस्यार्थः संक्षिप्य प्रदर्शितः ॥१॥ ॐ गणेशाय नमः ॥

॥१॥

दृष्टांतस्थितानामवस्थानां स्वरूपं क्रमेण व्युत्पादयति ॥ स्वत इति अत्र सर्वस्यास्समध्ये स्वतो द्रव्यांतरसंबं
धं विना शुभ्रो धौत इत्युच्यते ॥ अन्नेन लिप्तो मघट्टितः मषीमयैराकारैर्युक्तो लांछितो यथायोग्यं वर्णैः
पूरितो रंजितः स्यात् ॥३॥ दार्ष्टांतिके तान् व्युत्पादयति ॥ स्वत इति परात्मा स्वतः मायातत्कार्यरहित
श्चिदित्युच्यते मायायोगादंतर्यामी ॥ अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा ॥ पं

स्वतः शुभ्रोऽत्र धौतः स्यात् घट्टितोऽन्नविलेपनात् ॥ मष्याकारैर्लांछितः स्याद्रंजितो वर्णपूरणात् ॥३॥
स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः ॥ सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ॥४॥
ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि ॥ उत्तमाधमभावेन वर्तंते पटचित्रवत् ॥५॥ राम

चीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ॥४॥ ननु परमात्मनश्चित्रपटस्थानीयत्वे
तदाश्रितानि चित्राणीव कथ्यानीत्यत आह ॥ ब्रह्माद्या इति अत्र परमात्मन्युत्तमाधमभावेन वर्तमा
नं ब्रह्मादिस्तंबपर्यंतं चेतनात्मकं ॥ गिरिनद्यादि जडजातं च चित्रस्थानीयमित्यर्थः ॥५॥ रामराम ॥

पं.वि.

॥३॥

वृक्षादिजगतश्चैतन्नत्वेकारणं वक्तुं दृष्टांतमाह चित्रेति॥ यथा चित्रे लिखितानां मनुष्यादिशरीराणां मेव नानावर्णोर्पितावस्त्रविशेषाः लिख्यंते। ते च शीताद्यनिवारकत्वाद्वस्त्राभासाएव॥५॥ दार्ष्टांतकमाह पृथगिति॥ एवं परमात्मन्यारोपितानां देवादीनां शरीराणामेव जीवनामानश्चिदाभासाः प्रत्येकं प्रकल्प्यं तेन पर्वतादीनां तेषां तत्कल्पने कारणमाह॥ बहुधेति अमी जीवा देवतिर्यङ्मनुष्यादिशरीरप्राप्त्या

चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक्। चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः॥६॥

पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनाम्। कल्प्यंते जीवनामानो बहुधा संसरंत्यमी॥७॥

वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान्॥ वदंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः॥८॥

चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि॥९॥

बहुधा संसरंति॥ न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः॥७॥ ननु सर्वैर्वादिनो वैदिकलौकिका आत्मन एव संसार इति वदंति तत्र किं कारणमित्याशंक्याऽज्ञानमेव कारणमिति सदृष्टांतमाह॥ वस्त्राभासेति॥८॥ गिरिनद्यादीनां तु चिदाभासकल्पनाभावे दृष्टांतपूर्वकं समाह॥ चित्रस्थेति पृथ्व्यां नाभावादि

॥३॥

एवमात्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वमभिधायेतल्लाभार्थमविद्यामाह॥ संसार इति॥१०॥ केयं वि

के

द्या तल्लाभोपायः क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासेति आत्माभासस्य चिदाभास

स्येत्यर्थः॥११॥ विचारेणेति लभ्यते विद्येत्युक्तं कस्य विचारेण लभ्यते विद्येत्याशंक्याह। सदेति ननु परमात्मा

विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्विचारः कोपयुज्यते इत्याशंक्य तयोरपवादेन प

संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि॥ इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्त्यते॥१०॥

आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः॥ इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात्॥११॥

सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः॥ जीवभावजगद्भाववाधे स्वात्मैवशिष्यते॥१२॥

नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः॥ नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः॥१३॥

रमात्मावशेषेणोपयुज्यत इत्याह जीवभावेति॥१२॥ ननु जीवभावजगद्भाववाधे स्वात्मैवशिष्यत इत्युक्तं विचा

रेण जीवजगतोर्बाधितत्वदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं वि[illegible]

चाह॥ नाप्रतीतिरिति॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावात्तत्त्वज्ञानं विनापि मुक्तिः स्यादित्यर्थः॥१३॥

पं॰ चि॰

॥ ३ ॥

स्यात्मैव शिष्यते इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते न तद्व्यतिरिक्तजगद्विस्मृतिर्जीवन्मुक्तत्वाभावप्र
संगादित्याह परमात्मेति ॥१४॥ सदा विचारयेदित्युक्त्या देहपातपर्यन्तं विचारप्रसक्तौ सत्यां तस्यावधिमाह
परोक्षा चापरोक्षेति ॥१५॥ विचारजन्या विद्या परोक्षत्वापरोक्षत्वभेदेनोक्ते तयोरुभयोः स्वरूपं क्रमेण दर्शयति   नद्वेधे
॥ अस्ति ब्रह्मेति ॥१६॥ एवंविधात्मसाक्षात्कारसाधारणमात्मतत्त्वविवेचनं प्रतिजानीते । तत्साक्षात्कारेति

परमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत् ॥१४॥   कारण

परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते ॥१५॥ ॥

व अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ १६ ॥

तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते ॥ येनायं सर्वसंसारात्सद्य एव विमुच्यते ॥१७॥

कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा ॥ घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ॥१८॥

येन साक्षात्कारेण मुमुक्षुः सद्य एव विमुच्यते ॥ तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः ॥१७॥ चिदात्मनः पा
रमार्थिकमेकत्वे निश्चितेऽपि व्यवहारदशायां प्रतीयमानं चैतन्यभेदमुद्दिशति कूटस्थेति । एकस्याश्चितेश्चा
तुर्विध्ये दृष्टान्तमाह ॥ घटाकाशेति ॥१८॥ श्रीरामाय नमः ॥ ॐ राम राम राम   रामरामरामरामरामराम ॥

॥ ३ ॥

घटावछिन्नस्य घटाकाशस्य तदनवछिन्नस्य च महाकाशस्य प्रसिद्धत्वात्तौ विहायाप्रसिद्धं जलाकाशं व्युत्पादयति प
घटावछिन्नेति॥ घटावछिन्ने आकाशे यदुदकमस्ति तत्र जले प्रतिबिंबितोऽभ्रनक्षत्रसहित आकाशो जलाका
श इत्युच्यते॥१९॥ अभ्राकाशं व्युत्पादयति। महाकाशस्येति। तत्र मेघमंडले यज्जलं तस्मिन्नित्यर्थः॥२०॥ ननु मेघे ज घे
लस्याप्रतीयमानत्वान्नभसस्तत्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह। मेघांशेति। मेघस्वरूपस्य जलस्य प्रत्यक्षे

घटावछिन्नखे नीरे यत्तत्र प्रतिबिंबितः। साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते॥१९॥
महाकाशस्य मध्ये यन्मेघमंडलमीक्ष्यते॥ प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः २०॥
मेघांशरूपमुदकं तुषाराकारसंस्थितं॥ तत्र खप्रतिबिंबोऽयं नीरत्वादनुमीयते॥२१॥ ॥

णानुपलंभेऽपि वृष्टिकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते उदकत्वेनैव लिंगेन विम न
ते जलमाकाशप्रतिबिंबवद्भवितुमर्हं जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपजलेप्याकाश
प्रतिबिंबसद्भावोऽवगम्यते इत्यर्थः॥२१॥ कृष्णायनमः रामायनमः रुद्रायनमः॥ रामराम

॥ पं॰ चि॰ ॥

एवंदृष्टांतभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टांतिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति। अधिष्ठानेति। पंचीकृता
पंचीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन ताभ्यामव
च्छिन्न आत्मा कूटस्थ इत्युच्यते तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह॥ कूटवदिति २२ एवं कूटस्थं व्युत्पाद्य जी
वस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्स्वरूपातित्वात्तं व्युत्पादयति कूटस्थेति तस्य जीवशब्दाभिधेयत्वे
निमित्तमाह प्राणानामिति कूटस्थातिरिक्तजीवकल्पनप्रयोजनमित्याशंक्य विकारिणः कूटस्थ

अधिष्ठानतया देहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते॥ २२॥

कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः। प्राणानां धारणाज्जीवः संसारेण स युज्यते २३॥

जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः। तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते २४

स्य संसाराभावान्निर्वाहार्थं सोऽंगीकर्तव्य इत्यर्थः। संसारेणेति २३ ननु जीवव्यतिरिक्तः कूटस्थोऽस्ति चेत्कि
मिति न प्रतिभासत इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टांतमाह। जलेति ननु एवं तिरोधाने न का
पि प्रासत्वे प्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासरूपत्वान्नाभिन्नानैवमित्याह सोऽन्योन्याध्यास इति

ध

॥ ६१ ॥

ननु अयमेवाध्यासश्चेदस्य कारणरूपाऽविद्या वक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायामभेदप्रती
सजीव तिरेवाविद्येत्याह॥ अयमिति॥२५॥ एवं कल्पिताविद्याकल्पितत्वस्पष्टीकरणायाविद्यां विभजते॥ विक्षेप
ति विक्षेपहेतुत्वेनावृतेर्हितत्वादादौ तां प्रथमं लक्षयति॥ न भातीति॥ कूटस्थो न भाति न प्रकाशते नास्ति चेति
व्यवहारहेतुरावरणमित्यर्थः॥२६॥ नन्वविद्याया अस्तित्वे तत्कृतावरणे च सद्भावे किं प्रमाणमित्याशंक्य लोका स्प

अयं जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्॥२५॥ ॥ पा

विक्षेपावृतिरूपाभ्यां द्विधाऽविद्या प्रकल्पिता न भाति नास्ति कूटस्थ इत्यापादनमावृतिः॥२६

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि॥२७॥

नुभव एवेत्याह॥ अज्ञानीति विदुषा कूटस्थं किं जानासीति पृष्टोऽज्ञानी तं न जानामीत्यज्ञानमनुभूय वक्ति अयमवि
द्यानुभवः॥ न केवलमज्ञानानुभवमेव वक्ति अपि तु नास्ति न भाति कूटस्थ इति कूटस्थाभावाभाने चानुभूय वद
ति अयमावरणानुभवः अत उभयत्रानुभवः प्रमाणमिति भावः॥२७॥ रामराम रामराम॥

वे. वि.
॥ षे ॥

नेनुभवन्नाते आत्मनः स्वप्रकाशत्वात्तस्मिन्न विद्यानोपपद्यते। तेजस्तिमिरयोरिव विरुद्धस्वभाववत्वेन तयोः संबंधा
नुपपत्तेः अविद्याभावे च तत्कृतमावरणं दुर्निरूप्यं स्यात् तदभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षेपाभावे च
ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञानवैयर्थ्यं ततस्तत्प्रतिपादकं शास्त्रमप्रमाणं स्यादित्याशंक्यैतत्सर्वं पूर्वो
क्तानुभवबाधितमित्याह। स्वप्रकाश इति। नहि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः ॥२७॥ नन्वनुभवस्योक्त

स्वप्रकाशे कुतोऽविद्या तां विना कथमावृत्ति। इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ ॥२८॥
स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः। कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् ॥२९॥
वुध्यारोहाय तर्कश्चेदपेक्षेत तथा सति। स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ॥३०॥ ॥

नुभवाभा

तर्कविरोधेनासत्वान्न तेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रमाणस्यानभ्युपगमे केवलतर्कस्यानिश्चायकत्वस्य स्वै
नैवाभ्युपगतत्वान्न तार्किकस्य तत्त्वनिश्चयः कोपि स्यादित्याह ॥ स्वानुभूताविति ॥२९॥ नन्वनुभवस्तत्त्वनिश्चा
यक एव तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोप्यभ्युपेतव्यः इत्याशंक्य कामं तर्ह्यनुभवानुसारे
णैव तर्को दर्शनीयो न तद्विरोधेनेत्याह बुद्ध्यारोहायेति ॥३०॥

अनुवादंकृत्वा ॥२

॥ षे ॥

के सावनुभवो यदनुसारेण तर्को वर्णनीय इत्याकांक्षायां पूर्वोक्तमविद्यादिगोचरमनुभवं स्मारयति स्वा
नुभूतिरिति ॥ फलितमाह अत इति ३१ ॥ तमेव तर्कमभिनीय दर्शयति । तच्चेदिति अविद्यावरणसाधकचैत
न्यस्यैव तद्विरोधित्वे विद्याप्रतीतिरेव न स्यादिति भावः तर्हि विद्यायाः को विरोधीत्यत आह ॥ विवेक इति
विवेक उपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं दृष्टमित्यत आह ॥ तत्वज्ञानीति ॥३२॥ ॥

स्वानुभूतिरविद्यायामावृतौ च दर्शिता ॥ अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ॥ ३१॥

ने तच्चेद्विरोधि केनायमावृतिर्ह्यनुभूयतां ॥ विवेकस्तु विरोध्यस्यास्तत्वज्ञानिनि दृश्यतां ॥३२॥

अविद्यावृतिकूटस्थे देहद्वययुता चितिः ॥ शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ॥३३॥

इदमंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते ॥ स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगं ॥ ३४॥

एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह अविद्येति पूर्वोक्ताविद्यावरणवति कूटस्थे प्रत्यगात्मन्यारो
पितस्थूलसूक्ष्मशरीरसहितश्चिदाभासो विक्षेपाध्यास इत्यर्थः ॥३३॥ अस्य विक्षेपस्याध्यासत्वसिद्धये शु
क्तिरजताध्यासस्तात्म्यं दर्शयति इदमंशस्येति शुक्तिकायां स्थितं पुरोदेशादिसंबंधित्वमबाध्यत्वं च यथा
त्वं वस्तुत्वं रोपिते रजते अवभासते एवं स्वयंत्वं च कूटस्थनिष्ठमारोपिते चिदाभासे अवभासते इत्यर्थः ॥३४॥ रामरामराम॥

पं॰ चि॰ ॥ १६ ॥

एवं सामान्यांशप्रतीतिमुभयत्र प्रदर्श्य विशेषांशप्रतीतिसाम्यं दर्शयति नीलेति ॥ ३५ ॥ साम्यांतरं दर्शयति ॥
आरोपितस्येति ॥ दृष्टांते शुक्तिस्थले आरोपितपदार्थस्य रूपनाम रूप्यमिति नाम यथा एवं कूटस्थे कल्पित
चिदाभासरूपविक्षेपस्य पूर्वोक्तस्याहमिति नामेत्यर्थः ॥ ३६ ॥ ननु दृष्टांते पुरोवर्तिनि शुक्तिशकले इंद्रियसं
निकर्षे जाते रूप्यमिदमिति तदतिरिक्तरजताभिमान उपपद्यते नैवं दार्ष्टांतिके स्वआत्मातिरिक्तवस्त्वभिमान
इत्याशंक्याचापि स्वप्रकाशतया चिदाभासमाने तदतिरिक्तोहमिति अभिमान उपलभ्यते अतो न वैषम्यमित्यभि

नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं असंगानंदताद्येवं कूटस्थेपि तिरोहितं ॥ ३५ ॥
आरोपितस्य दृष्टांते रूप्यं नाम यथा तथा कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ॥ ३६ ॥
इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते ॥ तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते ॥ ३७ ॥
इदंत्वरूप्यते भिन्ने स्वत्वाहंते तथेष्यतां सामान्यं च विशेषश्च ह्युभयत्रापि गम्यते ॥ ३८ ॥ ॥

अभिप्रायेणाह ॥ इदमंशमिति ॥ ३७ ॥ ननु स्वमहंशब्दयोरेकार्थत्वात्कथं दृष्टांतदार्ष्टांतिकयोः साम्यमित्या
शंक्येदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यान्नैवमित्याह इदंरू
प्यत्वे इति नेन स्वयमहंशब्दयोर्नैकार्थत्वमित्यर्थः ॥ ३८ ॥ रामराम

॥ १६ ॥

स्वयंशब्दार्थस्यसामान्यरूपत्वंस्पष्टीकर्तुंलौकिकप्रयोगंतावद्दर्शयति।देवदत्तेति॥३९॥भवत्वेवंलोकेप्रयोगः कथ
मेतावतास्वयंशब्दार्थस्यसामान्यरूपत्वमित्याशंक्येदंशब्दार्थवदित्याह।इदंरूप्यमिति यथारूप्यवस्त्रादेःसर्वत्रेदंश
ब्दस्यप्रयुज्यमानत्वात्तदर्थस्यसामान्यरूपत्वं तथासौत्वमहमित्यादौसर्वत्रस्वयंशब्दप्रयोगात्तदर्थस्यापिसामान्यरू
पत्वमवगम्यतइत्यर्थः॥४०॥भवतुस्वयमहंशब्दार्थयोर्लोकेभेदः एतावताकूटस्थात्मनिकिमायातमितिपृच्छति

देवदत्तःस्वयंगच्छेत्त्वंवीक्षस्वस्वयंयथा॥अहंस्वयंनशक्नोमीत्येवंलोकेप्रयुज्यते॥३९॥ इ
दंरूप्यमिदंवस्त्रमितियद्वदिदंयथा॥असौत्वमहमित्येषुस्वयमित्यभिमन्यते॥४०॥
अहंत्वाद्भिद्यतांस्वत्वंकूटस्थेतेनकिंतव।स्वयंशब्दार्थएवैषकूटस्थइतिमेभवेत्॥४१॥
अन्यत्ववारकंस्वत्वमितिचेदन्यवारणं॥कूटस्थस्यात्मतांवक्तुरिष्टमेवहितद्भवेत्॥४२॥

अहंत्वादिति सामान्यरूपंस्वयंशब्दार्थएवकूटस्थइतीदमायातमित्यत्राह॥स्वयंशब्दार्थमिति॥४१॥ननुस्वत्वरूपोधर्
मोऽन्यत्वंनिवारयति नकूटस्थत्वंबोधयतीति शंकते अन्यत्ववारकमिति स्वयंशब्दार्थस्यकूटस्थस्यैवात्मत्वात्स्वत्वे
नान्यवारणमिष्टमेवेति परिहरति॥अन्यवारणत्वमिति॥४२॥रामरामरामरामराम॥रामराम रामराम॥ राम॥

स्या०
वं०वि०
॥ ३ ॥
८

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवैकार्थत्वाभावात् कथं स्वयंशब्दार्थस्य कूटस्थात्मत्वमित्याशंक्याह हस्तकरादिशब्दवदेकार्थोपपत्तेर्मैवमिति परिहरति। स्वयमात्मेति। पर्यायत्वे सहप्रयोगाभावे हेतुमाह तेनेति। फलितमाह अतः स्वत्वमिति ॥ ८३ ॥ ननु घटादिष्वचेतनेष्वपि स्वयंशब्दार्थस्य प्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शंकते ॥ घट इति। घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्त्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह ॥ दृश्यतामिति ॥ ८४ ॥ ननु घटादिष्वप्यात्मचैतन्यस्य सत्त्वे चेतनाचेतनविभागो निर्निमि

स्वयमात्मेति पर्यायौ तेन लोके तयोः सह ॥ प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकं ॥ ८३ ॥
घटः स्वयं न जानातीत्येवं स्वयं घटादिषु ॥ किंत्वबुद्धिगता ना अचेतनेषु दृष्टं चेद् दृश्यतामात्मसत्त्वतः ॥ ८४ ॥ चेतनाचेतनभिदा कूटस्थात्मकृता न हि। किंतु बुद्धिगताभासकृतैवेत्यवगम्यतां ॥ ८५ ॥
यथा चेतनाभासः कूटस्थे भ्रांतिकल्पितः ॥ अचेतनो घटादिश्च तथा तत्रैव कल्पितः ॥ ८६ ॥ ॥

त्तकः स्यादित्याशंक्य चिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावान्नैवमिति परिहरति ॥ चेतनेति ॥ ८५ ॥ ननु चेतनाचेतनविभागस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमेऽचेतनेष्वात्मसत्त्वाभ्युपगमो निःप्रयोजनः स्यादित्याशंक्य चेतनाचेतनविभागहेतुत्वेन कूटस्थस्यानभ्युपगमेऽप्यचेतनकल्पनाधिष्ठानत्वेन कूटस्थोऽभ्यु

॥ ३ ॥

क

स्वत्वात्मत्वयोरेकत्वेऽतिप्रसंगं शंकते । तत्तेदंतेपीति । त्वमहमादिषु सर्वत्रानुगतस्य स्वत्वस्यैव सर्वत्रानुगतयोस्तत्ते
दंतयोरप्यात्मस्वरूपता किं न स्यादिति भावः ॥८७॥ तत्तेदंतयोरात्मत्वाधिष्ठितत्वादात्मत्वेन संभवतीत्याह ॥ तेऽआत्म
त्वेपीति तत्तेदंते स्वत्वमिव यद्यपि त्वमहमादिष्वनुवर्तमाने आत्मत्वेप्यनुगते तदात्मत्वमिदमात्मत्वमित्यादिव्य
वहारसंभवादतस्तयोरात्मत्वाधिकष्ठितत्वात्तादात्म्यरूपता न संभाव्यते । तत्र दृष्टांतः आत्मत्वे सम्यगात्मत्व
म सम्यगिति व्यवहारवशादात्मत्वेप्यनुवर्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ॥८८॥ एवं प्रासंगिकं परिस

तत्तेदंते पीह स्वत्वमिव त्वमिहमादिषु । सर्वत्रानुगते तेन तयोरप्यात्मतेति चेत् ॥८७॥

दंते ते आत्मत्वेप्यनुगते तत्तैतत्तस्तयोः आत्मत्वं नैव संभाव्यं सम्यक्त्वादेर्यथात्मता ॥८८॥ तत्तेदंते स्वतान्यत्वे त्वाहंते तं

अन्यतायाः प्रतिद्वंद्वी स्वयं कूटस्थदृष्यतां त्वंतायाः प्रतियोग्येषोहमित्यात्मनि कल्पितः ॥८९॥ परस्परं प्रतिद्वंद्वतयालोके प्रसिद्धे नास्ति संशयः ॥८८

लो मायाकल्पितदर्शनाय लौकिकव्यवहारसिद्धमर्थमनुवदति तत्तेदंते इति तत्ताप्रतियोगित्वमिदंतायास्तादिदमिति
स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति । त्वंताप्रतियोगित्वमहंतायास्त्वमहमिति लोके प्रसिद्धं प्रतिद्वंद्वत्वेन
प्रयोगदर्शनात्प्रसिद्धमिति भावः ॥८८॥ भवत्वेवं लोके प्रकृते किमायातमित्यत आह अन्यताया इति । अन्यत्वप्र
तियोगि स्वयंशब्दार्थः कूटस्थः त्वंताप्रतियोग्यहंशब्दार्थश्चिदाभासः कूटस्थे कल्पित इत्यर्थः ॥९०॥ राम॥

वृत्या नि ५ स्वय २

नन्वक्तप्रकारेणजीवकूटस्थयोर्भेदेसत्यपिसर्वैरयंकिमितिनजानंतीत्याशंक्याह। अहंतेति बुद्धिसाक्षिणः कूटस्थस्य
बुद्ध्यासाधगतस्पदीकर्तुमशक्यत्वादहंमितिप्रतिभासमानयोर्जीवकूटस्थयोर्भ्रांत्यैकत्वंप्रतिपन्नाइत्यर्थः॥५१॥ नन्वस्यजी
वकूटस्थयोरेकत्वभ्रमस्यकिंकारणमित्यपेक्षायामाह। तादात्म्येति अत्रास्मिन्ग्रंथेऽनादिरविवेकोऽयमित्यत्रोक्तया
विद्ययेत्यर्थः। यतोविद्याकार्यत्वमस्यातोऽविद्यानिवर्तकज्ञानेनैवतन्निवृत्तिरित्याह अविद्यामिति॥५२॥ नन्वविद्या
सत्त्वाविद्याकार्यत्वात्तन्निवृत्तिरित्येतदनुपपन्नंब्रह्मात्मैकत्वविद्यायामुत्पन्नायामप्यविद्याकार्यस्यदेहादेरुपलम्भ

अहंतास्वत्वयोर्भेदोरूप्यतेदंतयोरिव॥ स्पष्टोऽपिमोहमापन्नाएकत्वंप्रतिपेदिरे॥५१॥=॥
तादात्म्याध्यासएवात्रपूर्वोक्ताविद्ययाकृतः॥ अविद्यायांनिवृत्तायांतत्कार्यंविनिवर्त्तते॥५२॥
अविद्यावृतितादात्म्येविद्ययैवविनश्यतः॥ विक्षेपस्यस्वरूपंतुप्रारब्धक्षयमीक्षते॥५३॥
उपादानेविनष्टेऽपिक्षणंकार्यंप्रतीक्षते॥ इत्याहुस्तार्किकास्तद्वदस्माकंकिंनसंभवेत्॥५४॥

मानत्वादित्यतआह अविद्यावृतीति अविद्यैककारणयोरावृतितादात्म्ययोर्विद्ययैवविनिवृत्तिः॥ कर्मसहितावि
द्याजन्यस्यतुविक्षेपस्वरूपस्यकर्मावसानपर्यंतमवस्थानमित्यविरोधइतिभावः॥५३॥ ननुप्रारब्धकर्मणोनिमि
त्तमात्रत्वात्तत्सद्भावमात्रेणोपादानेविनष्टेऽपिकथंकार्यानुवृत्तिरित्याशंक्यपरप्रसिद्धदृष्टांतेन तदनुवृत्तिंस ॥ ६॥

केयं स्फूर्तिरित्याकांक्षायां असत्त्वेनेत्यादिकां तां स्फूर्तिमर्थतः पठति असदिति यदि ब्रह्मासदिति जानीयात्तर्हि स्वमेव ब्रह्मणोऽसत्त्वज्ञानस्य सद्रूपत्वे स्वस्यैव ब्रह्मरूपत्वादित्यर्थः फलितमाह अत इति ॥२५॥ इदानीमात्मनः स्वप्रकाशत्वे वक्तुकामस्तस्य वेद्यत्वाभावे कीदृक्स्वरूपमिति प्रश्नमुत्थापयति कीदृगिति अयमभिप्रायः आत्मन ईदृक्त्वादिकेन चिद्रूपेण वैशिष्ट्यांगीकारे तेनैव रूपेण वेद्यत्वं स्यात् तदनंगीकारे शून्यत्वमिति सत्यमीदृक्त्वांगी

असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत् अतोऽस्य मा भूद्वेद्यत्वं स्वसत्त्वं त्वभ्युपेयतां ॥२५॥

कीदृक्तर्हीति चेत्पृच्छेदीदृक्ता नास्ति तत्र हि यदनीदृगतादृक्च तत्स्वरूपं विनिश्चिनु ॥२६॥

अक्षाणां विषयस्त्वीदृक्परोक्षस्तादृगुच्यते विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता ॥२७॥

कारे तथैव वेद्यत्वं तत्तदनंगीक्रियत इत्याह ईदृक्तेति उपलक्षणमेतत्तादृक्त्वस्यापि उभयाभावमेवाह यदनीदृगिति ॥२६॥ ननु प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्य ईदृक्तादृक्शब्दयोरर्थमभिदधानस्तदवाच्यत्वमुपपादयति अक्षाणामिति प्रत्यक्षस्यैव घटादेरीदृक्शब्दवाच्यत्वं दृष्टं परोक्षस्यैव धर्माधर्मादेस्तादृक्शब्दवाच्यत्वं दृष्टं द्रष्टुरात्मनस्तु इंद्रियजन्यज्ञानविषयत्वाभावान्नेदृक्त्वं स्वत्वेनैव परोक्षत्वाभावान्न तादृक्त्व

द्वितीयं पद्यं अन्यं पद्यं १ संवित्कर्मतामंतरेणेति विशेषणस्यासिद्धिः

गमनक्रियाजन्यसंयोगरूपफलवत्वेन ४ आत्मनः ईदृक्तादृक्शब्दवाच्यत्वानंगीकारे १ कुतः आत्मनः संवेदनविषयत्वात् ॥ २

तर्हि अन्यमिति द्वितीयं पद्यं फलं दर्शनव्याजेन हरति अवेद्य इति इंद्रियजन्यज्ञानविषयत्वाभावेप्यपरोक्षत्वात्स्वप्र परि २

काश इत्यर्थः अत्रायं प्रयोगः आत्मा स्वप्रकाशः संवित्कर्मतामंतरेणापरोक्षत्वात्संवेदनवदिति नच विशेषणासि विषयतामं

द्धो हेतुः आत्मनः संवित्कर्मत्वे कर्मकर्तृभावविरोधप्रसंगात् स्वस्य स्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यविरो तरेण २

ध इति चेत्तन्न गमनक्रियायामपि एकस्यैव स्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यतिप्रसंगात् नच साधन

विकलो दृष्टांतः संवेदनस्य संवेदनांतरापेक्षायां अनवस्थानादिति तर्कमते घटो घटज्ञानेन भासते घटज्ञानं अ

अवेद्योप्यपरोक्षोतः स्वप्रकाशो भवत्ययं सत्यं ज्ञानमनंतं चेत्यस्तीह ब्रह्मलक्षणम् ॥ २८ ॥ ज्ञातृरूपेण प्रमेय

संवेदनवदिति यो दृष्टांतः सः संवेदनकर्मतामंतरेणेति हेतुरहितः कुतः संवेदनस्य संवेदनविषयत्वात् ५ स्वरूपेण ॥ ३ ॥

नुव्यवसायेनेति संवेदनवत्स्वप्रकाशो दृष्टांतः विकल इति चेन्न ज्ञानस्य ज्ञानांतरेणाभासनाभावात् न साध

नविकलः नन्वात्मनः स्वप्रकाशत्वे सिद्धेपि ब्रह्मणो लक्षणाभावात् न ब्रह्मत्वसिद्धिरित्याशंक्य तल्लक्षणं तत्र

योजयति सत्यमिति सत्यं ज्ञानमनंतं चेति श्रुत्या यद्ब्रह्मणो लक्षणम् तत्तदिहात्मनि विद्यत इत्यर्थः ॥ २८ ॥

संयोगस्य देवदत्तस्य ... घटादिज्ञानवत् ४

॥ ६ ॥

प्राणादप्यांतरस्य मनस आत्मत्ववादिनां मतं दर्शयति मन आत्मेति प्राणस्यानात्मत्वे युक्तिमाह प्राणस्येति ॥६७ मनस
आत्मत्वे युक्तिं प्रतिपादिकां श्रुतिमाह मनेति तस्माद्वा एतस्मात्प्राणमयादन्योंऽतर आत्मा मनोमयः इति श्रुत्यंतरं द
र्शयति श्रुत इति फलितमाह तेनेति ॥६८॥ मनसोप्यंतरस्य विज्ञानस्यात्मत्ववादिनो बौद्धस्य मतं दर्शयति ॥ विज्ञान
मिति विज्ञानस्यांतरत्वे युक्तिमाह ॥ यत इति ॥६९॥ विज्ञानमनः शब्दवाच्यस्यांतःकरणस्यैकत्वात्कथं मनोमयवि

मनः आत्मेति मन्यंते उपासनपराजनाः प्राणस्याभोक्तृतास्पष्टाभोक्तृत्वं मनसः श्रुतं ॥६७॥ मन एव मनुष्या
णां कारणं बंधमोक्षयोः ॥ श्रुतो मनोमयः कोशः कोनात्मेति रितं मनः ॥६८॥ विज्ञानमात्मेत्यपरे आहुः क्ष
णिकवादिनः यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं ॥६९॥ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा वि
ज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ॥७०॥ अहंप्रत्ययबीजत्वमिदंवृत्तेरतिस्फुटं अविदित्वा स्वमात्मानं वाह्यं

ज्ञानमयमयोः कार्यकारणभाव इत्याशंक्य तमुपपादयितुं तावत्तयोर्भेदं दर्शयति अहंवृत्तिरिति ॥७०॥ तयोः कार्यका
रणभावमाह अहंप्रत्ययेति तदेवोपपादयति अविदित्वेति ॥७१॥ अहंवृत्त्युदयाभावे इदंवृत्त्यनुदयादनयोः
कार्यकारणभावः इत्यर्थः ॥७२॥ रामकृष्ण ओम ओम ओम ओम रामरामरामराम ॥ राम ॥

तस्य विज्ञानस्य क्षणिकत्वे ऽनुभवं प्रमाणयति क्षणे क्षणे इति क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशमिति स्वेनैव प्रमितत्वादित्यर्थः ॥२२॥ विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह ॥ विज्ञानमये ति ॥ तस्माद्वा एतस्मान्मनोमयादन्योंतर आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुते कर्माणि तनुते इत्यादि वाक्यं विज्ञानस्यात्मप्रतिपादकमित्यर्थः ॥२३॥ बौद्धावांतरभेदवादिनो मतं दर्शयति ॥ विज्ञानमिति तत्र श्रु

क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः ॥२२॥
विज्ञानमयकोशोयं जीव इत्यागमा जगुः सर्वसंसार एतस्य जन्मनाशसुखादिकः ॥२३॥
विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः ॥२४॥
असदेवेदमित्यादाविदमेव श्रुतं ततः ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रांतिप्रकल्पितं ॥२५॥ शून्य
निरधिष्ठानविभ्रांतेरभावादात्मनोस्तिता शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ॥२६॥

तिमाह असदेवेदमिति अस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह ज्ञानेति २५ तदेतन्मतं दूषयति निरधिष्ठानेति निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्के ल्पनाधिष्ठानस्या [illegible] त्मनः सत्ताभ्युपगंतव्या ऽ किं च शून्यवादिनोपि शून्यसाक्षित्वेनावश्यमा

श्र

कत्तद्यात्मेत्यत आह अन्य इति तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मानंदमयः इति आत्मास्तीत्येवोपलब्धव्य
स्तत्वभावेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः ॥७७॥ एवमात्मस्वरू
५८ पे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणविशेषे पि वादिविप्रतिपत्तिं दर्शयति ॥ अणुरिति ७८ ॥ तत्राणुत्ववादिनस्तावद्दर्शयति ॥

अन्यो विज्ञानमयत आनंदमय आंतर अस्तीत्येवोपलब्धव्य इति वैदिकदर्शने ॥७७॥ अणुर्महा[illegible]न्मध्य
मो वेत्येवं तत्रापि वादिनः ॥ बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात् ॥७८॥ अणुं [illegible]
वदंत्यंतरालाः सूक्ष्मनाडीप्रचारतः ॥ रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं ॥७९॥ अणोरणीयाने
वोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ॥८०॥

अणुमिति अणुत्वाभिधाने हेतुमाह सूक्ष्मेति तदुपपादयति रोम्ण इति नाडीष्विति शेषः सूक्ष्मनाडीषु प्रचारः अणुत्व
मंतरेण न घटते इत्यभिप्रायः ॥७९॥ अणुत्वे किं प्रमाणमित्यत आह अणोरिति अणोरणीयान्महतो महीयाने
षोऽणुरात्मा चेतसा वेदितव्यः सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादिश्रुतयः इत्यर्थः ८

आत्मत्वं तत्कदाहरन्ति वालाग्रेति ॥ ८१ मध्यमपरिमाणवादिनां मतं दर्शयति दिगंवरा इति तत्रोपपत्तिमाह आपादेति ॥
सतएव इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरपि अत्र प्रमाणमित्याह आनखाग्रेति ॥ ८२ ॥ ननु मध्यमपरिमाणत्वे श्रुति
सिद्धो नाडिप्रचारो न घटते इत्याशंक्याह सूक्ष्मनाडीति यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशः

वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति चाहापरा श्रुतिः ॥ ८१ ॥
दिगंवरा मध्यमत्वमाहुरापादमस्तकं चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥ ८२ ॥ [illegible]
सूक्ष्मनाडिप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत् ॥ ८३ ॥
न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः ॥ आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं ॥ ८४ ॥ ॥

तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोपि प्रचार उपचर्यत इत्यर्थः ॥ ८३ ॥ ननु आत्मनो नियतमध्यम
परिमाणत्वे कर्मवशान्न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाण

आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेनैतद्दूषयति॥ सांशस्येति भवतु को दोषस्तत्राह तथासतीति इति कृत
योः पुण्यपापयोर्भोगमंतरेण नाशः कृतनाशः अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः एतद्दोषद्वयमात्म
नोऽनित्यत्वाभ्युपगमे भवेदिति भावः॥८५॥ अतः परिशेषादात्मनो विभुत्वं सिद्धमित्याह॥ तस्मादिति॥ तत्र

सांशस्य घटवन्नाशो भवत्येव तथा सति कृतनाशाकृताभ्यागमयोः को वारको भवेत्॥८५॥ ॥

तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः॥८६॥

इत्युक्तात्विशेषेत्व वसुधाकलहं ययुः अचिद्रूपेऽप्यचिद्रूपश्चिद चिद्रूप इत्यपि॥८७॥ रामराम॥

प्रमाणमाह। आकाशवदिति आकाशवत्सर्वगतश्च नित्यो निष्कलंकेन ... क्रियमित्याद्यागमः प्रमाणमित्य
र्थः॥८६॥ एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति॥ इत्युक्तेति ८७॥

अचिद्रूपत्ववादिनोमतंदर्शयति प्रभाकराइति तस्त्रक्रियामनुभाषते आकाशवद्व्यमिति आत्माद्रव्यंभवितु
मर्हतिगुणवत्त्वादाकाशवदित्यनुमानंसूचितं आत्मनःपृथिव्यादिभ्योभेदसाधकंविशेषगुणंदर्शयति॥शब्द
वदिति आत्मापृथिव्यादिभ्योभिद्यतेज्ञानगुणकत्वाद्यत्पृथिव्यादिभ्योनभिद्यतेतत्ज्ञानगुणकमपिनभवतिय

प्रभाकरास्तत्रकिंकारणमाहुरस्याचिदात्मतां॥ आकाशवद्व्यमात्माशब्दवत्तद्गुणाश्रितिः॥८८॥
इच्छाद्वेषप्रयत्नाश्चधर्माधर्मौसुखासुखे तत्संस्काराश्चतस्यैतेगुणाश्रितिवर्दीरिताः॥८९॥
आत्मनोमनसायोगेस्वादृष्टवशतोगुणाः॥जायंतेप्रलीयंतेसबुद्धिदृष्टसंक्षयात्॥ ९०॥

थापृथिव्यादीत्यनुमानेदृष्टव्यं॥८८॥ तस्यैवविशेषगुणांतरानाह॥इछेति तत्संस्कारःभावना॥८९॥ए
षांगुणानामुत्पत्तिविनाशकारणमाह॥ आत्मन इति॥ स्वादृष्टवशात्आत्मनोमनसायोगइत्यन्वयः॥९०॥

आत्मनः चिद्रूपत्वे कथं चेतनत्वाभ्युपगम इत्याशंक्य चितिमत्वादित्याह॥ चितिमत्वादिति आत्मनश्चेतनत्वे हेत्वंतरमा
ह इहेति॥ तस्येश्वराद्वैलक्षण्यमाह॥ स्याद्धर्माधर्मयोरिति॥ २१॥ नन्वात्मनो विभुत्वे लोकांतरगमनादिकं कथं घ
टते इत्याशंक्यास्मिन्देहे कर्मवशादिच्छाद्युत्पत्तौ सत्यामात्मनोवस्थानादिव्यवहार इव कर्मवशाल्लोकांतरे देहांत
रोत्पत्तौ तदवच्छिन्नात्मप्रदेशे सुखाद्युत्पत्तिवशात् आत्मनो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमि
चितिमत्वाच्चेतनोयमिच्छाद्वेषप्रयत्नवान् स्याद्धर्माधर्मयोः कर्ता भोक्ता दुःखादिमत्वतः ॥२१॥
यथात्र कर्मवशतः कादाचित्कं सुखादिकं॥ तथा लोकांतरे देहे कर्मणेच्छादि जन्यते ॥२२॥
एवं सर्वगतस्यापि संभवेतां गमागमौ॥ कर्मकांडः समग्रोत्र प्रमाणमिति ते वदन् ॥२३॥
आनंदमयकोशो यः सुषुप्तौ परिशिष्यते अस्पष्टचित्स आत्मैषां पूर्वकोशोस्य ते गुणाः ॥२४॥
त्यभिप्रेत्याह॥ सार्धेन यथात्र कर्मवशत इति॥२२॥ आत्मनः कर्तृत्वादिधर्मवत्त्वे किं प्रमाणमित्यत आह॥ क
र्मकांड इति॥२३॥ नन्वन्यो विज्ञानमयादानंदमय आंतर इत्यत्रानंदमयस्यात्मत्वमुक्तं मिदानीमिच्छादिमान
न्यः प्रतिपाद्यते अतः पूर्वोत्तरविरोध इत्याशंक्याह आनंदमयेति॥ सुषुप्तावस्पष्टचिद्य आनंदमयकोशः प

पं०वि० उ० ॥२३॥

अस्यैवात्मनश्चिदचिद्रूपत्वं भाष्यकारा वर्णयंतीत्याह गूढमिति ॥ भाष्यकारा आत्मनो गूढमस्पष्टं चैतन्यमुक्त्वेदस्पष्टीकृ-
त्वा चिज्जडोभयात्मकतां वर्णयंतीति चैतन्यस्योक्तत्वे द्वायां कारणमाह ॥ चिदुक्त्वेद्देति अस्थितस्य तेऽश्चिदुक्त्वेदाभ
वतीति योजना सुषुप्तेरस्थितस्य जायमानात्स्मरणात्सौषुप्तचैतन्यस्योक्तत्वे द्वाभवतीत्यर्थः ॥२४॥ चिदुक्त्वेदा
प्रकारमेवस्पष्टयति जडोऽभूवमिति तदा सुषुप्तिकाले जडोऽभूवं स्वाप्सम् इत्येवं रूपा जाड्यस्य स्मृतिः स्थितस्य प्रबुद्धस्य

गूढं चैतन्यमुक्त्वेदं द्रव्यबोधस्वरूपतां आत्मनो ब्रुवते भाष्यकाराः चिदुक्तेर्दोऽस्थितस्य स्मृतेः ॥२५॥
जडोऽभूवं तदा स्वाप्सम् इति जाड्यस्य स्मृतिस्तदा विना जाड्यानुभूतिं न कथं चिदुपपद्यते ॥२६॥
द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुषुप्तौ ततस्त्वयं अप्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ॥२७॥

जायमानायाः सुषुप्तिकालीनजाड्यानुभवमंतरेणानुपपद्यमानात्तदानीतनजाड्यानुभवं कल्पयतीति भावः ॥२६॥
सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह ॥ द्रष्टुरिति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रुतेः
द्रष्टुरात्मनः स्वरूपभूतायाः दृष्टेर्लोपो न विद्यते विनाशाभावात् हि तस्य भावत्वात् अन्यथा लोपवादिनोऽपि तिः स्यादि-
कस्य वक्तुमशक्यत्वात् सुषुप्तौ चैतन्यलोपाभावः अपि तेन तोपि कारणाद् अयमात्मा खद्योतवत् स्फुरणास्फुरणाभ्यां

॥२३॥

अस्मिन्नाद्दमते दूषणाभिधानपुरःसरं स्वाख्यमतमुत्थापयति निरंशस्येति ॥ ९८ ॥ जाड्यस्य तेस्तर्हि कागतिरि
त्याशंक्याह जाड्यांशइति तत्प्रकृतिरूपं सत्वरजस्तमोगुणात्मकं प्रकृतिकल्पनायां प्रयोजनमाह ॥ चितइति
चितः पुरुषस्येति यावत् ॥ ९९ ॥ ननु चितो ऽसंगत्वेन प्रकृतिपुरुषयोरत्यंतविविक्तत्वात्प्रकृतिप्रवृत्त्या कथं पुरुषस्य

न निरंशस्योभयात्मत्वं कथं चिद्घटिष्यते तेन चिद्रूप एवात्मेत्याहुः सांख्याविवेकिनः ॥ ९८ ॥ =॥
जाड्यांशः प्रकृतेरूपं विकारी त्रिगुणं च तत् चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ॥ ९९ ॥
असंगायाश्चितेर्बंधमोक्षौ भेदाग्रहान्मतौ बंधमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा ॥ १०० ॥ व
महतः परमव्यक्तमिति प्रकृतिरुच्यते श्रुतावसंगतातद्वदसंगो हीत्यतः स्फुटा ॥ १०१ ॥

भोगापवर्गावित्याशंक्य तयोर्विवेकस्याग्रहणात्पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह ॥ असंगा इति ॥ तार्किकादिभिरि
वसांख्यैरात्मभेदो ऽंगीक्रियत इत्याह ॥ बंधमुक्तीति ॥ १०० ॥ प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति ॥ म
हत इति ॥ १०१ ॥ ओम् ओम् ओम् रामरामरामराम रामरामराम रामरामराम ॥ ओम् ओम्

पं.वि.
॥ १६ ॥

एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्येश्वरविषयां तां प्रदर्शयितुमीश्वरस्वरूपं तावत्स्थापयति ॥ चित्तत्रिधेति ॥ ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पने न प्रमाणमित्याशंक्याह स जीवेभ्य इति ॥ १०२ ॥ तामेवेश्वरसद्भावप्रतिपादिकां श्रुतिं पठति ॥ प्रधानेति प्रधानं गुणसाम्यावस्थारूपं देहेन्द्रियजीवास्तेषां पतिः गुणाः सत्त्वादयस्तेषां ईशो नियामकः इत्यर्थः न केवलमियमेव श्रुतिरीश्वरप्रतिपादकान्यत्रापि ब्राह्मणमपीत्याह ॥ आरण्यक इति १०३ ॥ तामेव वादिविप्रतिपत्तिं जानीते अत्रापीति प्रज्ञामनतिक्रम्य यथाप्रज्ञं १०४ ॥ इदानीं पतंजलिनोक्तमीश्वरप्रतिपा

चित्तत्रिधोप्रवृत्तायाः प्रकृतेर्हि नियामकं ॥ ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः स्मृतः ॥ १०३ ॥
प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः ॥ आरण्यके संभ्रमेण ह्यंतर्याम्युपपादितः ॥ १०४ ॥
अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः ॥ वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरंति हि ॥ १०५ ॥
क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुक्तः ॥ पुंविशेषो भवेदीशो जीववत्सोप्यसंगचित् ॥ १०६ ॥

इदं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सूत्रमर्थतः पठति ॥ क्लेशेति क्लेशा अविद्यादयः कर्माणि कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रे तानि सतिमूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मवि[illegible]ः फलविशेषाः तदाशयास्तेषां संस्कारास्तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति

॥ १६४ ॥

नन्वसंगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह तथापीति ईश्वरस्य नियंतृत्वानभ्युपगमे दोषमाह ॥ अव्यवस्थावि
ति ॥ १७॥ असंगस्येश्वरस्य नियंतृत्वं निःप्रमाणकमित्याशंक्याह ॥ श्रौ॰ देति तन्नियंतृत्वं श्रुतं ननु श्रुतमप्ययुक्तं कथ
मंगीक्रियते इत्यत आह ॥ युक्तमपीति ॥ जीवधर्मस्य क्लेशादेरभावादुपपन्नं चेत्यर्थः ॥ १८ ॥ ननु जीवा अप्यसंगा
श्चिद्रूपाः क्लेशादिरहिता एवं तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वेपि बुध्या सह विवेका
तथापि पृथग्विशेषत्वाद्वृत्तेस्य नियंतृत्ता ॥ अव्यवस्थैवं धर्मो ह्यावापतेतामिहान्यथा ॥ १९ ॥ श्रौ॰ तस्मादित्ये
वमादावसंगस्य परमात्मनः श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात् ॥ १७ ॥ जीवानामप्यसंगत्वात् क्लेशा
दिर्नह्यथापि च विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरितं ॥ १८ ॥ नित्यज्ञानप्रयत्नेच्छागुणनीशस्यमन्व
ते असंगस्य नियंतृत्वमयुक्तमितितार्किकाः ॥ १९ ॥ पृथग्विशेषत्वमप्यस्य गुणैरेव न चान्यथा सत्यकामः सत्यसंक
ल्पहितो ॥ क्लेशादिरस्तीति पर्वोक्तं स्मारयति जीवानामिति ॥ १९ ॥ तार्किकास्त्वसंगस्य नियामकत्वमसहमाना
जीवविलक्षणत्वाय ज्ञानादिगुणत्रयं नित्यमंगीकुर्वंत इत्याह ॥ नित्यज्ञानेति ॥ २० ॥ नन्विच्छादिगुणकस्य तस्य
कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणानां नित्यत्वादेवेति परिहरति ॥ पृथग्विशेषत्वमिति ॥ गुणानां नित्यत्वे प्रमाण

१११२

पं॰वि॰
त्रं॰
॥१५॥

तत्रापिदोषसद्भावात्सदांतरमाह नित्येति तस्यहिरण्यगर्भस्यकिंरूपमित्यतआह॥ लिंगदेहेनेति॥मायोपा
धिकः परमात्मालिंगशरीरसमष्ट्यभिमानेनहिरण्यगर्भइत्युच्यतेइत्यर्थः॥१०॥हिरण्यगर्भस्येश्वरत्वे
किंप्रमाणमित्यतआह॥ श्रुतिष्वेति॥ननुलिंगशरीरयोगेजीवःस्यादित्याशंक्याविद्याकामकर्माभावान्नजी

नित्यज्ञानादिमत्वेऽस्यसृष्टिरेवसदाभवेत्॥ हिरण्यगर्भईशोतोलिंगदेहेनसंयुतः॥११॥
श्रुतिष्वाख्यानतोतस्यमाहात्म्यमतिविस्तृतं॥ लिंगसत्वेपिजीवत्वंनास्यकर्माद्यभावतः॥१२॥
स्थूलदेहंविनालिंगदेहोनक्वापिदृश्यते वैराजोदेहईशोतःसर्वतोमस्तकादिमान्॥१३॥
सहस्रशीर्षेत्येवंचविश्वतश्चक्षुरित्यपि॥ श्रुतमित्याहुरनिशंविश्वरूपस्यचिंतकाः॥१४॥
सर्वतःपाणिपादत्वेकृम्यादेरपिचैशता॥ ततश्रतुर्येवोदेवएवेशोनेतरःप्रमान्॥१५॥

वइत्याह॥ लिंगसत्वेपीति॥१२॥केवललिंगशरीरस्यस्थूलशरीरंविनायानुपलभ्यमानत्वात्स्थूल
लशरीरसमष्ट्यभिमानीविराडेवेश्वरइत्याह॥ स्थूलदेहंविनेति॥१३॥ तत्सद्भावेप्रमाणमाह॥सहस्र
शीर्षेति॥श्रुतंवाक्यमितिशेषः॥विश्वरूपस्यचिंतकाःविराडुपासकाः॥१४॥अत्रापिदोषसद्भावाद्देवता

तंरमात्ववतइत्यतआह सर्वतइति॥१५॥

॥१५॥

एवं कैश्चनमत इत्यत आह ॥ पुत्रार्थ्यमिति । प्रजापतिः प्रजा असृजतेत्यादिवाक्यं तत्र प्रमाणमित्याह ॥ प्रजापतिरि
ति ॥ १६ ॥ भागवतमतमाह ॥ विष्णोरिति ॥ १७ ॥ शैवानां मतमाह ॥ शिवस्येति ॥ १८ ॥ गाणपत्यमतमाह ॥ पुरत्र । न्य
यमिति ॥ १९ ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ एवमिति ॥ अन्ये भैरवमैरालाद्युपासका अन्यथान्यथा वर्ण
पुत्रार्थं तमुपासीनाः एवमाहुः प्रजापतिः ॥ प्रजा असृजतेत्यादिश्रुतिं चोदाहरन्त्यमी ॥ १६ ॥ विष्णोर्नाभेः
समुद्भूतो वेधाः कमलजस्ततः विष्णुरेव परा इत्याहु लोके भागवता जनाः ॥ १७ ॥ शिवस्य पादावन्वेष्टुं शा
र्ङ्गपाणिरशक्तः ततः शिवः ईशो न विष्णुरित्याहुः शैवा आगममानिनः ॥ १८ ॥ पुरत्रयं सादयितुं विघ्नेशं सो
ऽप्यपूजयत् ॥ विनायकं प्राहुरीशं गाणपत्यमते स्थिताः ॥ १९ ॥ एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्य
था ॥ मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे ॥ २० ॥ अंतर्यामिणमारभ्य स्थावरांतेशवादिनः संत्य
संख्या
श्वस्मार्कवेशादेः कुलदैवत्वदर्शनात् ॥ २२ ॥
नेकारस्तानाह स्वेस्वेति तत्र तत्र प्रमाणानि संतीति दर्शयति ॥ मंत्रेति ॥ २० ॥ एवं कति मतानीत्याशंक्यानीत्या ॥
ह ॥ अंतर्यामिणमिति ॥ स्थावरेशवादेन क्वापि दृष्टचर इत्याशंक्याह ॥ अस्मत्स्यार्कवेति ॥ २१ ॥ रामरामरामरामराम

पं॰ वि॰
तं॰
॥ १६ ॥

नन्वेवं मतभेदे कस्योपादेयत्वं कस्य हेयत्वमित्याकांक्षायामाह ॥ तत्वनिश्चयेति ॥ तत्वनिश्चयकामेन तत्वनिश्चयेच्छुना न्यायागमयोर्विचारशीलानां पुरुषाणां प्रतिपत्तिरेकैव स्यात् सा कीदृशीत्यत आह ॥ साप्यत्रेति ॥ १२४ ॥ तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति ॥ मायां त्विति मायामेव प्रकृतिं जगदुपादानकारणं विद्यात् जानीयात् मायिनं तु मायोपाधिकं मंतर्यामिणमेव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात् ॥ अस्य

तत्वनिश्चयकामेन न्यायागमविचारिणां। एकैव प्रतिपत्तिः स्यात् साप्यत्र स्फुटमुच्यते ॥ १२४ ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १२५ ॥
इति श्रुत्यनुसारेण प्रोक्तो निर्णय ईश्वरे ॥ तथा सत्यविरोधः स्यात् स्थावरांतेशवादिनां १२६

मायिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः १२५
एतच्छ्रुत्यनुसारेणेश्वरविषयो निर्णयो प्रोक्तो इत्यत आह ॥ इतीति ॥ कुतो युक्तो इत्याशंक्य सर्वेषामविरुद्ध।
त्वादित्याह ॥ तथेति सर्वस्यापीश्वरत्वाभ्युपगमात् केनापि विरोध इति भावः ॥ १२६ ॥ रामरामरामरामराम

॥ १६ ॥

ननु जगत्प्रकृतिभूताया: मायाया: किंरूपमित्यत आह ॥ माया चेयमिति कुत इत्यत आह ॥ तापनीय इति माया
च तमोरूपेति तापनीयोपनिषदि तमो[illegible]रूपत्वस्याभिधानात् इत्यर्थ: मायायास्तमोरूपत्वे किंप्रमाणमित्या
कांक्षायामनुभूतिरिति ॥ श्रुतिरेवात्रानुभव: प्रमाणमिति प्रतिजानीते इत्याह ॥ अनुभूतिरिति ॥ ५ यातत्रमा

माया चेयं तमोरूपा तापनीये तदीरणात् अनुभूति: तत्र मानं प्रतिजज्ञे श्रुति: स्वयं ॥ १२५ ॥
जडं मोहात्मकं तच्चेत्यनुभावयति श्रुति: आबालगोपं स्पष्टत्वादानंत्यं तस्य साब्रवीत् ॥ १२६ ॥
अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत् यत्र कुंठीभवेद्बुद्धि: स मोह इति लौकिका: ॥ १२७ ॥

मायायास्तमोरूपत्वे कोऽसावनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्रानुभवं स्पष्टयतीत्याह ॥
जडमिति ॥ आनंत्यमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यते इत्य[illegible] तत्राह ॥ आबालेति ॥ १२६ ॥ जडशब्द
स्यार्थमाह ॥ अचिदात्मेति ॥ मोहशब्दस्यार्थमाह ॥ यत्रेति ॥ १२७ ॥ श्रीरामचंद्राय नम: सूर्याय नम: ॥

पं॰ चि॰ त्रि॰ ॥ १६९ ॥

नन्वेवं मतभेदे कस्योपादेयत्वं कस्य हेयत्वमित्याकांक्षायामाह ॥ तत्वनिश्चयेति ॥ तत्वनिश्चयकामेन तत्वनिश्च
येछ्यान्यायागमयोर्विचारशीलानां पुरुषाणां प्रतिपत्तिरेकैव स्यात्साकीदृशीत्यत आह ॥ साप्यत्रेति ॥ १२२ ॥
तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति ॥ मायांत्विति मायामेव प्रकृतिं जगदुपादानकारणं विद्यात् जा
नीयात् मायिनं तु मायोपाधिकमंतर्यामिणमेव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात् ॥ अस्य

तत्वनिश्चयकामेन न्यायागमविचारिणां एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते ॥ १२२ ॥
मायांतु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १२३ ॥
इति श्रुत्यनुसारेण न्यायो निर्णीयईश्वरे ॥ तथा सत्यविरोधः स्यात्स्थावरांतेतरावादिनां १२४

मायिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः १२३
एतच्छ्रुत्यनुसारेणेश्वरविषयो निर्णयो युक्त इत्यत आह ॥ इतीति ॥ कुतो युक्त इत्याशंक्य सर्वत्राविरुद्ध
त्वादित्याह ॥ तथेति सर्वस्यापीश्वरत्वाभ्युपगमान्न केनापि विरोध इति भावः ॥ १२४ ॥ रामरामरामरामराम

॥ १६९ ॥

नेनुजगत्प्रकृतिभूताया: मायाया: किं रूपमित्यत आह॥ माया चेयमिति कुत इत्यत आह॥ तापनीय इति माया

चेतमोरूपेति तापनीयोपनिषद्विदितमो[illegible]रूपत्वस्याभिधानात् इत्यर्थः मायायास्तमोरूपत्वे किं प्रमाणमित्या

कांक्षायामनुभूतिरिति॥ श्रुतिरेवात्रानुभवः प्रमाणमिति प्रतिजानीते इत्याह॥ अनुभूतिरिति॥१४॥ तत्र मा

माया चेयं तमोरूपा तापनीये तदीरणात्। अनुभूतिः तत्र मानं प्रतिजज्ञे श्रुतिः स्वयं॥१४॥

जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः आबालगोपस्पष्टत्वादानंत्यं तस्य साब्रवीत्॥१५॥

अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत्। यत्र कुंठीभवेद्बुद्धिः स मोह इति लौकिकाः॥१६॥

मायायास्तमोरूपत्वे कोसावनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्रानुभवं स्पष्टयतीत्याह॥

जडमिति॥ आनंत्यमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यते इत्य[illegible]त आह॥ आबालेति॥१५॥ ज[illegible]ड शब्द

स्यार्थमाह॥ अचिदात्मेति॥ मोहशब्दस्यार्थमाह॥ यत्रेति॥१६॥ श्रीरामचंद्राय नमः सूर्याय नमः॥

पं.दि.
३०
॥१२३॥
२
१७

उक्तप्रकारेण सर्वानुभवसिद्धत्वलक्षणमानेन तत्त्वं सिद्धमित्याह ॥ इत्थमिति ॥ एतज्जाड्यमोहलक्षणं तमोरूपत्वं ।
नन्वेवं मायायाः सर्वानुभवसिद्धत्वे घटादिवत्तानेनानिर्वत्यत्वं स्यादित्याह ॥ युक्तीति ॥ तत्प्राचः शंकानिवृत्त्य
र्थः अनिर्वाच्यं सत्त्वेनासत्त्वेन सदसत्त्वेन वा निर्वक्तुमशक्यं ॥ तत्र किं प्रमाणमित्यत आह । नासदिति ॥ १२८ ॥
अस्याः श्रुतेरभिप्रायमाह नासदिति बाधनान्नेह नानास्ति किंचनेति श्रुत्या निषेधादित्यर्थः ॥ सदसद्रूपत्वं तु वि

स्पष्टं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥ १२८ ॥
नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥ १२९ ॥
तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ॥ ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥ १३० ॥

तुच्छत्वादसत्त्वमितिश्रुत्यापादितं ॥ एवं युक्तिदृष्ट्यानिर्वचनीयत्वं प्रदर्श्य तत्त्वमिदं रूपमस्येति श्रुतेर्विद्वदनुभवेन
तस्यास्तुच्छत्वं दर्शयतीत्याह ॥ विद्याइति तत्त्वे हेतुमाह ॥ तस्येति ॥ १२९ ॥ उपपादितमर्थमुपसंहरति तुच्छेति ॥
श्रौतबोधेन तुच्छा कालत्रयेप्यसती यौक्तिकबोधेनानिर्वचनीया लौकिकबोधेन वास्तवी चेत्येवं त्रिधा माया ज्ञेयाइत्य

॥ १२३ ॥

अस्य सत्वमसत्वं च दर्शयतीति श्लोकार्थः अस्याः कृत्यमाह। अस्येति एकस्या एव मायाया जगतः सत्वासत्व प्रदर्शकत्वे
दृष्टांतमाह प्रसारणादिति॥१३१॥ स्वतंत्रास्वतंत्रत्वेनेति श्लोकत्यामायायाः स्वातंत्र्यास्वतंत्र्ये प्रदर्शिते। तत्रोभय
त्रोपपत्तिमाह। अस्वतंत्रेति स्वभासकचैतन्यं विहाय न प्रकाशत इत्यस्वतंत्रासंगस्यात्मनोन्यथाकरणात्स्व
तंत्रापीत्यर्थः॥ अन्यथाकरणमेव स्पष्टयति कूटस्थासंगमिति जीवेशावाभासेन करोतीति श्लोकात्पूर्वं जीवेश

अस्य सत्वमसत्वं च जगतो दर्शयत्यसौ॥ प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा॥ १३१॥ ॥
अस्वतंत्रा हि माया स्यादप्रतीतेर्विना चितिं॥ स्वतंत्रापि तथैव स्यादसंगस्यान्यथाकृतेः॥ १३२॥
कूटस्थासंगमात्मानं जगत्वेन करोति सा॥ चिदाभासस्वरूपेण जीवेशावपि निर्ममे॥ १३३॥
कूटस्थमनुपद्रुत्य करोति जगदादिकं॥ दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥ १३४॥ ॥

रविभागं च करोतीत्याह॥ चिदाभासेति॥१३३॥ ननु आत्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्या
ह॥ कूटस्थमिति ननु कूटस्थत्वाविघातेन जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायाया दुर्घटैकविधा
यित्वान्नेदमाश्चर्यकारणमित्याह॥ दुर्घटेति अन्यथा मायात्वमेव भज्येतेति भावः॥ ॥१३४॥ एम॥ ॥ ॥ ॥

पं.दि.
त्रे.
॥१९८॥

मायाया दुर्घटकारित्वस्वभावत्वे दृष्टांतमाह॥ द्रवत्वमिति उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया दुर्घटा
कारित्वमित्यर्थः॥१३५॥ ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्च १
मत्कारहेतुत्वदर्शनादित्याशंक्य मायाप्रयोक्तुः साक्षात्कारपर्यंतमेवास्याश्चर्यकारणत्वं नोपरिष्टादित्याह॥

द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः॥१३५॥
न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति॥१३६॥
प्रसरंति हि चोद्यानि जगद्वस्तुत्ववादिषु न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः॥
१३७॥ चोद्येपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां॥१३८
विस्मयैकशरीराया मायायाश्चोद्यरूपतः॥ अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः॥१३९

न वेत्तीति॥१३६॥ किंच जगत्सत्यत्ववादिनां नैयायिकादीन्प्रत्येवंविधानि चोद्यानि कर्तव्यानि न मा
मायावादिनं प्रत्याह॥ प्रसरंतीति॥१३७॥ मायावादिनं प्रति चोद्यकरणेऽतिप्रसंगमाह॥ चोद्येपीति
तर्हि किं कर्तव्यमित्यत आह॥ परिहार्यमिति॥१३८॥ उक्तमेवार्थं प्रपंचयति॥ विस्मयेति॥१३९॥

॥१९८॥

मायात्वनिश्चयेसतितत्परिहारान्वेषणमुचितं सएवनेदानीं सिद्ध इतिशंकते मायाखमिति मायायालक्षणमद्धा
वान्मायात्वंनिश्चीयतामित्यभिप्रायेणाह नहीति तर्हि किंलक्षणमित्याह लोकेति ॥१४०॥ तस्यापि किंलक्षणमि
त्यतआह ननिरूपयितुमिति ॥१४१॥ दुर्घटत्वमेवलक्षणंदर्शयतीति केचिज्जगति स्पष्टमिति ॥१४२॥ जगतोऽप्य

मायात्वमेवनिश्चेयमिति चेत्तर्हिनिश्चिनु लोकप्रसिद्धमायालक्षणं यत्तदीदृशं तां ॥१४०॥ ननिरूपयितुंश
क्याविस्पष्टं भासतेचयत् सामायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे ॥१४१॥ स्पष्टंभातिजगच्चेदमशक्यंतन्नि
रूपणं मायामयंजगत्तस्मादीक्षस्वापक्षपाततः ॥१४२॥ निरूपयितुमारब्धेनिखिलैरपिपण्डितैः अज्ञा
नंपुरतस्तेषांभातिकक्षासुकासुचित् ॥१४३॥ देहेन्द्रियादयोभावावीर्येणोत्पादिताः कथं ॥ कथंवातत्रचैत
न्यमित्युक्तेतेकिमुत्तरं ॥१४४॥ रामरामरामरामराम ॥

कथंनिरूपणत्वंकथमित्याशंक्यतद्दर्शयति ॥ निरूपयितुमिति ॥१४३॥ अथवाक्यनिरूपणत्वमेवोदाहरणे
नस्पष्टयति ॥ देहेन्द्रियेति ॥१४४॥ श्रीकृष्णार्पणम ओम् ओम् ओम् रामरामराम ॥

॥ पं ॥
चि ॥
१६३ ॥

स्वभाववादी शंकते वीर्यस्येति । सिद्धातीव इति कथं तदिति ॥ अन्वयव्यतिरेकाभ्यां जानामीत्याशंक्य व्याप्त्यभा
वान्नैवमित्याह अन्वयेति व्यर्थवीर्यतः वंध्यामांच तत्र वीर्यस्य व्यर्थत्वात् व्याप्तिर्न घटते यत्र यत्र वीर्यं तत्र तत्र दे
दिक इति न अन्वयोपि ॥ १८५ ॥ एवं पुनः पुनः स्फुरति किमपि न जानामीत्येवोत्तरं देयमिति फलितमा
वीर्यस्यैव स्वभावश्चेत्कथं तद्द्विविधं तत या अन्वयव्यतिरेकौ तौ भग्नौ तौ व्यर्थवीर्यतः ॥ १८५ ॥ न जानामि किम
प्येतदित्येतेषामुत्तरं एतत्व ॥ अतएव महांतोस्य प्रवदंतींद्रजालतां १८६ ॥ एतस्मात्किमिवेंद्रजालमपरं य
द्गर्भवासस्थितं रेतश्चेतति हस्तपादप्रोद्भूतनानांकुरं पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं प
श्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति १८७ ॥ देहवद्वटधानादौ सुविचार्य्याविलोक्यतां ॥
क्व धान कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ॥ १८८ ॥ निरुक्तावभिमानं ये दधते तार्किकादयः हर्षमिश्रादि
भिः न जानामीति ॥ १८९ ॥ उक्तानिर्वचनीयत्वेव ... मतिं ... तस्मादिति १९० ॥ न केवलं देहस्यैक
स्यैव दुर्निरूपत्वं किं तु वटवृक्षादेरपीत्याह देहवदिति १९१ ॥ न त्वस्माभिर्निर्वक्तुमशक्यत्वेपि उदयना
दिभिराचार्यैर्निरूप्यते इत्याशंक्याह निरुक्ताविति ॥ १९२ ॥ शुभाकराय नमः सर्वोपायनमः दिन

हा २

॥ १६ ॥

मम

उक्तार्थं संप्रदायकानां वाक्यं संवादयति अचिंत्य इति १४९· ननु भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किमायातमित्यत आह अचिंत्यरचनेति अचिंत्यरचनाशक्तेर्यद्बीजं कारणं सैव मायेत्यर्थः ननु एवंविधं कारणं क्व दृष्टमित्यत आह मायेति १५१॥ कथं तस्या जगद्बीजत्वमित्यत आह जाग्रत्स्वप्नेति ततः किमित्यत आह तस्मादिति यतो जगत्कारणं मायातोऽशेषजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः ॥१५२॥ ततोऽपि किं तत्राह या

अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् अचिंत्यरचनारूपं मनसापि जगत्खलु ॥१५१॥

अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु मायाबीजं तदेवैकं सुषुप्तावनुभूयते ॥१५२॥

जाग्रत्स्वप्नजगत्तत्र लीनं बीज इव द्रुमः तस्मादशेषजगतो वासनास्तत्र संस्थिताः १५३॥

या बुद्धिवासनास्तासु चैतन्यं प्रतिबिंबति मेघाकाशवदस्पष्टचिदाभासोऽनुमीयतां ॥१५४॥

बुद्धिवासनेति ननु तासु प्रतिबिंबोऽस्ति चेत्कुतो नानुभूयते इत्याशंक्याऽस्पष्टत्वादित्याह मेघेति तर्हि कुतस्तत्सिद्धिरित्यत आह अनुमीयतामिति ॥१५३॥ ननु मेघांतरोदकस्याऽस्पष्टाकाशप्रतिबिंबत्वेऽपि तज्जातीयस्य घटोदकस्य स्पष्टाकाशप्रतिबिंबवत्तः सद्भावान्मेघाकाशानुमानं घटते इह तथाविधदृष्टांता

पं॰ वि॰
॥ ३२॥

भावात्कथमनुमानोदय इत्याशंक्यात्रापि तत्त्वाविघटकांतसंपादनायाह साभासमिति चिदाभासविशिष्टं तदेवा
ज्ञानं बुद्धिरूपेण परिणममानं विस्पष्टं चिदाभासवद्भवतीति भावः एवं चेदमनुमानमत्र सूचितं भवति विशि
ता बुद्धिवासनाश्रितत्वादिति बिंबवत्सोऽभवितुमर्हतीति बुद्धिवदस्या विशेषत्वात् बुद्धिवृत्तिवदिति १५४॥ एवं जीवे
श्वरयोर्मायिकत्वं श्रुत्युक्तमुपपादितमुपसंहरति मायाभासेनेति ननु जीवेशयोर्मायिकत्वे समाने कथम

साभासमेव तद्बीजं धीरूपेण प्ररोहति अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ॥१५४॥
मायाभासेन जीवेशौ करोतीति श्रुतत्वतः मेघाकाशाविव तौ सुव्यवस्थितौ ॥१५५॥ काशजला
मेघवद्वर्तते माया मे[घ]स्थिततुषारवत् धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः १५६
मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः अंतर्यामी च सर्वज्ञो जगद्योनिः स एव हि १५७॥

योरंतरभेदसिद्धिरित्याशंक्य स्वच्छास्वच्छोपाधिमत्त्वेन मेघाकाशजलाकाशयोरिव तत्सिद्धिरित्याह।
मेघाकाशेति ॥१५५॥ ईशस्य मेघाकाशसाम्यं स्फुटीकरोति मेघवदिति १५६ मायाप्रतिबिंबस्येश्वरत्वे
किंप्रमाणमित्याशंक्य श्रुतिरेवेत्याह ॥ मायाधीनेति न केवलमीश्वरत्वमस्य श्रुतं अपि त्वंतर्यामित्वादि ॥ ३२ ॥

कूटस्थादिवत्सदसिद्धत्वेन देहादेरात्मत्वं पारमार्थिकं स्यादित्याशंक्योक्तं भ्रमत्वमामसमिति ॥६०॥

कू॰ दी॰ ल॰ २

ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं न चिरकालमित्याशंक्याह तंतूनामिति संसारस्याऽना
दिकालमारभ्यानुवृत्तित्वात्तत्संस्कारवशेन चक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुध्यत इति भावः ५९ ननु
तार्किकैरपि प्रागुक्तमभिहितं तद्वद्भवतापीत्याशंक्य स्वोक्तात्ततो वैषम्यं दर्शयति विनेति दोददमं विचार
सह मानं विना प्रमाणांतरेणोत्पन्नः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुति श्रुत्यर्थादि दृष्टं
तो युक्तिरनुभूतिर्विद्वदनुभवः एतेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभिप्रायः ॥५६॥ श्रुतीति मनुसरति श्रु

तंतूनां दिनसंख्यानां तैस्तादृक्क्षणईरितः भ्रमस्यासंख्यकल्पस्य योग्यक्षणइहेष्यतां ॥ =५५॥
विनाक्षोददमं मानं तैर्वृथा परिकल्पते श्रुत्युपपत्त्यनुभूतिभ्यो वदतां किं नो दुःशकं ॥ =५६॥
श्रीस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥५७॥ ॥ तिथु २
भ्राम्यंते पंडितंमन्याः सर्वे लौकिकतैर्थिकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः ॥५८॥
पूर्वापरपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे योजयंत्यप्यलज्जया ॥ =५९॥
कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ॥६०॥

स्तामिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रांत्या सिद्धं ॥५७॥ ननु कूटस्थजीवयोरेकत्वं भ्रांति
सिद्धं चेदिदं भ्रांतमिति केपि कुतो न जानंतीत्याशंक्य तेषां श्रुतितात्पर्यपर्यालोचनमन्त्वादित्याह ॥

२ पं. टी.

ते प्रसिद्धैकप्रमाणवादिनोपि परव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंतीत्याह श्रौतीकर्त्तं
मिति कोप्यन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्नरसमय इत्यादिवाक्यं लक्ष्यते वि
रोचनस्य सिद्धांतमिति तत्सिद्धांतप्रतिपादकमात्मैवेह महय्य आत्मा परिचर्य इत्यादिवाक्यं लक्ष्यते ॥ एतद्वाक्यद्वयप्र
माणत्वेन प्रतिजानंत एव न तु पपादयितुं क्षमाः प्रकरणविरोधादिति भावः ॥६१॥ अस्मिन्मते दोषप्रदर्शनेन पू
र्वः सर्वमतांतरमुपस्थापयति जीवात्मेति ॥६२॥ कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याकांक्षा
श्रौतीकर्त्तं स्वपक्षं ते कोप्यन्नमयं तथा विरोचनस्य सिद्धांतं प्रमाणमिति जज्ञिरे ॥६१॥ जीवात्मनिर्निर्गमे देह
मरणस्य दर्शनात् देहातिरिक्त एवात्मेत्याहुर्लौकायताः परे ॥६२॥ प्रत्यक्षत्वेनाभिमतः हंधीर्देहा
तिरेकिणं गमयेदिंद्रियात्मानं वच्मीत्यादि प्रयोगतः ॥६३॥ वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः
तेन चैतन्यमेतेषामात्मत्वं तत एव हि ॥६४॥ हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे चक्षुराद्यक्षलो
पेपि प्राणसत्वेत्तु जीवति ॥६५॥ प्राणो जागर्ति सुप्तेपि प्राणश्रैष्ठ्यादिकं श्रुतं कोशः प्राणमयः सम्यग्विस्तरे
णाह प्रत्यक्षत्वेनेति अहं चक्षुषा पश्यामीत्यादि प्रयोगदर्शनाद्देहातिरिक्तोहं बुद्धिगम्यानीन्द्रियाण्यात्मेत्यर्थः ॥६३॥
न केवलमिंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतिषु इंद्रियसंवादश्रवणाच्चेतनत्वमस्ति हि मित्याह वाग
दीनामिति चैतन्यस्यैवात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह । आत्मत्वमिति ॥६४॥ मतांतरमु
पन्यस्य श्रैष्ठ्यादिकं प्रपतेऽस्यांतरात्मा प्राणमय इत्यादि प्राणमयकोशः उपपत्तितः आदिशब्देन प्राणसंवादप्र
वेशादिकं ग्राह्य ॥६६॥

॥२७॥

व्या १ इदानीमंतर्यामिब्राह्मणस्य प्रशोधय व्याख्याने ग्रंथबाहुल्यभयाद्व्याख्यानस्य सर्वपर्यायसंचारित्वसिद्धये यः स
र्वेषु भूतेष्विति पर्यायं व्याचक्षाणः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं सदृष्टांतमाह । तंतुपट इति १६ यानन्
पादानतया सर्वत्रायमवस्थितत्वमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह पटादपीति ॥

तंतुपटे स्थितौ तौ यद्वदुपादानतया तथा सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ॥१६५॥=॥
पटादप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ॥१६६॥=॥
द्वित्र्यंतरत्वकक्षाणां दाण्यमनंतरः नवीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ॥१६७॥

अत्रेदमनुमानं आंतरत्वं तारतम्यं चिद्विश्रांतं तारतम्यत्वात् अणुत्वतारतम्यवदिति ॥१६८॥ नन्वांतरत्वे
यंश्वादिवदंतर्यामिणो दर्शनं न स्यादित्याशंक्य तेषामिव बाह्यत्वाभावान्न दृश्यत इत्यभिप्रायेणाह ॥ द्वि
त्र्यंतरत्वेति कुतस्तर्हि तन्निर्णय इत्यत आह तवद्रुति ग्रंथे चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिः युक्तिः वेदेनस

पं.वि.

यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह ॥ पटरूपेणेति ॥ पटरूपेणावस्थितस्तंतोः पटः शरीरं यथा एवं सर्वरूपेण
वस्थितस्य सर्वं शरीरमित्यर्थः ॥ १६८ ॥ यः सर्वाणि भूतान्यंतरो यमयति इति वाक्यस्य तात्पर्यं स्पष्टयन् तमाह श्लो
कद्वयेन तंतोरिति तंतुसंकोचनादिना पटसंकोचादि यथा भवति एवं पटस्थित्यादि ह्युपादानत्वेनावस्थितांतर्या
मी यया यया वासनया यथा यथा घटादिकार्यरूपेण विक्षिपेत्तत्तथा भूततत्कार्यं जातं तथा तथावश्यं भवतीति भा
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ॥ १६८ ॥ तंतोः संकोचविस्तार
चालनादौ पटे यथा अवश्यमेव भवति न स्यात्तंत्रापटे मनागपि ॥ १६९ ॥ तथांतर्यामी यं यं यंत्रयेद्यया वासनया य
या विक्षिपेत्तत्तथावश्यं भवत्येवं न संशयः ॥ १७० ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्व
भूतानि यंत्रारूढानि मायया ॥ १७१ ॥ सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः तदुपादानभूतेशस्तत्र विक्षि
पते खलु ॥ १७२ ॥ देहादिपंजरं यंत्रं तदारोहोऽभिमानता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ १७३ ॥ साम
वः ॥ १६९ ॥ १७० ॥ एवमंतर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमुपन्यस्यति ॥ ईश्वर इति १७१ ॥ सर्वभूता
नीतिपदस्यार्थमाह सर्वभूतानीति ते च हृदयपुंडरीके स्थिताः ननु तेषां कुतो हृद्यवस्थानमित्याशंक्य हृद्यं
तर्यामिणो विज्ञानमयकारेण परिणामवदित्याह तदुपादानेति १७२ ॥ यंत्रारूढानि इत्यत्र यंत्रारोहशब्दार्थ

इदानीं शिवप्रत्ययनाथापदयोरर्थमाह विज्ञानमयरूपेणेति ॥१७४॥ भ्रैस्वयमयति इति पदस्याप्यर्थमेका
र्थ इत्याह अंतर्यामयतीति ॥ उक्तव्याख्यानं पर्यायांतरेणाप्यतिदिशति पृथिव्यादीति १७५ ॥ प्रवृत्तिजातस्य
सर्वस्येश्वराधीनत्वे वचनांतरमुदाहरति ॥ जानामीति १७६ ॥ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्या
दित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति ॥ नार्थ इति अर्थयोजने पुरुषकारः पुरुषप्रयत्नः १७७ ॥

विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः । स्वशक्त्येशो विक्रियते माययागुणहिततत् ॥१७४॥ भ्र
मंतर्यामयतीत्युक्त्याद्यमेवार्थः श्रुतौ श्रुतः । पृथिव्यादिषु सर्वत्र न्यायोऽयं पतां धियाम् ॥१७५॥ जो
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा
नियुक्तोऽस्मि तथा करोमि १७६ ॥ नार्थः पुरुषकारेणेत्येवं माशंक्यतां यतः । ईशः पुरुषकारस्य
रूपेणापि विवर्तते ॥१७७॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां । तथापि च बोधेन स्वात्मासंगत्व

ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे यमयति भ्रामयति इति प्रतिपादितमंतर्यामित्वं व्यर्थं स्यादित्याशंक्य तद्बोधेन
स्वात्मासंगत्वज्ञानलक्षणफलस्य सत्वान्नैवमिति परिहरति ॥ ईदृग्बोधेनेदृग्बोधेनेश्वरस्य पुरुषाकारादि

पं.श्रि. ॥२२॥

यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह ॥ पटरूपेणेति ॥ पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणा
वस्थितस्य सर्वं शरीरमित्यर्थः ॥ १६८ ॥ यः सर्वाणि भूतानि अंतरो यमयति इति वाक्यस्य तात्पर्यं स्पष्टयन्नाह श्लो
कद्वयेन तंतोरिति तंतुः संकोचनादिना पटसंकोचादि यथा भवति एवं पृथिव्यादिषूपादानत्वेनावस्थितोंतर्या
मी यथा यथा वासनया यथा यथा घटादिकार्यरूपेण विक्षिपते तथा तत्तत्कार्यं जातं तथा तथावश्यं भवतीति भा
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा १६८ ॥ तंतोः संकोचविस्तार
चालनादौ पटे यथा अवश्यमेव भवति न स्यात्तं पटे मनागपि १६९ ॥ तथांतर्याम्ययं यत्र यथा वासनया
या विक्षिपते तथावश्यं भवत्येवं न संशयः १६० ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्व
भूतानि यंत्रारूढानि मायया ॥ १७१ ॥ सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः तदुपादानभूतेशस्तत्र विक्षि
पते खलु ॥ १७२ ॥ देहादिपंजरं यंत्रं तदारोहोभिमानता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ १७३ ॥ साम
र्थ्यः ॥ १६९ ॥ १७० ॥ एवमंतर्यामित्वप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमुपन्यस्यति ॥ ईश्वर इति १७१ ॥ सर्वभूता
नीति पदस्यार्थमाह सर्वभूतानीति ते च हृदयपुंडरीके स्थिताः ननु तेषां कुतो हृद्यवस्थानमित्याशंक्य हृदयं
तर्यामिणो विज्ञानमयकारेण परिणामवदित्याह तदुपादानेति १७२ ॥ यंत्रारूढानि दूषयन्नाह यंत्रारोहपाठमर्थ

इदानीं श्लोकद्वयप्रत्ययमायापदयोरर्थमाह विज्ञानमयरूपेणेति ॥१८॥ श्रौतस्य यमयति इतिपदस्यार्थं यमेवा र्थं इत्याह अंतर्यामयतीति ॥ उक्तव्याख्यानं पर्यायांतरेष्वप्यतिदिशति पृथिव्यादीति ॥१९॥ प्रवृत्तिजातस्य सर्वस्येश्वराधीनत्वे वचनांतरमुदाहरति ॥ जानामीति ॥२०॥ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति हरति ॥ नार्थ इति अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः ॥२१॥

विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः स्वशक्त्येशो विक्षिपते मायया भ्रामणं हि तत् ॥१८॥ य
अंतर्यमयतीत्युक्त्या यमेवार्थः श्रुतौ श्रुतः पृथिव्यादिषु सर्वत्र न्यायं ये योज्यतां धियः ॥१९॥ यो
जानामि धर्मं न च मे प्रवृत्तिर्जानामि पापं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा
नियुक्तोऽस्मि तथा करोमि ॥२०॥ नार्थः पुरुषकारेणेत्येवं माशंक्यतां यतः । ईशः पुरुषकारस्य
रूपेणापि विवर्तते ॥२१॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां । तथापीशस्य बोधेन स्वात्मासंगत्व

ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे यमयति भ्रामयति इति प्रतिपादितमंतर्यामिप्रेरणं व्यर्थं स्यादित्याशंक्य तद्बोधेन स्वात्मासंगत्वज्ञानलक्षणफलस्य सत्त्वान्नैवमिति परिहरति ॥ ईदृग्बोधेनेति ॥ ईदृग्बोधेनेश्वरस्य पुरुषाकारादि

आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह तावतेति ॥ श्रुतिस्मृत्युदितस्यानतिलंघनीयत्वे स्मृतिं द
र्शयति ॥ श्रुतिस्मृतीति ॥ १७९ ॥ श्रुत्यापीश्वरस्याज्ञाया भीतिहेतुत्वमुक्तमित्याह आज्ञायाभीतीति ईश्वर
स्याभीतिहेतुत्वं किमुक्तमित्याशंक्य सर्वैश्वरत्वस्यांतर्यामित्वतः पार्थक्यसिद्धये इति मत्वाह ॥ सर्वैश्वरत्वमिति
॥ १८० ॥ वीहितं तत्रेश्वर एव नियामक इत्यत्र श्रुतिद्वयमाह ॥ एतस्येति ॥ १८१ ॥ केन प्रपंचस्यैव योनिरित्यस्यार्थमा

तावतामुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा ॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं ॥ १७९ ॥
आज्ञायाभीतिहेतुत्वं भीषास्मादिति हि श्रुतं सर्वैश्वरत्वमेतत्स्यादंतर्यामित्वतः पृथक् ॥ १८० ॥
एतस्य वा अक्षरस्यैव प्रशासन इति श्रुतिः ॥ अंतः प्रविष्टः शास्ता योजनानामिति च श्रुतिः ॥ १८१ ॥
जगद्योनिर्भवेदेषः प्रभवाप्ययकृत्वतः आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ॥ १८२ ॥ ॥

ह जगद्योनिरिति ॥ प्रतिज्ञातार्थे प्रभवाप्ययौ हि भूतानामिति वाक्यं हेतुत्वेन योजयति ॥ प्रभवेति प्रभवाप्य
यावुत्पत्तिप्रलयौ तत्कर्तृत्वाद्योनिरित्यर्थः ॥ उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थमाह ॥ आविर्भावेति उत्पत्ति ॥ १३८ ॥
प्रलयावाविर्भावतिरोभावौ मताविति योजना ॥ १८२ ॥ रामरामराम रामरामरामराम रामरामराम

भित्र विषमसत्ताकार्योत्पत्तिः विवर्तः २

आविर्भावकारित्वं सदृष्टान्तमुपपादयति आविर्भावयतीति यथा संकुचि[illegible]त्र पटः स्वस्व प्रसारणेन स्वचित्राणि चित्राणि आविर्भावयति एवमीशोऽपि इत्यर्थः ॥१८३॥ तस्यैव प्रत्यकारणत्वं दर्शयति पुनरिति स एव पटः संकुचितश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः ॥१८४॥ उभौ आविर्भावतिरोभावयोर्दृष्टान्तरमाणिद

आविर्भावयति स्वस्मिन् विलीनं सकलं जगत् प्राणिकर्मवशादेष पटो यद्वत् प्रसारितः ॥१८३॥
पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् प्राणिकर्मक्षयवशात् संकोचितपटो यथा ॥१८४॥
रात्रिघस्त्रौ सन्निवेशौ यथा उन्मीलननिमीलने तूष्णीभावमनोराज्यवत् स्युरिलया विभोः ॥१८५॥
आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना आरंभपरिणामादिचोद्यं नात्र संभवः ॥ ॥१८६॥

र्शयति रात्रिघस्त्रौ इति घस्रोऽहः ॥१८५॥ ननु ईश्वरस्य जगद्योनित्वे आरंभकत्वेन किं वा तदाकारपरिणामत्वेन नाद्यः अद्वितीयस्य द्विमात्रारंभकत्वायोगान्न द्वितीयः निरवयवपरिणामासंभवादित्याशंक्य विवर्तवादाश्रयणान्नायं दोष इति परिहरति ॥ आविर्भावेति ॥१८६॥ राम राम राम राम ॥

समसत्ताककार्योत्पत्तिः परिणामः

पं०वि०

॥ श्रीः ॥

२५

नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशंक्य सत्त्वप्राधान्येनोपाधिप्रधान्येन चेतनाचेतनोपादानं भविष्यतीत्याह ॥ अचेतनानामिति ॥ १८ ॥ ननु मायाशबलेश्वरस्य जगत्कारणत्वं श्रुतिप्रतिपादनमनुपपन्नं श्रुतेरीश्वराश्रयैः परमात्मनः एव तदभिधानादिति शंकते तं प्रधानइति द्वाभ्यां ॥ तमःप्रधानः

अचेतनानां हेतुः स्यात्त्राऽऽद्यो यो ईश्वरस्तथा चिदाभासं प्राप्तत्वेषु वानां कारणं भवते ॥ १८ ॥ ते

तमःप्रधानं दृष्ट्वा णां चित्प्रधानश्चिदात्मनां ॥ परः कारणता मे भावनाज्ञानकर्मभिः ॥ १९ ॥

इति वार्तिककारेण जडचेतनहेतुता परमात्मन एवोक्ता नेश्वरस्येच्चेत तत ॥ १९ ॥ ॥

अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः किं न कल्पयावत्तेश्वरेश्वरः ॥ २० ॥

तमोगुणप्रधानमायोपाधिकः देवानां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारं ज्ञानं देवताध्यानादि कर्म पुण्यपापरूपलक्षणं तैर्निमित्तभूतैरित्यर्थः ॥ १९ ॥ १९ ॥ ईश्वरपदार्थ इव तत्पदार्थेप्यधिष्ठानारोपयोरन्योन्याध्यासस्याविविक्तत्वान्नैमित्तिपरिहरति अन्योन्याध्यासमिति

॥ श्रीः ॥

॥ श्री ॥ ॥ ॥ ॥ ॥

ननु स्वरेश्वराचार्यैरीश्वरजीवयोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवहृतस्त इति कुतोऽवगम्यत इत्याशं
क्य श्रुत्यर्थपर्यालोचनवशात्तद्दर्शयितुं श्रुतिमर्थतः पठति सत्यं ज्ञानमिति ॥१२१॥ भवत्वेवं श्रु
तिरनया कथमन्योन्याध्यासोऽवगत इत्यत आह आपातेति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य नि
र्गुणस्य ब्रह्मणो जगत्कारणजगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमापाततः प्रतीय

सत्यं ज्ञानमनन्तं यद्ब्रह्म तत्तस्य मुख्यता । खं वाय्वग्निर्जलोर्व्योषध्यन्नदेहा इति श्रुतिः १२१॥
आपातदृष्टितस्तत्र ब्रह्मभातिहेतुता । हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते १२२॥
अन्योन्याध्यासरूपोऽसौ लिप्तः पटो यथा घटितैनैकतामेति तद्वद्भ्रान्त्यैकतां गतः १२३॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः ॥ तद्वद्ब्रह्मेशयोरैक्यं पश्यन्त्यापातदर्शिनः ॥१२४॥

मानमन्योन्याध्यासमन्तरेण न घटत इति भावः ॥१२२॥ एवमन्योन्याध्यासः सिद्ध ईश्वरब्रह्मणोरेकत्वप
र्यवसायीत्याह तद्घटितेति पटदृष्टान्तेन स्फुटयति अन्योन्याध्यासेति ॥१२३॥ भ्रान्त्यैकत्वापत्तौ दृष्टान्तमभि
धायापातदर्शिनां भेदाप्रतीतौ वैशद्येन दृष्टान्तान्तरं दर्शयति मेघाकाशेति ॥ ऐक्यं पश्यन्तीति न भेदमित्य

पं॰ वृ॰

॥ श्रीः ॥

नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशंक्य सत्वप्रधान्येनोपाधिप्रधान्येन चेतनाचेतनोपादानं भविष्यतीत्याह ॥ अचेतनानामिति ॥ १८७ ॥ ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शंकते तमःप्रधान इति द्वाभ्यां ॥ तमःप्रधानः

अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा ॥ चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ॥ १८७ ॥ ने
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां ॥ परः कारणतामेति भावनाज्ञानकर्मभि ॥ १८८ ॥
इति वार्तिककारेण जडचेतनहेतुता ॥ परात्मन एवोक्ता नेश्वरस्येति चेच्छृणु ॥ १८९ ॥ ॥
अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ॥ १९० ॥

तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारं ज्ञानं देवताध्यानादि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः ॥ १८८ ॥ १८९ ॥ तत्पदार्थ ईश्वरस्तत्पदार्थैकदेशाधिष्ठानयोरन्योन्याध्यासस्याविवक्षितत्वान्नैवमिति परिहरति अन्योन्याध्यासमिति

॥ श्रीः ॥

ननु प्रवरेश्वराचार्यैरीश्वरजीवयोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवहृत्य इति कुतोऽवगम्यत इत्याशं
क्याश्रुत्यर्थपर्यालोचनवशात्तद्दर्शयितुं श्रुतिमर्थतः पठति सत्यं ज्ञानमिति ॥१२१॥ भवत्वेवमाश्रु
तिरन्यान्या कथमन्योन्याध्यवगतिरित्यत आह आपातेति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य नि
र्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमापाततः प्रतीय

सत्यं ज्ञानमनंतं यद्ब्रह्म तस्मात्समुत्थिता । खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥१२१॥
आपातदृष्टितस्तत्र ब्रह्म भातीति हेतुता ॥ हेतोरसत्यता तस्मादन्योन्याध्यास इष्यते ॥१२२॥
अन्योन्याध्यासरूपोऽसौ लिप्तः परोऽयथा घटे तैनैकतामेति तद्वज्जीवैकतां गतः ॥१२३॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः ॥ तद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः ॥१२४॥

मानमन्योन्याध्यासमंतरेण न घटत इति भावः ॥१२२॥ एवमन्योन्याध्यासमित्यत्र मीश्वरब्रह्मणोरेकत्वंप
वीदाहृतघटितपटदृष्टांतेस्तोन ह दृढयति अन्योन्याध्यासेति ॥१२३॥ भ्रांत्यैकत्वापत्तौ दृष्टांतमभि
धायापातदर्शिनां भेदाप्रतीतेर्वीजमेव दृष्टांतांतरं दर्शयति मेघाकाशेति ॥ ऐक्यं पश्यंतीति न भेदमित्य

पं॰ त्रि

॥ २५ ॥

श्रुतेस्तात्पर्यं ब्रह्मणे शायेत्यौर्भेदावगतिरित्यत आह उपक्रमादीति उपक्रमसंहारावभ्यासोऽपूर्वता फलं
अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तैः षड्भिर्लिंगैः तात्पर्यावधारणे सति ब्रह्मा
संगं मायावी स्वविधेत्यवगम्यते इति शेषः ॥१५॥ उक्तावुपक्रमोपसंहारैकरूप्यदर्शनेनोक्तं ब्रह्मणोऽसं
गत्वं स्पष्टयति सत्यमिति अतोऽसंगत्वनिर्णयो भवतीति शेषः ॥ ॥ मायाविन ईश्वरस्य स्रष्टृत्व

उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात् असंगं ब्रह्म मायावी सृजत्येष महेश्वरः ॥१५॥
सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसंहृतं यतो वाचो निवर्तंते इत्यसंगत्वनिर्णयः ॥१६॥
मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥१७॥
आनंदमय ईशोऽयं बहु स्यामित्यवैक्षत हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नोपमो भवेत् ॥१८॥ इ

प्रतिपादकां श्रुतिमर्थतो दर्शयति मायी सृजति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया स
न्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तस्मिन् तत्र जगति बंधं दर्शयतीत्यर्थः ॥१७॥ एवमा
नंदमयस्येश्वरस्य जगत्कारणत्वं श्रुतिमुदाहरन् जगदुत्पत्तिप्रकारमाह आनंदमयेति ईक्षित्वा

॥ २५ ॥

तस्माद्वा एतस्मादात्मनः आकाशः तद् इत्यादौ क्रमेण सृष्टिश्रवणात् इदं सर्वमसृजतेति युगपच्छ्रवणाच्च एकस्य

कार्यत्वे कस्य वा हेयत्वमित्याकांक्षायां श्रुतिद्वयं तु प्रतीतत्वादुभयं ग्राह्यमित्याह। क्रमेणेति एषा जगत्सृष्टिर्द्विवि

धश्रुतिसद्भावात्क्रमेण युगपद्वा प्रतीयतेति योजना। तत्रोपपत्तिः द्विविधस्वप्नदर्शनादिति लोके क्रमयुक्तस्य अ

क्रमयुक्तस्य च बहुपदार्थजातस्यादितिभावः ॥१२८॥ हिरण्यगर्भस्य स्वरूपं निरूपयति सूत्रात्मेति॥ सूत्रात्माप

क्रमेण युगपच्चैषा सृष्टिर्ज्ञेया श्रुतिः द्विविधश्रुतिसद्भावाद्द्विविधस्वप्नदर्शनात् ॥१२८॥

सूत्रात्मा सूक्ष्मदेहाख्यः सर्वं घनात्मकः ॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिमान् २९॥

प्रत्यूषे वा प्रदोषे वा मग्नो मन्दे तमस्ययं ॥ लोको भाति यथा तद्वत्स्पष्टं जगदीक्ष्यते ॥ ३०॥ ॥

टे स्वप्न इव जगत्यनुस्यूतः आत्मा यस्य सः सूक्ष्मदेहाख्यः सूक्ष्मदेह इत्याख्या यस्य स तथाविधः सर्वजीव

घनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः तत्र हेतुः सर्वाहंमानधारित्वादिति

सर्वेषु व्यष्टिलिंगशरीरेष्वहमभिमानवत्त्वादिति भावः इच्छाज्ञानक्रियाशक्तिमांश्च ॥२९॥ हिरण्यगर्भावस्थायां

जगत्प्रतीतौ दृष्टांतमाह प्रत्यूषे ॥ प्रत्यूष उषःकालः ॥३०॥ रामराम राम राम राम रामराम

पंचि.

नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशंक्य सत्त्वप्रधान्येनोपाधिप्रधान्येन चेतनाचे
तनयोरुपादानं भविष्यतीत्याह ॥ अचेतनानामिति ॥१८७॥ ननु मायाविन ईश्वरस्य जगत्कारणत्वं प्रतिपाद
नमनुपपन्नं सुरेश्वराचार्यैः परात्मनः एव तदभिधानादिति शंकते तमःप्रधान इति द्वाभ्यां ॥ तमःप्रधानः

अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ॥१८७॥ ने
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां ॥ परः कारणतामेति भावनाज्ञानकर्मभिः ॥१८८॥
इति वार्तिककारेण जडचेतनहेतुता परात्मन एवोक्ता नेश्वरस्येति चेन्न तत् ॥१८९॥ ॥
अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ॥१९०॥

तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारं ज्ञानं देवताध्या
नादि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः ॥१८८॥१८९॥ तत्पदार्थ इव तत्त्वदार्थेप्यधिष्ठानारो
प्ययोरन्योन्याध्यासस्याविदितत्वान्नैवमिति परिहरति अन्योन्याध्यासमिति

ननु जीवेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवहृत्य इति कुतोऽवगम्यत इत्याशं
क्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यंज्ञानमिति ॥१२१॥ भवत्वेवं श्रु
तिरनया कथमन्योन्याध्यासोऽवगत इत्यत आह आपातेति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य नि
र्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमापाततः प्रतीय

सत्यं ज्ञानमनंतं यद्ब्रह्म तस्मात्समुत्थिताः । खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥१२१॥
आपातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता । हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ॥१२२॥
अन्योन्याध्यासरूपोऽसावन्नलिप्तः पटो यथा । घट्टितेनैकतामेति तद्वद्भ्रांत्यैकतां गतः ॥१२३॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः ॥ तद्वद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः ॥१२४॥

मानमन्योन्याध्यासमंतरेण न घटत इति भावः ॥१२२॥ एवमन्योन्याध्यासं सिद्धमीश्वरब्रह्मणोरेकत्वप्र
तीदाहृत्य दृष्टांतपटदृष्टांतेन स्मरणेन दृढयति अन्योन्याध्यासेति ॥१२३॥ भ्रांत्यैकत्वापत्तौ दृष्टांतमभि
धायापातदर्शिनां भेदाप्रतीतावपि दृष्टांतमेव दृष्टांतांतरं दर्शयति मेघाकाशेति ॥ ऐक्यं पश्यंतीति न भेदमित्य

पं॰ त्रि

॥ १५५ ॥

उपक्रमादीति उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं
श्रुते सार्थे ब्रह्मेशयोर्भेदावगतिरित्यत आह उपक्रमादीति
अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णय इत्युक्तैः षड्भिर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्म
संगं मायावी स्त्रष्टृत्वं गम्यत इति शेषः ॥१५५॥ श्रुतावुपक्रमोपसंहारैकरूपदर्शनेनासंगं ब्रह्मणोऽसं
गत्वं स्पष्टयति सत्यमिति अतोऽसंगत्वनिर्णयो भवतीति शेषः ॥१५६॥ मायाविन ईश्वरस्य स्वरूपत्व

उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात् असंगं ब्रह्म मायावी सृजत्येष महेश्वरः ॥१५५॥
सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसंहृतं यतो वाचो निवर्तंते इत्यसंगत्वनिर्णयः ॥१५६॥
मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥१५७॥
आनंदमय ईशोऽयं बहु स्यामित्यवैक्षत हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत् ॥१५८॥ ब

प्रतिपादकां श्रुतिमर्थतो दर्शयति मायीति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया स
न्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तस्मिंस्तत्र जगति बद्धत्वं दर्शयतीत्यर्थः ॥१५७॥ एवमा
नंदमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह आनंदमयेति ईक्षित्वा

॥ १५५ ॥

तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादौ क्रमेण श्रुतिश्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्चैकस्यो
त्पादेपद्वयं कस्य वा हेयत्वमित्याकांक्षायां श्रुतिद्वयेपेतत्वादुभयं ग्राह्यमित्याह। क्रमेणेति एवं जगतः सृष्टिर्द्विवि
धा क्रमेण युगपच्चेत्यर्थ। श्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुति सृष्टिर्योतियोजना। तत्रोपपत्तिः द्विविधस्य प्रदर्शनादिति लोके क्रमयुक्तस्य अ
क्रमयुक्तस्य च स्तुत्यपदार्थजातस्य दर्शनादिति भावः॥१२६॥ हिरण्यगर्भस्य स्वरूपं निरूपयति सूत्रात्मेति॥ सूत्रात्माय

क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुतिः। द्विविधश्रुतिसद्भावाद्द्विविधस्य प्रदर्शनात्॥१२६॥
सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिमान्॥१२७॥ प्र
त्यूषे वा प्रदोषे वा मग्नो मंदे तमस्ययं॥ लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते॥१२८॥

दृ स्तत्रमिव जगत्यनुसृतः आत्मा स्वरूपं यस्य सः सूक्ष्मदेहाख्यः सूक्ष्मदेह इत्याख्या यस्य स तथाविधः सर्वजीव
घनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः तत्र हेतुः सर्वाहंमानधारित्वादिति
सर्वेषु व्यष्टिलिंगशरीरेष्वहमभिमानवत्वादिति भावः इच्छाज्ञानक्रियाशक्तिमांश्च॥१२७॥ हिरण्यगर्भावस्थायां
जगत्प्रतीतौ दृष्टांतमाह प्रत्यूष इति॥ प्रत्यूषे उषःकालः॥१२८॥ राम राम

राम राम राम राम राम

पं॰वि॰

एवंलोकप्रसिद्धदृष्टान्तमभिधाय यथा धौतइति पूर्वोक्तश्लोके भिहितं लांछितपटं दृष्टान्तयति सर्वतइति यथा
घट्टितपटो मषीमयैराकारविशेषैर्लांछितो भवति तथा मायिवृत्तिरीश्वरस्य वपुः पंचीकृतभूतकार्यैर्लिंगशरी
रैः लांछितमित्यर्थः ॥१२.२॥ बुद्ध्यादेरुपायवैभवाद् दृष्टान्तरमाह सस्यंवेति १२.३ एवं सत्त्वात्मस्वरूपं विशदीकृत्य तत
स्यैवावस्थाभेदं पंचीकृतभूतकार्यस्याधिकं विराजं दृष्टान्तत्रयेणाविष्करोति आतपाभातेति ॥ सूर्योदृष्टान्तान्तरमाह

सर्वतो लांछितो मष्या पश्यास्मात् घट्टितः पटः सत्त्वाकारैस्तथेशस्य वपुः सर्वत्र लांछितं ॥१२.२॥
सस्यं वा शाकजातं वा सर्वतोंकुरितं यथा कोमलं तद्वदेवैष पेलवो जगदंकुरः ॥१२.३॥ ॥
आतपाभातिलोको वा पटो वा वर्णपूरितः सस्यं वा पलितं यद्वत्तथा स्पष्टवपुर्विराट् ॥१२.४॥
विश्वरूपाध्याय एवत्तु तैः सन्नैः पिपीलकादये ॥ धात्रादिस्तंबपर्यंतानेतस्यावयवान्विदुः ॥१२.५॥
ईश्वरस्तत्र विराड् द्रुघा विष्णुरुद्रेन्द्रवह्नयः ॥ विघ्नभैरवमैरालमारिकायक्षराक्षसाः ॥१२.६॥
विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः अश्वत्थवटचूताद्या यवव्रीहितृणादयः ॥१२.७॥

येनप्रकाशितोलोकः आतपाभातिलोकः ॥१२.४॥ तेद्रावेप्रमाणमाह विश्वरूपेति विश्वरूपाध्यायादौ कीदृक्
रूपमुदितमित्याकांक्षायां वृत्तान्तिः स्तंबपर्यंतं जगद्रूपमुदितमित्याह धात्रादीति ॥१२.५॥ एतावता प्रकृतेः किमा

२०८॥ तं यथा यथोपासते तत्तदेव भवतीति श्रुतिस्तात्पर्यं जातस्तत्तत्फलसद्भावे प्रमाणमित्याह यथेति ननु स
र्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूज्यानामधिष्ठानानां पूजानां च सात्त्विकादिभेदेन वैषम्यमि
त्याह फलोत्कर्षेति २०९॥ संसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवतीत्याशंक्य ज्ञानव्यतिरेकेण
न केनापि भवतीत्याह मुक्तिस्त्विति तत्र दृष्टांतमाह स्वप्नबोधमिति स्वजागरणमंतरेण स्वनिद्राकल्पितस्व

जले पाषाणमृत्काष्ठवंशस्वकुद्दालकादयः। ईश्वराः सर्व एवैते पूजिताः फलदायिनः॥ २०८॥
यथा यथोपासते तं फलमीयुस्तथा तथा। फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः॥ २०९॥
मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा। स्वप्नबोधं विना नैव स्वस्वप्नो हीयते तथा॥ २१०॥
अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत्। ईशजीवादिरूपेण चेतनाचेतनात्मकं॥ २११॥ जगतः

प्नो यथा न निवर्तते तथा ब्रह्मतत्त्वज्ञानमंतरेण तदज्ञानकल्पितस्वसंसारो न निवर्तते इति भावः २१०॥ ननु
द्वैतनिवृत्तिलक्षणाया मुक्तेः स्वप्नदृष्टांतेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्यस्य स्वप्नतुल्यत्वाभावा
दित्याशंक्यान्यथारूपत्वेनास्य स्वप्नतुल्यमस्त्येव त्रयमेतत् जाग्रत्सुषुप्तस्वप्नं मायामात्रमिति श्रुत्याभिहितत्वा
न्नैवमित्याह॥ अद्वितीयेति ईशजीवादिरूपेण वर्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्ति अयमद्वितीयब्र

पं॰ वि॰
॥ ९३ ॥

नन्वीशजीवयोर्ब्रह्मभिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपातित्वमित्याह
आनंदमयेति ॥२१२ ताभ्यां सर्वं कल्पितमित्युक्तं तत्र केन किं यत्कल्पितमित्याकांक्षायामाह ईक्षणादीति ॥ सऐ
क्षत लोकान्नु सृजा इत्यादिकं यैत यादृशं प्रपञ्चितं तत्सर्वं तया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृकेति तस्य त्रयं
प्रवेश्याद्इत्यादिकं यासारत्नमेव पुरुषं ब्रह्म ततमपश्यदित्यंतं तया प्रतिपादितः संसारो जीवकर्तृक इत्यर्थः ॥२१३ ननु

आनंदमयविज्ञानमयावीश्वरजीवकौ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं ॥२१२ ईक्षणादिप्रवेशांता
सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षांतः संसारो जीवकल्पितः ॥२१३ अद्वितीयं ब्रह्मतत्त्वमसंगं तन्न जानते ॥
जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः ॥२१४॥ ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयं ॥ अनुशोचाम एवान्यान्न
भ्रांतैर्विवदामहे ॥२१५ तृणार्चकादियोगांता ईश्वरे भ्रांतिमाश्रिताः लोकायतादिसांख्यांता जीवविभ्रांतिमाश्रिताः ॥२१६॥

ब्रह्मण एव पारमार्थिकत्वे वादिनां जीवेश्वरतत्त्वविषया विप्रतिपत्तिः कुत इत्याशंक्य श्रुतिसिद्धतत्त्वज्ञानशून्यत्वा
दित्याह ॥ अद्वितीयमिति ॥२१४॥ जीवेश्वरविषयायां वादिविप्रतिपत्तौ तत्त्वज्ञानमलत्वेन तया विघातः स्वेन ते बोध
दित्याह ॥ ज्ञात्वा सदेति ॥२१५॥ ईश्वरे जीवे च भ्रांत्या विप्रतिप[illegible]दिनो विभ
जीसा इत्याशंक्य रूपाश्रमत्वा न्नेत्याह ॥ तृ

॥ ९३ ॥

कुतो भ्रांतत्वं तेषामित्यत आह अद्वितीयमिति ततः किं तत्राह तेषामिति परिगृहीतपदप्रतिपादितनाभिनि
वेशेन चित्तविश्रांत्यभावान्नैहिकमपि सुखं तेषामित्याह क्वेह वा सुखमिति ॥२१७॥ ननु तेषां ब्रह्मविद्याभा
वेपि इतरविद्याप्रयुक्त उत्तमाधमभावो दृश्यते अत उत्तमत्वप्रयुक्तं सुखं केषांचित्स्यादित्याशंक्य तस्य मुमु
क्षुभिरनादरणीयत्वं दृष्टांतेनाह उत्तमेति २१८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान्मुमुक्षुभिस्तत्र मति

अद्वितीयब्रह्मतत्त्वं न जानंति यदा तदा ॥ भ्रांता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखं ॥२१७॥
उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं ॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते खलु ॥२१८॥
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च तत् ॥२१९॥
पूर्वपक्षतया तौ चेत्तत्त्वनिर्णयहेतुतां प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैतावता वशः ॥२२०॥

र्निवेशनीयेत्युपसंहरति तस्मादिति तर्हि किं कर्तव्यमित्याशंक्य ब्रह्मेति विचारेण ब्रह्मबोध एव कर्तव्य इत्याह ॥
किंत्विति ॥२१९॥ ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेव
बुद्धिर्न परिसमाप्नोतीत्याह ॥ पूर्वपक्षेति एतावता पूर्वपक्षतया तत्त्वनिर्णयहेतुत्वसंभवेन तयोर्जीवेशवा
दयोर्वशो विवेकज्ञानशून्यो न निमज्जेस्विति योजना ॥२२०॥ रामराम रामराम राम रामॐ

शुद्धौ

ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन महद्भिरप्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंकते
असंगाविदिति सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेपि तयोर्वास्तवभेदस्य तैरंगीकारान्नाय
मस्मास्विष्टं त इत्याह अत्रापीति ॥२१॥ न तत्त्वमिति तत्त्वंपदयोरुभावस्मास्विष्टं तत्त्वेन गतावितियोजना ॥
ननु कूटस्थब्रह्मशब्दाभ्यामग्रे तौ तत्त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपितावित्याशंक्याह अद्वैतबोधनायैवेति ।
लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनाख्यातौ न तु तयोर्भेदः प्रतिपाद्यत इति भावः ॥२२१॥

असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः ॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेच्छृणु ॥२२१॥
न तत्त्वमोरुभावर्थावस्मत्सिद्धान्ततां गतौ अद्वैतबोधनायैव सा कक्षा काचिदिष्यते ॥२२२॥
अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ मन्यन्ते तद्व्युदासाय केवलं शोधनं तयोः ॥२२३॥
अत एवात्र दृष्टान्तो योग्यः प्राक्सम्यगीरितः । घटाकाशमहाकाशजलाकाशाभ्रखात्मकः ॥२२४॥

२२२ तर्हि पदार्थशोधनं किमर्थमित्यत आह अनादिमाययेति ॥ अत्र मायाशब्देन स्वाश्रयव्यामोहिकाऽवि
द्यालक्ष्यते तया विपरीतज्ञानं प्राप्ताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थि
कं मन्यन्ते अतस्तन्निवृत्त्यर्थं शोधनं क्रियत इत्यर्थः ॥२२३॥ पदार्थशोधनप्रकारमेव दिदर्शयिषुस्तदुपा

॥ २५॥ ब्रह्मतस्य व्यामोहिकाऽविद्यार

अविद्यानिवृत्त्यर्थं

मायिकत्वं व्यवस्थापयेदित्याशंक्य तस्या दुर्घटकारित्वस्वाभाव्यात् इत्याह दुर्घटमिति बंधस्याविद्यकत्वे पि मोक्षो
वास्तवो भ्युपेयतव्य इत्याशंक्याह श्रुतिविरोधान्नैवमित्याह ॥ वास्तवौ ति न सहते तेतरामतितरां नैव सहत इत्यर्थः ॥ बं
धमिव मोक्षमपि वास्तवं न सहत इति भावः २३४ ॥ मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति ॥ न निरोध इति ॥ नि
रोधो नाशः उत्पत्तिर्देहसंबंधः बद्धः स्वबद्धः स्वादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसं

दुर्घटं घटयामीति विरुद्धं किं न पश्यसि ॥ वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते तरां ॥ २३४ ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ २३५ ॥
मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ । यथेष्टं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि ॥ २३६ ॥
कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि ॥ घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् २३७ ॥

पन्नः मुक्तः निवृत्ताविद्यः इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः २३५ ॥ एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुप
संहरति मायाख्याया इति २३६ ॥ ननु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वे कूटस्थब्रह्मणोः पारमार्थिक
त्वेन तद्भेदो पि पारमार्थिकः स्यादित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति कूटस्थ

पं॰ वि॰

एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह यदद्वैतमिति सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि
ति श्रुतौ यदद्वितीयं वस्तु प्रतिपादितं तदेव कालत्रयेप्यबाध्यत्वेन वास्तवं न भेद इति भावः। कुतस्तर्हि सर्वे भेदाभि
निवेशाः क्रियंत इत्यत आह वृथा मायेति। तत्वज्ञानरहितत्वादभिनिवेशं कुर्वंतीति भावः ३२ ननु प्रपंचस्य मा
यामयत्वं तत्वस्याद्वितीयत्वं च ये वर्णयंति तेपि संसरंतो दृश्यंते अतः तत्वज्ञानेन किं प्रयोजनमिति शंकते। ये वदंती
ति कर्मवशात्केषांचिद्व्यवहारे सत्यपि पूर्ववदभिनिवेशाभावान्नैवमिति परिहरति। न यथापूर्वमिति ३३ ऐ॰ ज्ञा

यदद्वैतं श्रुतेः सृष्टेः प्राक्तदेवाद्य चोपरि। मुक्तावपि वृथा माया भ्रामयत्यखिलान् जनान्॥ ३२॥
ये वदंतीत्थमेतेपि भ्राम्यंते विद्ययात्र किं। न यथापूर्वमेतेषामत्र भ्रांतेरदर्शनात्॥ ३३॥
ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः। न भाति नास्ति चाद्वैतमित्यज्ञानिविनिश्चयः॥ ३४॥
ज्ञानिनां विपरीतोस्मान्निश्चयः सम्यगीक्ष्यते। स्वस्वनिश्चयतो बद्धो मुक्तोहं चेति मन्यते॥ ३५॥

निनां भ्रांत्यभावं दर्शयितुमज्ञानिनां निश्चयं तावदाह। ऐहिकामुष्मिकमिति। इहलोके भव ऐहिकः पुत्रक
लत्रादिपोषणरूपः अमुष्मिन्परलोके भव आमुष्मिकः स्वर्गसुखाद्यनुभवरूपः ३४ तत्वविदां निश्च
यस्तद्वैलक्षण्यं दर्शयति ज्ञानिनामिति अद्वैतं पारमार्थिकं भाति च संसारस्त्वपारमार्थिक इति निश्च

अद्वैते भातीत्युक्तिः शास्त्रतत्त्वतएव नानुभवतः अतो न तत्र निश्चयः इति शंकते नाद्वैतमिति अनुभवागोचरत्वमसिद्ध
मिति परिहरति न चिद्रूपेणेति। घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूतस्फुरणरूपेण भासमानादित्या
र्थः। ननु चिद्रूपत्वस्य भाने पि तत्कार्त्स्न्येन न प्रतीयत इति शंकते अशेषेणेति साकल्येन भानाभावो द्वैतेपि समान
इत्याह द्वैतं किमिति २९२ एवं दोषसाम्यमभिधाय परिहारसाम्यमाह दिङ्मात्रेणेति दिङ्मात्रेणैकदेशेन द्वयोर्द्वैता
द्वैतयोरित्यर्थः एतावता कथं परिहारसाम्यमित्याशंक्याह द्वैतसिद्धवदिति नेतत्वपदे तावतैकदेशप्रतीतिसद्भावे

नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात् अशेषेण न भातं चेत् द्वैतं किं भासते खिलं ॥२९२॥
दिङ्मात्रेण विभाने तु द्वयोरपि समं खलु द्वैतसिद्धिवदद्वैतसिद्धिस्ते तावता न किं ॥२९३॥
द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं चिद्भानं त्वविरोधस्य द्वैतस्यातोऽसमे उभे ॥ २९४ ॥

न द्वैतसिद्धिवत् द्वैतनिश्चय इवाद्वैतसिद्धिरद्वैतनिश्चयेपि किं न भवति न किं तु भवत्येवेत्यर्थः २९३ पूर्ववादिप्रका
रान्तरेणाद्वैतासिद्धिं शंकते द्वैतेनेति अद्वैतं द्वैतरहितं तयोः परस्परविरोधात् तथा सति द्वैतप्रतीतावद्वैतं न संभव
तीत्यर्थः। ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैते प्रतिभासमाने द्वैतस्याप्यसिद्धिरिति चोद्यं समानमित्याशंक्या
ह। पूर्ववादी। चिद्भानमिति। भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वात्तस्याश्च द्वैतविरोधित्वाभावाद्वोभयोः

अद्वैतप्रतीति १

वा
॥३९१॥
पं वि

प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभाववास्तवाद्वैतविद्यातत्त्वमिति परिहरतीति श्लिष्टं ती एवं तर्हीति
प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणेऽप्रत्ययः परिशेषः २८५॥ परिशेषप्रकारमेव दर्शयति अचिंत्य
रचनेति न चिंत्या अचिंत्या रचना रूपं यस्य तत्तथाविधं सकलं जगन्मायैवमित्येवेत्यनेन प्रकारेण निर्वच
नीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वस्तुत्वमद्वैतमेव परिशिष्यतामित्यर्थः २८६॥ नन्वेवमद्वैतनिश्चयेऽपि

एवं तर्हि प्रपञ्चद्वैतमसन्मायामयत्वतः तेन वास्तवमद्वैतं परिशेषाद्विभासते ॥२८५॥
अचिंत्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य वस्तुत्वमद्वैते परिशिष्यतां ॥२८६॥
पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः परिशीलय को नु प्रयासस्तेन ते वद ॥२८७॥
कियन्तं कालमिति चेत् खेदो यं द्वैत दृश्यतां अद्वैते तत्र न युक्तो यं सर्वानर्थनिवारणात् २८८॥

तेऽपि पुनःपुनः द्वैतसत्यत्वं पूर्ववासनया भातीत्याशंक्य तन्निवृत्तये पुनःपुनर्मिथ्यात्वं विचारयेदित्याह पु
नर्द्वैतस्येति आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये आत्मनः श्रवणाद्यावृत्तेनस्य विहितत्वात् व्या
तेनेति भावः २८७॥ कियन्तं कालमित्यं विचारणीयमित्याशंक्य परोक्षा चापरोक्षा च विद्या द्वेधा विचारजा
तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते इति विचारकालावधेरुक्तत्वान्नाद्वैतविचारे ऽयं खेदो युक्तः किंतु

॥ ३९१ ॥

नन्वेवमद्वैतात्मतत्वापरोक्षज्ञानवत्यपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञान
स्यासिद्धमित्याशंकते क्षुत्पिपासादय इति किं मच्छब्दवाच्येऽहंकारे दृश्यंते उत मच्छब्दोपलक्षिते चिदात्मनीति
विकल्प्याद्यमंगीकरोति। मच्छब्दवाच्य इति। न द्वितीयः तस्यासंगत्वादविषयत्वाच्चेति वहिरेव द्रष्टव्यं श्लोके वस्तुतस्त
त्प्रतीत्यभावे भ्रांत्या तत्प्रसक्तिः स्यादित्याशंकते चिद्रूपेति एवं तर्हि अनर्थहेतोरध्यासस्य निवृत्तये सदा विवेकः क्रि

क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत् मच्छब्दवाच्येऽहंकारे दृश्यतां नेति को वदेत् ॥२४९॥
चिद्रूपेऽपि प्रसज्येरंस्तादात्म्याध्यासतो यदि माध्यासं कुरु किंतु त्वं विवेकं कुरु सर्वदा ॥२५०॥
झटित्यध्यास आयाति दृढवासनयेति चेत्। आवर्तयेद्विवेकं च दृढं वासयितुं सदा ॥२५१॥
विवेकेन द्वैतमिथ्यात्वं युक्त्यैवेति न भण्यतां। अचिंत्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी ॥२५२॥

यतामित्याह। माध्यासमिति। २५०। अनादिवासनावशात्पुनः पुनरध्यासागमनेन तन्निवृत्तये विवेक एवावर्तनीय
इत्याह झटित्यध्यासेति २५१। ननु विचारेण द्वैतस्य मायामयत्वं युक्त्यैव सिध्यति नानुभवत इत्याशं
क्याचिंत्यरचनात्वलक्षणमिथ्यात्वानुभवस्य स्वसाक्षिकत्वान्नैवमिति परिहरति विवेके द्वैतेति ॥२५२॥ अम

नन्वचिंत्यरचनात्वं मिथ्यापदार्थलक्षणमुक्तं चिदात्मनि व्याप्तमिति शंकते चिदप्यचिंत्यरचनेति प्रागभा
वयुतत्वेन तेति अचिंत्यरचनात्वं मिथ्यात्वलक्षणमिति विवक्षुरचिंत्यरचनात्वमात्मनोंगीकरोति तर्हि अस्ति
ति एवमंगीकारे ऽव्याप्तिस्त्वांत इत्याशंक्य परिहरति नो वयमिति वयं चितिं तु अचिंत्यरचनां नो ब्रूमः इति योजना
तत्र हेतुमाह नित्यत्वकारणादिति ॥१५३॥ चितेर्नित्यत्वे कुत इत्याशंक्य प्रागभावानुभवाभावादित्याह। प्राग
भावादिति यतश्चितेः प्रागभावो नानुभूयते ततो नित्येति योजना। इदमत्राकूतं चितेः प्रागभावोस्तीति वद
न्प्रष्टव्यः चित्प्रागभावः किं चितानुभूयते उतान्येन नत्वन्येन तस्य जडत्वेनानुभवितृत्वानुपपत्तेः चितानुभूयते इ
चिदप्यचिंत्यरचना यदि तर्हि अस्तु नो वयं चितिं तु अचिंत्यरचनां ब्रूमो नित्यत्वकारणात् ॥१५३॥
प्रागभावो नानुभूतश्चितेर्नित्या ततश्चितिः चैतन्यस्य प्रागभावस्तु चैतन्येनानुभूयते ॥१५४॥
त्यपि पक्षे किं चिदंतरेण उतस्वेनैव नाद्यः अद्वैतवादे चिदंतरस्यैवाभावात् तत्स्वीकारेपि चित्वमिति योगिकस्या
भावस्य चिद्ग्रहणमंतरेण ग्रहीतुमशक्यत्वात् तस्यापि गृह्यमाणत्वे घटादिवदचित्वापत्तेः नापि द्वितीयः
स्वाभावस्य स्वेन ग्रहीतुमशक्यत्वादिति ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभावस्य चैतन्ये नैवानुभवितुमशा
क्यत्वात्तदनुभवितृ ऽतदभावाच्च चैतन्यवदेव द्वैतस्यापि नित्यत्वापत्तिरित्याशंक्यानुभवितृतदभावोऽसि

एवं च प्रागभावयुतत्वे सत्यचिंत्यरचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावाद्द्वैतमिथ्यात्वं सिद्धमित्याह॥ प्रागभावयु
तमिति प्रागभावयुतमिति हेतुगर्भं तद्विशेषणं द्वैतं प्रागभावयुतत्वाद्घटादिवद्रच्यते हि तथापि रच्यमानत्वेपि
तस्य रचनाचिंत्या तेन रच्यमानत्वे सत्यचिंत्यरचनात्वेनेंद्रजालवदिंद्रजालिकप्रासादादिवन्मिथ्येत्यर्थः॥
२५४॥ चितिस्तावत्स्वप्रकाशत्वेन नित्यापरोक्षावभासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं तर्कैर्वचितानुभूयते इ

प्रागभावयुतं द्वैतं रच्यते हि घटादिवत्‌ तथापि रचनाचिंत्या मिथ्या तेनेंद्रजालवत्‌ ॥२५५॥
चितिप्रत्यक्षा ततोन्यस्य मिथ्यात्वं चानुभूयते नाद्वैतमपरोक्षं चेत्येतन्न व्याहतं कथं ॥२५६॥ ॥
इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यतां॥ चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः कुतो वद॥२५७॥

नि दर्शितं एवं च सत्यद्वैतस्यापरोक्षत्वं नास्तीति वदतो व्याघातश्च स्यादित्याह॥ चितिप्रत्यक्षेति॥ चिद्रूपेणावभासना
दित्यभिहितं युक्तिसमुच्चयार्थश्चशब्दः अद्वैतमपरोक्षं तेनेत्येतत्कथं न व्याहतं चेति योजना॥२५६॥ एवं वेदांता
र्थं जानतामपि पुरुषाणां केषांचिदत्र विश्वासः कुतो न जायत इति पृच्छति॥ इत्थमिति॥ सम्यग्विचारशून्यत्वा
दिति विवक्षुः प्रतिवंदीं गृह्णाति॥ चार्वाकादेरिति आदिशब्देन पाषाणाद्यो गृह्यंते प्रबुद्धस्याहापोहकुशलस्य॥२५७॥

प्रतिबंधविमोचनं शंकते सम्यग्विचार इति साम्येन समाधत्ते तथेति धीदोषादित्यनुषज्यते नु श्राद्ध एवं श्राद्धार्थः
२५८।। इत्थं तत्त्वे विचार्यं तत्र ज्ञानतत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादिकां श्रुतिं पठति यदा सर्वे इति अथ मर्त्यो
ऽमृतो भवत्यत्र ब्रह्म समश्नुते इत्यस्य मंत्रस्योत्तरार्द्धं अस्य मुमुक्षोर्हृदि श्रिता ये कामास्ता दात्म्याध्यासमूला इ
च्छादयः संति ते सर्वे यदा यस्मिन्काले प्रमुच्यंते तत्त्वज्ञानेनाध्यासनिवृत्तौ निवर्तंते अथ तदानीमेव मर्त्यः पूर्वं देहात्मा

सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा असंतृप्ताऽशास्त्रार्थं न तत्त्वे दत्तविशेषवत्तः २५८।।
यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः इति श्रौतं फलं दृष्टं नेति चेद्दृष्टमेवं तत्।।२५९।।

दात्म्याध्यासेन मरणशीलः पुरुषः अमृतो ऽध्यासाभावेन तद्रहितो भवति तत्र हेतुमाह अत्र ब्रह्म समश्नुत इति
अत्रास्मिन्नेव देहे ब्रह्म सत्यादिलक्षणं समश्नुते सम्यगाप्नोति इत्यस्याः श्रुतेरर्थः श्रुत्या प्रतिपादितं फलं का
मनिवृत्त्यादिलक्षणं नानुभवाम्यहं किं तु शास्त्रमेवेति शंकते इति श्रौतमिति समनंतरश्रुतिवाक्यतात्पर्यालो ति
चनतया तस्य दृष्टत्वं सिद्धमिति इत्यभिप्रायेण परिहरति।। दृष्टमेवं तदिति।।२५९।। रामरामएम ॐ ॐ ३३

तेस्य हृदि त्वेस्य श्रीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह। यदेति अनेन वाक्यविशेषेण कामप्रमोक्षस्य ग्रंथिभेदत्वेन व्या
ख्यातत्वाद्ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वान्नाप्रत्यपद्यते ति भावः वाक्य
विशेषत इत्यनेन वाक्येनेत्यर्थः २६० ननु लोके कामशब्देनेच्छाभेद एवोच्यते अतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्या
शंक्याध्यासमूलस्यैवेच्छाविशेषस्य कामशब्दवाच्यत्वेनेच्छामात्रस्येत्याह॥ अहंकारेति २६१॥ नन्वध्यासमूलस्यैव
यदा सर्वे प्रभिद्यंते हृदयग्रंथयः स्थितिवति कामा ग्रंथिस्वरूपेण व्याख्याता वाक्यशेषतः २६२॥ अहंकारचिदात्मानावे
कीकृत्याविवेकतः॥ इदं मेस्त्वादितीच्छा कामशब्दितः॥ २६३॥ अप्रवेश्य चिदात्मानं पृथक्पश्यन्नहंकृतिं इच्छंस्तु कोटिव
स्तूनि न बाधो ग्रंथिभेदतः २६४ ग्रंथिभेदेपि संभाव्या इच्छाः प्रारब्धदोषतः बुद्ध्वापि पापबाहुल्यादसंतोषो यथा तव २६५
कामस्य त्याज्यत्वे सतीतरोप्यभ्युपेतव्यः स्यादित्याशंक्याबाधकत्वादभ्युपेयत एवेत्याह। अप्रवेश्येति अहंकारे चिदात्मा
नमप्रवेश्य तादात्म्याध्यासेनान्नंतरभाव्येत्यर्थः॥ २६६॥ नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्यारब्ध
कर्मवशान्नेच्छाकामानामुत्पत्तिः संभवत्याह। ग्रंथिभेदेपीति। तत्र दृष्टांतमाह॥ बुद्ध्वापीति॥ २६७ ओम् ओम्

दिदंमेस्याप

अध्यासाभावे हंकारगतेछादेरबाधकत्वे दृष्टांतद्वयप्रदर्शनेन विशदयति अ हंकारगतेति यथा देहगतव्याध्यादिभि
रहंकारस्थादिगुणो बाधो नास्ति देहसंबंधरहितत्वात् यथा वृद्धादिगतैर्जन्मादि रेवमध्यासनिवृत्तावहंकारगतेछादिभि
रपीति भावः ॥२५३॥ चिदात्मनोऽसंगत्वस्यैकरूपत्वात्सर्वमपि कामादिभिर्बाधो नास्तीत्याशंकते ग्रंथिभेदादिति एवं
विधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वात् इदं बोधमस्मदनुकूलमित्याह । तन्नेति स्मरेति ॥२५४॥ एवं

अहंकारगतेछादेर्देहव्याध्यादिभिस्तथा वृद्ध्यादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत् २५५ ग्रंथिभेदात्पुराप्येवमिति
चेत्तन्न विस्मर अयमेव ग्रंथिभेदस्तावतेन कृती भवान् २५६॥ नैवं जानंति मूढाश्चेत्सोयं ग्रंथिर्न चापरः ग्रंथितद्भेदमा
त्रेण वैषम्यं मूढबुद्धयोः २५७॥ प्रवृत्तौ वा निवृत्तौ वा देहेंद्रियमनोधियां न किंचिदपि वैषम्यमस्त्यत्र ज्ञानिविबुद्धयोः ॥
२५८॥ व्रात्यश्रोत्रिययोर्वेदपाठापाठकृता भिदा ॥ नाहारादावस्ति भेदः सोयं न्यायोत्र योज्यतां ॥२५९॥ ओम् ॥

एवंविधज्ञानाभावो ग्रंथिरित्याह नैवं जानंतीति ननु ज्ञानिनोपीच्छाभ्युपगमे ज्ञान्यज्ञानिनोः कुतो वैलक्षण्यमित्याशंक्य ग्रंथि
भेदातिरेकेण न कुतोपीत्याह ॥ ग्रंथीति ॥२५७॥ कारणं तस्याभावमेव विशदयति प्रवृत्तौ वेति ॥२५८॥ उक्तार्थे दृष्टांतमि
त्याह व्रात्येति ॥२५९॥ ओम् ओम्

२९

तानि नेगं ग्रंथिरमन्त्वेगीतावाक्यंप्रमाणयति नद्वेष्टीति संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षति उदासीनवद्वर्ततइत्यर्थः ग्रंथिभिदा ग्रंथिभेदः ॥२६९॥ इदंवाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते औदासीन्यमिति विधिपरत्वे वद्धव्यर्थः स्यादिति परिहरति [illegible] नदेति तानि देहादेरकार्यत्वमत्वादप्रवर्तिनं न तु ग्रंथिभेदादित्याशंक्यापहरति ॥ न वाञ्छा ह्यस्येति ॥२७०॥ भवतु को दोषस्तत्राह । तत्त्वबोधमिति दुःसाध्यमसाध्यमित्यर्थः ॥२७१॥ न त्वस्थाने परिहासोयं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते भरतादेरिति श्रुतिमज्ञानान न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभिदोच्यते ॥२६९॥ औदासीन्यं विधेयं चेद्वच्छब्दव्यर्थतातदा न शक्ता ह्यस्य देहाद्या इति चेद्रोग एव सः ॥२७०॥ तत्त्वबोधं क्षयं व्याधिं मन्यंते ये महाधियः तेषां प्रज्ञाति विशदा किं तेषां दुःशकं वद ॥२७१॥ भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा जक्षन्क्रीडन्रतिं विंदन्नित्यश्रौषीन्न किं श्रुतिं ॥२७२॥ श्रौद्दपसीति परिहरति । तदा जक्षन्निति जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं नाश्रौषीरित्यर्थः जक्षन् भक्षयन् जक्षभक्षहसनयोरिति धातुः क्रीडन्स्वेच्छया विहरन् रममाणः स्त्रीभिर्नोपजनं स्मरन्निदं शरीरमिति उपजनं जनानां समीपे वर्त्तमानमिदं शरीरं न स्मरन्नानुसंदधानइ

तिः   श

अज्ञत्यादिकं २

ननु तर्हि पुराणस्य कामगतिरित्यादौ काष्ठपाषाणमध्यौदासीन्यबोधनपरं न प्रवृत्त्यभावपरमित्यभिप्रेत्याह नह्याहारादीति २७३
संगोपि कुतः त्यज्यत इत्यत आह संगी हीति॥२७४॥ ननु तर्हि मानससंगस्यैव त्याज्यत्वे तैः संगाशून्यानां बहिर्व्य
वहारवतां संगित्वादिकं जनैः कथमुच्यते इत्याशंक्य शास्त्रतात्पर्यज्ञानशून्यत्वादित्याह अज्ञात्वेति अज्ञातो मत द्रव्य
न ह्याहारादिसंत्यज्य भरताद्याः स्थिताः क्वचित् काष्ठपाषाणवत्किंतु संगभीता उदासते २७३ संगी हि बा
ध्यते लोकैर्निःसंगः सुखमश्नुते तेन संगः परित्याज्यः सर्वदा सुखमिच्छता २७४ अज्ञात्वा शास्त्रहृदयं मू
ढो वक्त्यन्यथान्यथा मूर्खाणां निर्णयस्त्वासतामांतमसिद्धांत उच्यते २७५ वैराग्यबोधोपरमाः सहायास्तेपर
२७५ स्परं प्रायेण सह वर्तंते वियुज्यंते क्वचित्क्वचित् हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः। यथावदवगंतव्यः
वहारो नात्र विचारणीय इत्याह। मूर्खाणामिति। तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह। आत्मसि
द्धांत इति २७५॥ कोसावित्यत आह॥ वैराग्यबोध इति २७६॥ वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनादभे
दाशंकायां तद्धेत्वादीनां भेदाद्भेदोवगंतव्य इत्याह॥ हेतुस्वरूपेति॥२७७॥ रामरामरामरामरामरामरामरामरामरामरामरामराम॥

मैत्रेय   मंतव्यो

तत्र वैराग्यस्य हेतुत्वादित्रयं दर्शयति। दोषदृष्टिरिति २७८ इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति। श्रवणादिति
आदिशब्देन मनननिदिध्यासने गृह्येते आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन
श्रवणादिविधानाच्छ्रवणादेर्ज्ञानहेतुत्वं तत्त्वमिथ्याविवेचनं कूटस्थस्याहंकारादेश्च भेदज्ञानं ग्रन्थेरनुदयो न्यो
न्याध्यासानुत्पत्तिः ॥२७९॥ उपरतेस्तान्दर्शयति। यमादिधीरिति॥ आदिशब्देन नियमादयो गृह्यन्ते। धीनि

दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता। मुख्य असाधारणहेत्वाद्या वैराग्यस्य त्रयोप्यमी ॥२७७॥
श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं पुनर्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ॥२८०॥
यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः स्युर्हेतुवौद्या उपरतेरित्यसंकर ईरितः ॥२८१॥
तत्त्वबोधः प्रधानं स्यात्साक्षान्मोक्षप्रदत्वतः बोधोपकारकावेतौ वैराग्योपरमावुभौ ॥२८२॥

रोधश्चित्तवृत्तिनिरोधलक्षणो योगः ॥२८०॥ किमेतेषां समं प्राधान्यमुत नेत्याशङ्क्याह तत्त्वेति तमेव विदित्वा
ति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेरित्यर्थः इतरयोस्तु उपकारित्वं ब्राह्मणो निर्वेदमायान्नास्त्य
मोदे: कृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं

कर्मणा   वैराग्य२॥

॥ पं.त्र. ध्यै. ॥ ३१ ॥

प्रायेण सह वर्त्तंते वियुज्यंते कश्चित् क्वचिदित्युक्तं तत्र कारणमाह अयेष्यंतेति अनेकजन्मार्जितपुण्यपुंजपारि
पाकेन अयाणां सह भावो भवति अन्यथा प्रतिबंधकपापानुसारेण पुरुषविशेषे कालविशेषेण कस्मिंश्चित्प्रति
बंधो भवतीति भावः ॥२८२॥ तत्रापि तत्वज्ञानप्रतिबंधे मोक्षो नास्तीत्याह ॥ वैराग्ये परतीति तर्हि वैराग्यादिसंपा
दनं निष्फलमित्याशंक्य प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजा
यते अयोऽस्यंत युक्ता श्रेन्महत स्तपसः फलं दुरितेन क्वचित्किंचित्कदाचित्प्रतिबध्यते ॥२८४॥ वैराग्ये परतीपर्णे बो
॥ धस्तु प्रतिबध्यते यस्य तस्य न मोक्षोस्ति पुण्यलोकास्तपोबलात् ॥२८५॥ पूर्णे बोधे तदन्यौ द्वौ प्रतिबंधौ यदा तदा मो
॥ क्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ॥२८६॥ ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः देहात्मवत्परात्म
॥ त्वदार्ढ्ये बोधः समाप्यते ॥२८७॥ सुप्तिवद्विस्मृतिः सीमा भवेदुपरमस्य हि दिशानया विनिश्चेयं तारतम्यमवांतरं
यते इति भगवद्वचनात् ॥ पुण्यलोकप्राप्तिर्भवतीत्याह ॥ पुण्यलोक इति २८३ वैराग्योपरत्योस्तु प्रतिबंधे जीवन्मु
क्तिः सर्वौत्सिध्यतीत्याह पूर्णे बोधे इति ॥२८॥ इदानीं वैराग्यादीनामवधिं दर्शयति ॥ ब्रह्मलोक इति सार्द्धेन
अवांतरतारतम्यं स्वस्वबुद्ध्यानिश्चेयमित्याह ॥ दिशेति ॥२८७॥२८८॥ रामरामराम सत्यायनमः ॥ ओम् ओम् ॥ ३१ ॥

दोषरहितं

पं॰ दि॰ ॥ ३१४ ॥

ननु तत्त्वबोधवतामपि रागादिमत्त्वेन वैषम्योपलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यते इत्याशंक्य रागादेर्बो
धादिवदारब्धकर्मफलत्वान्मुक्तिबंधकत्वमस्तिं के अतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह आरब्धकर्मनेति
२८७॥ किं तर्हि प्रतिपत्तव्यमित्यत आह स्वस्वकर्मानुसारेणेति ॥ सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवद्यं ब्रह्म
रूपेणावस्थानं च समानमिति भावः ॥ २८८ ॥ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति जगच्चित्रमिति ॥ २८९ ॥ ग्रंथ

आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा । वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ॥ २८७ ॥
स्वस्वकर्मानुसारेण वर्ततां ते यथा तथा । अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः ॥ २८८ ॥
जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं । मायया तदुपेक्ष्यैकं चैतन्यं परिशिष्यतां ॥ २८९ ॥
चित्रदीपमिमं नित्यं येऽनुसंदधते बुधाः । पश्यंतोऽपि जगच्चित्रं ते मुह्यंति न पूर्ववत् ॥ २९० ॥

॥ ३१४ ॥

स्याभ्यासफलमाह चित्रदीपमिति ॥ २९० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्य
श्रीचरणशिष्येण रामकृष्णाख्यविदुषा विरचितं तात्त्वबोधिनीनामके चित्रदीपव्याख्यानं षष्ठं प्रकरणं
समाप्तं ॥ ६ ॥ रामराम ॥ रामायनमः रामायनमः ॥ ॥ ६ ॥ ओम् ओम् ओम् सूर्यायनमः

॥ चित्रदीप६पत्राणि९७॥

राम॥८॥राम॥

ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ कुर्वे कूटस्थदीपस्य व्याख्यां तात्पर्यदीपिकां ॥१॥ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशोधनपूर्वकत्वात्त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रंथमारभमाणा आचार्याः स्य ग्रंथस्य वेदांतप्रकरणत्वेन तदीयैरेव विषयादिभिः सिद्धतां सिद्धिं तामभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टांतभेदेन निर्दिशति खादित्येति खादि

खादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् कूटस्थभासितो देहो धीस्थजीवेन भास्यते ॥१॥

त्यदीपिते खे आदित्यः खादित्यः प्रसिद्धः सूर्य इत्यर्थः ॥ तेन च तत्संबंधिना आलोकेन लक्ष्यते तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवत् दर्पणेषु निपत्य पर्यावृत्तैः कुड्यसंबद्धैरादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितं कूटस्थेनाविकारिचैतन्येन भासितः प्रकाशितो देहो धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते ॥ अनेन सामान्यतो विशेषतश्च कुड्यावभासकादित्यप्रकाशद्वयमिव देहावभासकचैतन्यद्वयमस्तीति प्रतिज्ञातं भवति ॥१॥ रामराम ओम् ओम् राम सूर्याय नमः

ननु तत्र दर्पणादित्यदीप्तिख्यातिरेणस्वादित्यदीप्तिर्नोपलभ्यते इत्याशंक्य ताभ्यस्तां विभज्य दर्शयति
अनेकेति यथा अनेका बहु दर्पणा अन्याः कुड्ये तत्र मंडलाकारा विशेषप्रभा दृश्यंते तासां संधौ मध्ये इ
तरा सामान्यप्रकाशरूपा स्वादित्यप्रभा व्यज्यते। अभिव्यक्तोपलभ्यते तासां दर्पणजन्यप्रभाणामभावे द
र्पणापगमादिना सत्वे च स्वयं सर्वत्र प्रकाशते ॥२॥ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति। चिदाभासेति

अनेकदर्पणादित्यदीप्तीनां बहु संधिषु ॥ इतरा व्यज्यते तासामभावेपि प्रकाशते ॥ २॥ रामराम ॥
चिदाभासविशिष्टानां तथानेकधियामसौ संधिं धियामभावं च भासयन्प्रविविच्यतां ॥३॥

तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिंबयुक्तानामनेकधियामनेकासां बुद्धिवृत्तीनां
घटज्ञानादिशब्दवाच्यानां संधिमंतरालं जाग्रदादौ धियां तासामेव बुद्धिवृत्तीनामभावं च सुषुप्त्या
दौ भासयन् प्रकाशयन्नसौ कूटस्थः प्रविविच्यतां ताभ्यो भेदेन ज्ञायतामित्यर्थः ॥३॥ रामराम

इदानीं देहांतःकूटस्थचिदाभासयोर्भेदप्रदर्शनाय देहाद्बहिरपि चिदाभासब्रह्मणी विभज्य दर्शयति घटैका
कारेति घटैकाकारधीस्था चित् घटस्यैकस्याकार इवाकारो यस्याः सा घटैकाकारा तथाविधा
या बुद्धौ वर्तमानश्चिदाभासः घटमेवावभासयेत्तस्य घटस्य ज्ञाततताख्यो धर्मः घटो ज्ञात इति व्यवहार
हेतुर्यः स घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येन साधनभूतेनावभास्यते प्रकाश्यत इत्यर्थः ॥४॥ न

घटैकाकारधीस्था चित् घटमेवावभासयेत् घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ॥४॥
अज्ञातत्वेन भातोयं घटो बुद्ध्युदयात्पुरा ब्रह्मणैवापरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ॥५॥

न्वज्ञाततावभासकचैतन्येनैव घटप्रतीतिसंभवाद्बुद्धिः किमर्थेत्याशंक्य घटस्य ज्ञातताद्विभेदसिद्ध्यर्थे
त्याह ॥ अज्ञातत्वेनेति बुद्ध्युदयात्पुरायं घटो ब्रह्मणैवाज्ञातत्वेन प्रकाशितो बुद्ध्युत्पत्तौ सत्यां ज्ञा
तत्वेन ब्रह्मणैव प्रकाश्यते इतीयानेव भेदो नान्य इत्यर्थः ॥५॥

ज्ञातत्वा

नन्वेकस्यैव घटस्य ज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवतीत्याशंक्य तदवबोधनाय ज्ञातता ज्ञाततानिमित्तयोर्ज्ञाना
ज्ञानयोः स्वरूपं तावद्दर्शयति ॥ चिदाभासेति चिदाभासांतधीवृत्तिश्चिदाभासश्चित्प्रतिबिंबः सोंतः पुरोभागे
यस्याः साधीवृत्तिर्ज्ञानमित्युच्यते। बोधेद्धा बुद्धिरित्याचार्यैरभिधानात् ॥ तत्र दृष्टांतः ॥ लोहांतकुंतवदिति
जाड्यं स्वतः स्फूर्तिरहितत्वमज्ञानमित्युच्यते ॥ एताभ्यां पर्यायेण व्याप्तः सर्वतः संबद्धः कुंभो ज्ञात इत्यज्ञात

चिदाभासांतधीवृत्तिर्ज्ञानं लोहांतकुंतवत् जाड्यमज्ञानमेताभ्यां व्याप्तः कुंभो
द्विधोच्यते ॥ ६ ॥ अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुंभस्तथा न किं ॥ एवमन्यत्॥

इति चोच्यते इत्यर्थः ॥ ६ ॥ नन्वज्ञातस्य कुंभस्याज्ञानव्याप्तत्वाद्भवतु ब्रह्मावभास्यत्वं ज्ञानव्याप्तस्य तु ज्ञातस्य
कुंभस्य कुतो ब्रह्मचैतन्यावभास्यत्वमित्याशंक्याज्ञानस्याज्ञाततजनन इव ज्ञानस्यापि ज्ञातताजननमात्रोपक्षी
णत्वादज्ञातकुंभवत् ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह ॥ अज्ञात इति यथाऽज्ञातकुंभो ब्रह्मणावभा
स्यस्तथा ज्ञातकुंभो न किं ब्रह्मावभास्यो न भवति किं तु भवत्येवेत्यर्थः ॥ एवमन्यत्॥

पं. टी. ३

कुत इत्यत आह ॥ ज्ञातत्वेति ॥७॥ नन्वज्ञातताजननाय ज्ञानमिवाज्ञातताजननायापि बुद्धेर्युवालं किमनेन
चिदाभासेनेत्याशंक्य चिदाभासरहिताया बुद्धेर्घटादिवद्प्रकाशरूपत्वेनाज्ञातताजननं न संभवतीत्या
ह आभासेति ॥८॥ चिदाभासरहितबुद्धिव्याप्तस्य घटस्याज्ञातत्वाभावं दृष्टांतप्रदर्शनेन स्पष्टयति ॥ ज्ञा

ज्ञातत्वजनने नैव चिदाभासपरिदमः ॥७॥ आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते ॥ ८॥
तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्विकारिणः ॥९॥ ज्ञात इत्युच्यते कुंभो मृदा लिप्तो न कु
त्रचित् धीमात्रव्याप्तकुंभस्य ज्ञातत्वं नेष्यते तथा ॥१०॥ ज्ञातत्वं नाम कुंभे तच्चिदाभासफलो

दय इति लोके कुत्रचिदपि घटो मृदा शुक्लारकेतो रूपया लिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा तथा चि
दाभासरहितबुद्धिव्याप्तस्यापि कुंभस्य ज्ञातत्वं नाभ्युपगम्यत इति भावः ॥१०॥ फलितमाह ॥ ज्ञातत्वमिति
॥ यतः केवलाया बुद्धेर्ज्ञातत्वजननासमर्थत्वमतः कुंभे चिदाभासलक्षणस्य फलस्योत्पत्तिरेव ज्ञातत्वं

३

नन्वेवमपि चिदाभासो न कल्पनीयो ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह न फलमिति ब्रह्मचैतन्यं फले घटादिस्फुरणं न भवतीति कुत इत्यत आह मानात्प्रागपीति मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात्फलस्य तु तदुत्तरकालीनत्वनियमादिति भावः ॥१०॥ नन्विदं पराग्यर्थप्रमेयेष्वित्यादिसुरेश्वरवार्तिकविरुद्धमित्याशंक्य तद्विवक्षानभिज्ञस्येदं चोद्यमिति परिहरति ॥ पराग्यर्थेति अस्यचायमर्थः ॥ परा

न फलं ब्रह्मचैतन्यं मानात्प्रागपि सत्त्वतः ॥१०॥ पराग्यर्थप्रमेयेषु या फलत्वेन संमता ॥ ॥
संवित्सैवेह मेयोर्थो वेदान्तोक्तिप्रमाणतः ॥११॥ इति वार्तिककारेण स्पष्टमेव विवक्षितं ॥ ॥

पराग्यर्था बाह्या घटादयः पदार्थास्तेषु प्रमाणविषयेषु मध्ये या प्रमाणफलत्वेनाभ्युपेता संवित्सैवेहास्मिन् शास्त्रे वेदान्तोक्तिप्रमाणतः वेदान्तलक्षणप्रमाणेन मेयोर्थो ज्ञातव्योर्थः ॥११॥ इत्यनेन वार्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः ॥ श्रीरामाय नमः ॥ सूर्याय नमः

पं
मू°
॥ ७॥

वार्त्तिककारणामीदृशी विवदेति कुतोवगम्यत इत्याशंक्य तद्गुरुभिः श्रीमदाचार्यैरुपदेशसाहस्त्र्यां ब्रह्मचै
तन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ब्रह्मचिदिति ब्रह्मचिच्च फलंच ब्रह्मचित्फले तयोरिति
विग्रहः॥ १२॥ एवं सतिप्रकृते किमियातमित्यत आह॥ आभास इति॥ यस्माद्ब्रह्मचित्फलयोर्भेदः सिद्ध
स्तस्माद्घटे उदित उत्पन्न आभासश्चिदाभासस्तत्र घटे ज्ञातत्वं जनयेदुत्पन्ने तत्र ज्ञातत्वे पुनर् ज्ञातत्ववद्
ब्रह्मचित्फलयोर्भेदः साहस्त्र्यां विश्रुतोयतः॥ १२॥ आभास उदितस्तस्माज्ज्ञातत्वं जनयेद् घटे
तत्पुनर्ब्रह्मणाभास्यमज्ञातत्ववदेव हि॥ १३॥ धीवृत्त्याभासकुंभानां समहोभास्यते चिता कुंभ
मात्रफलत्वात्स एक आभासतः स्फुरेत्॥ १४॥ रामायनमः॥ रामायनमः रामायनमः॥ ॥
सत्यैवभास्यंभवति हि प्रसिद्धमित्यर्थः॥ १३॥ एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन
स्पष्टयति॥ धीवृत्त्याभासकुंभानामिति॥ चिता ब्रह्मचैतन्येनेत्यर्थः चिदाभासस्य कुंभमात्रनिष्ठफल
रूपत्वात्तेनाभासेन सह घट एक एव स्फुरेद्भास्यतेत्यर्थः॥ १४॥ रामायनमः ओम् ओम् ओम् ओम्

८

कुंभस्य चिदाभासब्रह्मोभयभास्यत्वे लिंगमाह। चैतन्यमिति॥ अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात्कुंभे ज्ञातत्वेन द्विगुणं चैतन्यं भाति॥ तत इदमेव घटज्ञातताव भासकं चैतन्यं तार्किकैर्नामांतरेण व्यवह्रियत इत्याह अन्ये त्विति॥ यथोदितं यथोक्तमेतदेव ब्रह्मचैतन्यमन्ये तार्किका अनुव्यवसायाख्यं ज्ञानांतरं

चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फुरत्वतः। अन्येनुव्यवसायाख्यमाहुरेतद्यथोदितं॥ २५॥
घटोयमित्यसावुक्तिराभासस्य प्रसादतः॥ विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत्॥ २६॥
आभासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते॥ तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि॥ २७॥

प्राहुरिति योजना॥ २५॥ अयं घट इति ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽवगंतव्य इत्याह॥ घटोयमिति॥ २६॥ देहाद्बहिश्चिदाभासब्रह्मणी विविच्येते यथा तथा देहांतश्चिदाभासकूटस्थौ विवेचनीयावित्याह॥ आभासब्रह्मणीति॥ २७॥ रामरामराम॥ रामरामा। रामरामरामराम॥ राम॥

ननु देहाद्बहिश्चिदाभासव्याप्त्यघटाकारवृत्तिवदांतरविषयगोचरवृत्त्यभावात्कथं तद्व्यापकश्चिदाभासोऽभ्यु
पगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेऽप्यहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोऽभ्युपगंतुं शक्यत इति
सदृष्टांतमाह॥ अहंवृत्ताविति॥ अहमादिवृत्तीनामेव चिदाभासव्याप्तत्वं दृष्टांतप्रपंचनेन स्पष्टयति स्वमात्र
मिति॥११॥ एवं चिदाभासं व्युत्पाद्य कूटस्थस्वरूपं व्युत्पादयितुं तदुपयोगिनं वृत्त्यभावावसरं दर्शयति॥ क्रमादि

अहंवृत्तौ चिदाभासः कामक्रोधादिकासु च॥ संव्याप्य वर्तते तप्ते लोहे वह्निर्यथा तथा॥१२॥
स्वमात्रं भासयेत्तप्तं लोहं नान्यत्कदाचन॥ एवमाभाससहिता वृत्तयः स्वस्वभासिकाः॥१३॥
क्रमाद्विच्छिद्य विच्छिद्य जायंते वृत्तयोऽखिलाः॥ सर्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु॥१४॥
संधयोऽखिलवृत्तीनामभावाश्चावभासिताः॥ निर्विकारेण येनासौ कूटस्थ इति चोच्यते॥१५॥

ति॥१४॥ भवत्वेवं समाध्याद्यो वृत्तिविलयो नेन कथं कूटस्थोऽवगम्यत इत्याशंक्य वृत्त्यभावसाक्षित्वेनासाव
वगम्यत इत्याह॥ संधय इति॥ वृत्तिसंधयो वृत्त्यभावाश्च येन चैतन्येनावभास्यंते स कूटस्थोऽवगंतव्य इत्यर्थः॥

का उक्तै बोधविषयत्वं ४ विषयस्य द्वैविध्यं बाह्यमनोमयभेदेन ४ द्विविधविषये २ उक्तै बाह्यविषयाकारवत्त्वे सिद्धे सति २
प्रकारे

ते इदानीं वार्त्ति[illegible]कारवचनमाह मातुरिति मातुः साधिष्ठानबुद्धिस्थचिदाभासरूपात्प्रमातुर्मानाभिन्निष्पत्तिर्मानस्य
साभासांतःकरणवृत्तिरूपस्य निष्पत्तिरुत्पत्तिर्भवतीति शेषः निष्पन्नेन तन्मानेन मेयं प्रमेयं घटादिरूपमेति प्राप्नो-
ति किंच तन्मानं मेयाभिसंगतं प्रमेयेण संबंधं सन्मेयाभत्वं मेयस्याभेवाभा यस्य तन्मेयाभं तस्य भावस्तत्त्वं मेयसमा-
नाकारतां प्रपद्यते प्राप्नोतीत्यर्थः ॥३०॥ भवत्वेवं प्रकृते किमायातमित्यत आह सत्यमेवमिति ननु मृन्मयघटस्ये-
व मनोमयघटस्य तेनैव मनसा गृहीतुमशक्यत्वात् ग्राहकांतराभावाद्वासिद्धिरेवेत्याशंक्य ग्राहकांतराभावोऽ

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते ॥३०॥ =॥
तस्यैवं विषयौ द्वौ स्तां घटौ मृन्मयधीमयौ मृन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः ३१॥
अन्वयव्यतिरेकाभ्यां धीमयो जीवबंधकृत् सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयं ॥३२॥ सा

क्षिसिद्ध इत्याह मृन्मय इति यथा मृन्मयो मानमेयस्तथा धीमयः साक्षिभास्य इत्यर्थः ॥३१॥ भवत्वेवं द्विविधं द्वैतं
अत्र कस्य हेयत्वं कस्य वा नेति न ज्ञायते इत्याशंक्य जीवसृष्टस्यैव हेयत्वमित्यभिप्रेत्य तस्य बंधहेतुत्वं दर्शय-
ति [illegible] अन्वयेति अन्वयव्यतिरेकावेव दर्शयति सत्यस्मिन्निति अस्मिन् जीवसृष्टे मानसप्रपंचे सति विद्य- स
माने सुखदुःखे स्तो भवतः असति तस्मिन्न द्वयं सुखदुःखं नास्तीत्यर्थः ॥३२॥ मामयम

ननु तावन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह असत्येवेति नरो मनुष्य एतदुपलक्षणमन्येषाम
पि स्वप्नादौ स्वप्नस्मृत्यादिकाले बाह्यार्थे नकुले यो बिडालादौ प्रतिकूले व्याघ्रादौ च पारमार्थिके विषये सत्यपि
अविद्यमानेपि बध्यते सुखदुःखाभ्यां युज्यते समाध्यादिषु तु अस्मिन्बाह्यार्थे सत्यपि न बध्यते न सुखदुःखा
दिभाग्भवति अतस्तद्विषयावन्वयव्यतिरेकौ न स्त इत्यर्थः ॥३३॥ मनोमयप्रपंचस्य बंधकत्वे नान्वयव्यतिरेकौ

असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः । समाधिसुप्तिमूर्छासु सत्यप्यस्मिन्न बध्यते ॥३३॥
दूरदेशं गते पुत्रे जीवत्येवात्र तत्पिता । विप्रलंभकवाक्येन मृतं मत्वा प्ररोदिति ॥३४॥
मृतेपि तस्मिन्वार्तायामश्रुतायां न रोदिति । अतः सर्वस्य जीवस्य बंधकृन्मानसं जगत् ॥३५॥

उदाहरणेन स्पष्टयति दूरदेशमिति देशांतरं प्राप्ते पुत्रे तत्र जीवत्येव सत्यत्र स्वगृहे स्थितः तस्य पिता वि
प्रलंभकस्य मिथ्यावचनैः परवंचकस्य त्वत्पुत्रो मृत इत्येवंरूपेण वाक्येन स्वपुत्रं मृतं कल्पयित्वा प्रकर्षे
ण रोदनं करोति तस्मिन्नेव पुत्रे तत्रैव मृतेपि तन्मृतिवार्तायामश्रुतायां सत्यां न रोदनं करोतीति फलितमाह

एवं च सति किं फलितमित्यत आह॥ घट इति॥ बाह्ये घटे यथा घटमात्रावभासकश्चिदाभासो घटस्य ज्ञाततराव
भासकं ब्रह्मचैतन्यं द्विगुणं एवं तथांतरे हंकारादिवृत्तिष्वपि कूटस्थचैतन्यवृत्त्यवभासकश्चिदाभासश्चेति द्विगुणं चै
तन्यमस्ति तत्रोपपत्तिमाह॥ तत इति॥ यतो द्विगुणं चैतन्यमस्ति ततः संधितः संधिभ्यस्तत्र वृत्तिषु वैशद्यम
धिकं दृश्यत इति शेषः॥२२॥ नन्वत्रापि घटादिष्विव ज्ञातताज्ञातताऽवभासकत्वेन कूटस्थः किं नेष्यत इत्याशं

घटे द्विगुणचैतन्यं यथा बाह्ये तथांतरे वृत्तिष्वपि ततस्तत्र वैशद्यं संधितोधिकं॥ २२॥ रामराम॥ प्रकटत्वं२

ज्ञातताज्ञातत्वेन सा घटवद्वृत्तिबुद्धचित्॥ स्वस्य स्वेनाग्रहीतत्वात्ताभिश्चाज्ञाननाशनात्॥२३॥

क्य तत्र ज्ञातताद्यभावादेवेत्याह॥ ज्ञाततेति॥ तत्रोपपत्तिमाह स्वस्येति॥ ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातताज्ञातते भवतः
वृत्तीनां तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ताभिर्वृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवर्तितत्वादज्ञा
नस्य व्याप्तिरपि नास्तीति भावः॥२३॥ रामरामरामराम रामरामरामरामराम रामरामरामरामराम ॐ॥

ननु कूटस्थचिदाभासयोरुभयोरपि चित्वे समाने एकस्य कूटस्थत्वमपरस्य त्वकूटस्थत्वमित्येतत्कुत इत्याशंक्य चिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थत्वमितरस्याविकारित्वे प्रमाणाभावात्कूटस्थत्वमित्याह ॥ धिष्ठानीति ॥ २४ ॥ चिदाभासव्यतिरिक्तकूटस्याभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्या

पं ॥ कू ॥ ॥ ६ ॥

धिष्ठानीकृतचैतन्ये जन्मनाशानुभूतितः ॥ अकूटस्थं तदन्यत्तु
कूटस्थमविकारितः ॥ २४ ॥ अंतःकरणतद्वृत्तिसाक्षीत्यादा
वनेकधा ॥ कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः ॥ २५ ॥

प्यपादितत्वान्नैवमित्याह ॥ अंतःकरणेति ॥ अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ॥ आनंदरूपः सत्यः सन् ॥
किं नात्मानं प्रपद्यस इत्यादावित्यर्थः ॥ २५ ॥ = ॥ श्रीरामायनमः श्रीप्रभाकरायनमः ॥ रामराम ॥

॥ ६ ॥

कूटस्थातिरिक्तश्चिदाभासोपि नैवर्णित इत्याह ॥ आत्माभासेति आत्मा चाभासश्चाश्रयश्चेति आत्माभासाश्रया
द्वंद्वसमासः ॥ मुखाभासाश्रया इत्यत्रापि तथा न्यस्तं प्रसिद्धमाभासो मुखप्रतिबिंब आश्रयो दर्पणादिश्चेति त्र
यं यथा प्रत्यक्षेणावगम्यते एवमात्मा कूटस्थ आभासश्चिदाभास आश्रयोंतःकरणादिरिति त्रयोपि शास्त्रयु
क्तिभ्यामवगम्यत इत्यर्थः ॥ अत्र चाभासशब्देन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः ॥ मनसः साक्षी

आत्माभासाश्रयाश्चैवं मुखाभासाश्रयास्तथा ॥ गम्यंते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः ॥ २६ ॥
बुद्ध्यवच्छिन्नकूटस्थो लोकांतरगमागमौ ॥ कर्तुं शक्तो घटाकाशवदाभासेन किं वद ॥ २७ ॥ रामराम ॥

बुद्धेः साक्षीति बुद्धिसाक्षित्वप्रतिपादकं शास्त्रं रूपं रूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकं विकारित्वा
विकारित्वादिरूपा युक्तिः पूर्वमेवोक्तेति भावः ॥ २६ ॥ तत्र चिदाभासमाक्षिपति ॥ बुद्ध्यवच्छिन्नेति स्वस्मिन्क
ल्प्यमानया बुद्ध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाशइव बुद्धिद्वारा लोकांतरगमनागमने कर्तुं शक्तो इति
अतश्चिदाभासकल्पनायां गौरवमितिभावः ॥ २७ ॥ रामरामरामरामरामरामराम रामराम ॥

असंगस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण जीवत्वं न घटतेऽन्यथातिप्रसंगादिति परिहरति ॥ एवमिति ॥ २८ ॥ कु

पं कू ॥ ३ ॥

डिकुड्ययोः स्वच्छतास्वाच्छाभ्यां वैषम्यं शंकते नेति ॥ ३ उक्तं स्वच्छत्वं परिच्छेदप्रयोजकं न भवतीत्याह ॥ तथा

क्षितिवति ॥ २० ॥ ३ उक्तमर्थं दृष्टान्तेन स्पष्टयति ॥ प्रस्थेति दारुकांस्यजन्ययोः प्रस्थयोः स्थिते स्वच्छत्वास्वच्छत्वे

एवसंगः परिच्छेदमात्राज्जीवो भवेन्न हि ॥ अन्यथा घटकुड्याद्यैरवच्छिन्नस्य जीवता ॥ २८ ॥

न कुड्यसदृशी बुद्धिः स्वच्छत्वादिति चेत्तथा ॥ अस्तु नाम परिच्छेदे किं स्वाच्छेन भवेत्तव ॥ २९ ॥

प्रस्थेन दारुजन्येन कांस्यजन्येन वा न हि ॥ विशेषस्तंदुलादीनां परिमाणे विशिष्यते ॥ ३० ॥

परिमाणाविशेषेऽपि प्रतिबिंबो विशिष्यते ॥ कांस्ये यद्वत्तथा बुद्धावप्याभासो भवेद्बलात् ॥ ३१ ॥

तंडुलपरिमाणे न्यूनाधिकभावे हेतुर्न भवतीत्यर्थः ॥ ३० ॥ कांस्यप्रस्थे तंदुलपरिमाणाधिक्याभावेऽपि प्रति

बिंबलक्षणमाधिक्यमस्तीत्याशंक्य तर्हि बुद्धावपि चिदाभासो भवत्येवांगीकर्तव्य इत्याह ॥ ३१ ॥ रामराम

रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम सर्वेभ्यो नमः ॥ ३ ॥

राम

प्रतिबिंबांगीकारे चिदाभासः कथमंगीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्या
ह॥ ईषदिति प्रतिबिंबस्याभासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह॥ बिंबेति॥ हि यस्मात्कारणा
त् प्रतिबिंबो बिंबलक्षणरहितो बिंबवदवभासतेऽतो बिंबाभास इति भावः॥ ३२॥ आभासलक्षणयोगित्व
मेव स्पष्टयति॥ ससंगत्वेति॥ एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूताऽसंगाविकारिचैतन्य

ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः॥ बिंबलक्षणहीनः सन्बिंबवद्भासते स हि॥ ३२॥

ससंगत्वविकारित्वे बिंबलक्षणहीनता॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुः॥ ३३॥ यथाप्रदस्य

न हि धीभावभावित्वादाभासोऽस्ति धियः पृथक्॥ इति चेदल्पमेवोक्तं धीरप्येवं स्वदेहतः॥ ३४॥

लक्षणहीनत्वं स्फुरणरूपत्वे बिंबवदवभासमानमित्यर्थः हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासा इ
तिवदित्यर्थः॥ ३३॥ इत्थं चिदाभासस्याप्रयोजकतां निराकृत्येदानीं तस्य बुद्धेः पृथक्त्वं साधयितुं पूर्वप
क्षमाह॥ नहीति यथाप्रदीपसत्त्वामेव घटो न प्रदीपाद्भिद्यते तद्वदिति भावः॥ ३४॥

चिताभासः

नन्वेवं तर्हि देहादतिरिक्ता धीरपि न सिध्येदिति प्रतिबंध्या परिहरति ॥ सत्यमेवेति ॥ ३४ ॥ प्रतिबंदीमोचनं शंकते ॥ देह इति ॥ देहव्यतिरिक्ताया बुद्धेः नविज्ञानो भवतीत्यादिश्रुतिसिद्धत्वान्नासत्वमिति भावः ॥ ननु श्रुतिबलाद्देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत्तर्हि प्रवेशश्रुतिबलाद्बुद्ध्यतिरिक्तश्चिदाभासोप्यभ्युपेय इत्या

देहेऽस्ते पि बुद्धिश्रेष्ठ्यात्वाद्दिशितत्पास्तति ॥ बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतिषु श्रुतः ॥ ३५ ॥

धीयुक्तस्य प्रवेशश्चेन्नैतरेये धियः पृथक् ॥ आत्मा प्रवेशं संकल्प्य प्रविष्ट इति गीयते ॥ ३६ ॥

ह ॥ तथासतीति ॥ ३५ ॥ ननु बुद्ध्युपाधिकस्यैव प्रवेशो युज्यते नेतरस्येति शंकते ॥ धीयुक्तस्येति ॥ ऐतरेयश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्नैवमिति परिहरति ॥ नैतरेय इति ॥ = ॥ ३६ ॥ रामराम रामरामराम

॥ ८ ॥

तांश्रुतिमर्थतः पठति॥ कथंन्विति॥ अयंपरमात्मास्माद्देहमद्वाराणि च देहस्य अद्वदेहास्तैः सहवर्त्तत इति
साद्वदेहमिदंजडजातं मद्दृते चेतनं मां विहाय कथंनुस्यान्न कथमपि निर्वहेदिति विदार्य मूर्द्धसीमानं कपा
लमध्यदेशं विदार्य स्वसन्निधिमात्रेणाभित्वा प्रविष्टः सन् संसरति जाग्रदादिकमनुभवतीत्यर्थः ॥३७॥

आभासरूपेण ष्टः

कथं न्विदं साद्वदेहं मद्दृते स्यादितीरणात्॥ विदार्य मूर्द्धसीमानं प्रविष्टः संसरत्ययं॥ ३७॥
कथं प्रविष्टोऽसंगश्चेत्सृष्टिर्वास्य कथं वद॥ मायिकत्वं तयोस्तुल्यं विनाशश्च समस्तयोः॥ ३८॥

नन्वसंगस्यात्मनः प्रवेशोऽयुक्त इति शंकते॥ कथमिति इदं चोद्यं सृष्टावपि समानमित्याह॥ सृष्टिर्वेति
सृष्टिकर्तुर्मायिकत्वान्न दोष इत्याशंक्याऽयं परिहारः प्रवेशेऽपि समान इत्याह॥ मायिकत्वमिति॥ अ
नयोर्मायिकत्वे हेतुश्च समन इत्याह॥ विनाशश्चेति॥ ३८॥ रामरामराम

पं० ३
॥ ३ ॥

प्रज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीत्यौपाधिकरूपस्यविनाशप्रति
पादिकांश्रुतिंदर्शयति ॥ समुत्थायेति एवंप्रज्ञानघनआत्माएतेभ्योदेहेंद्रियादिरूपेभ्यः पंचभूतकार्यै
भ्योनिमित्तभूतेभ्यउपाधिभ्यः समुत्थायजीवत्वाभिमानंप्राप्यतान्येवदेहादीनिविनश्यंत्यनुविनश्य
ति तेषुविनश्यत्सुतत्कृतजीवत्वाभिमानंजहाति एवंप्रकारेणास्यौपाधिकरूपस्यविनाशित्वंयाज्ञवल्क्यो

समुत्थायैतेभ्यभूतेभ्यस्तान्येवानुविनश्यति ॥ विस्पष्टमितिमैत्रेय्यैयाज्ञवल्क्यउवाचहि ॥ ३९ ॥
अविनाशयमात्मेतिकूटस्थः प्रविवेचितः ॥ मात्रासंसर्गइत्येवमसंगत्वस्यकीर्तनात् ॥ ४० ॥

मैत्रेय्यैउक्तवानित्यर्थः ॥ ३९ ॥ अविनाशीवाअरेऽयमात्मानुच्छित्तिधर्मेति श्रुत्याकूटस्थस्ततोविभि
न्नः प्रदर्शितइत्याह ॥ अविनाशीति ॥ मात्राऽसंसर्गस्त्वस्यभवतीतिश्रुत्यांविनाशित्वहेतुमसंगत्वंचो
क्तवानित्यर्थः ॥ मात्रेति मीयंतइतिमात्रादेहादयस्ताभिरस्यात्मनोऽसंसर्गोभवतीति ॥ ४० ॥ राम

॥ ३ ॥

देवदत्तयज्ञदत्तेत्यादिसंज्ञास्ति ॥ १ ॥

शरीरं

ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्या स्यौपाधिकस्याप्यविनाशित्वं प्रतिपाद्यत इत्याशंक्य तस्याः श्रुतेर्देहांतरप्राप्तिविषयतया अविनाशीउक्तं नात्यंतिकनाशाभावपरत्वमित्याह जीवापेतमिति ॥ जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावत् वाव एव स जीवो न म्रियते इत्यर्थः ननु जीवस्याविनाशित्वे हं ब्रह्मास्मीत्यविनाशिब्रह्मतादात्म्यज्ञानं न घटते ॥ नाहमिति विनाशी स जीवो हं ब्रह्मे

जीवापेतं वाव किल शरीरं म्रियते न स इत्यत्र न विमोक्षोर्थः किंतु लोकांतरे गतिः ॥८४॥

नाहं ब्रह्मेति बुध्येत स विनाशीति चेन्न तत् ॥ सामानाधिकरण्यस्य बाधायामपि संभवात् ॥८५॥

ति ब्रह्मरूपेणात्मानं न बुध्येत जानीयात् हि नाशस्याविनाशिनोरेकत्वविरोधादिति चेन्मुख्यसामानाधिकरण्याभावेपि बाधायां सामानाधिकरण्यसंभवात् जीव[illegible] बाधेन ब्रह्मभावोवगंतुं शक्यत इत्याह

यां वं कृ ॥१०॥

पति

बाधो सामानाधिकरण्येन वाक्यार्थं प्रतिप्रकारो वार्तिककारैः स्पष्टं तेनाभिहित इतीममर्थं तद्वाक्योदाहरणपू
र्वकं दर्शयति योयमिति॥ स्थाणुरेष पुमानित्यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते यथा॥
एवमहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्ताहमस्मीत्येवमादिरूपा सर्वापि निवर्त्यते इति॥४३॥ एवमुक्तेन

योयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव॥ ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्त्यते॥४३॥
नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितं॥ सामानाधिकरण्यं बाधार्थत्वमतोस्तु तत्॥४४॥
स्प

प्रकारेण वार्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमीरितमिति॥ फलित
माह अतोस्त्विति अतः कारणाद्ब्रह्माहमस्मीति वाक्ये तत्सामानाधिकरण्यस्य बाधार्थत्वमस्त्विति स्पष्टः॥४४॥

॥१०॥

नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्यं न क्वापि दृष्टमित्याशंक्य सर्वं ह्येतद्ब्रह्मेत्यत्र बाधायां
सामानाधिकरण्यं दृष्टमतोऽत्रापि तद्भविष्यतीत्याह॥ सर्वमिति॥४५॥ ननु तर्हि विवरणाचार्यै
र्बाधायां सामानाधिकरण्यं कुतो निराकृतमित्याशंक्य तैरहं शब्देन कूटस्थस्य विवक्षितत्वादित्या
ह सामानाधिकरण्यस्येति॥४६॥ कूटस्थत्वविवक्षयेत्युक्तमर्थं विवृणोति॥ शोधित इति। शोधि
सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत्॥४७॥
सामानाधिकरण्यस्य बाधार्थत्वं निराकृतं प्रयत्नतो विवरणे कूटस्थत्वविवक्षया॥४८॥
शोधितत्वं पदार्थो यः कूटस्थो ब्रह्मरूपतां॥ तस्य वक्तुं विवरणे तथोक्तमितरत्र च॥४९॥
तो बुद्ध्यादिभ्यो विवेचितस्त्वंपदलक्ष्यो यः कूटस्थो वक्ष्यमाणलक्षणस्तस्य ब्रह्मरूपतां सत्यादिल
क्षण ब्रह्मरूपतां वक्तुं विवरणादिषु बाधासामानाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकरण्य
मुक्तमित्यर्थः॥४९॥ रामरामरामरामरामरामरामराम॥ कूर्मायनमः॥

पं॰ कू॰
॥२२॥

इदानीं कूटस्थस्य ब्रह्मणा ऐक्यं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह देहेंद्रियादीति ॥ आदिशब्देन मन
आदयो गृह्यंते ॥ एवं च देहेंद्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य
याधिष्ठानचिति [illegible] यदधिष्ठानचैतन्यमस्ति तदत्र वेदांतेषु कूटस्थत्वेन विवक्षितमित्य
र्थः ॥४८॥ ब्रह्मशब्दस्य वाच्यार्थमाह ॥ जगद्भ्रमस्येति कृत्स्नजगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदांतेषु

देहेंद्रियादियुक्तस्य जीवाभासभ्रमस्य या ॥ अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ॥४८॥
जगद्भ्रमस्य सर्वस्य यदधिष्ठानमीरितं ॥ त्रय्यंतेषु तदत्रास्य ब्रह्मशब्दं विवक्षितं ॥ ४९॥
एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा ॥ तदा तदेकदेशस्य जीवाभासस्य का कथा ॥ ५०॥

रूपितं तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः ॥४९॥ ननु जीवभ्रमाधिष्ठानचैतन्यं कूटस्थ इत्युक्तमनु
पपन्नं जीवस्यारोपितत्वासिद्धेरित्याशंक्य तस्यारोपितत्वं कैमुत्तिकन्यायेन साधयति एतस्मिन्नि
ति जगदेकदेशत्वे चानेन जीवेनानुप्रविश्येत्यादिश्रुतिसिद्धं ॥ ५०॥ रामरामरामरामरामरामरामरामराम

ननु जगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थभेदाभावे तत्त्वंपदार्थयोः कथं न रूपत्वमित्याशंक्य तयोरौपाधिको
भेदो वास्तवमैक्यमित्याह ॥ जगदिति ॥ जगदिति तदेकदेशाइति च आख्यायस्य समारोप्यस्य तत्तज्जाता
वेकवचनं ॥५१॥ ननु विभासस्य शुक्तिकारजतादिवदधिष्ठानारोप्योभयधर्मवत्त्वानुपलंभात्कथमारोपित
त्वमित्याशंक्याह ॥ कर्तृत्वादि इति ॥ बुद्ध्युपाधिद्वारा आरोप्यमाणान् कर्तृत्वभोक्तृत्वप्रमातृत्वादीन् स्फुरा

जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः ॥५१॥
कर्तृत्वादीन्बुद्धिधर्मान्स्फूर्त्याख्यां चात्मरूपतां ॥ दधद्विभाति पुरत आभासोऽतो भ्रमो भवेत् ॥५२॥
का बुद्धिः कोऽयमाभासः को वात्मात्र जगत्कथं ॥ इत्यनिर्णयतो मोहः सोऽयं संसार इष्यते ॥५३॥ २

णलक्षणमात्मरूपत्वं च दधत्पुरतो भाति स्वयं प्रतिभासते । अतः आभासः कल्पित इत्यर्थः ॥५२॥ भ्रमस्य ।
भ्रमस्य किं कारणमित्याकांक्षायां बुद्ध्यादिस्वरूपापरिज्ञानमेवेत्याह ॥ का बुद्धिरि ॥ तस्य निवर्तनीयत्वाया
नर्थहेतुतामाह ॥ सोयमिति ॥ ५३ ॥ रामराम ॥

अस्य किं निवर्तकमित्याकांक्षायां बुद्ध्यादीनां स्वरूपविवेक एव निवर्तक इत्यभिप्रेत्य तद्विधानेव ज्ञानी ज्ञानत ए-
वचानर्थनिवृत्तिरित्याह ॥ बुद्ध्यादीनामिति ॥ ५४ ॥ एवं बंधमोक्षयोरविवेकमूलत्वे सत्यद्वैतवादे कस्य बं-
धः कस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कमूलाः परिहासविशेषाः स्वेंदुनोक्तयुक्ति-
भिस्तेषां निरस्तत्वापादनेन परिहरणीया इत्याह ॥ एवमिति ॥ ५५ ॥ एवं श्रुतियुक्तिभ्यां कूटस्थं बुद्ध्यादिभ्यो

बुद्ध्यादीनां स्वरूपं यो विविनक्ति स तत्ववित् ॥ स एव मुक्त इत्येवं वेदांतेषु विनिश्चयः ॥ ५४ ॥ ॥
अद्वैते सति — एवं च सति बंधः स्यात्कस्येत्यादिकुतर्कजाः ॥ विडंबना दृढं स्वेंदुश्याः स्वेंदुनोक्तिप्रकाशतः ॥ ५५ ॥
वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः ॥ बुभुत्सायां तथाज्ञोस्मीत्याभाति ज्ञानवस्तुनः ॥ ५६ ॥

विविच्य दर्शयित्वा पुराणे पृथपितद्विवेकः कृत इत्याह ॥ वृत्तेरित्यादिश्लोकत्रयेण ॥ कामादिवृत्त्युत्पत्तौ
सत्यां तत्साक्षित्वेन वृत्त्युदयात्पूर्वं प्रागभावसाक्षित्वेन जिज्ञासायां सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञो-
स्मीत्यनुभूयमाना ज्ञानसाक्षित्वेन च शिव एव तिष्ठतीति ॥ ५६ ॥

शिवः

सच्चासत्यस्य जगत आलंबनत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादानंदरूपः सर्वार्थावभासकत्वेन सर्वसंबंधित्वात्संपूर्ण इत्युच्यते ॥ अत्र चेदमनुमेयं विमतः शिवो वृत्त्यादिभिर्न भिद्यते वृत्त्यादिसाक्षित्वात् यद्यद्वृत्त्यादिभिर्भिद्यते तत्तद्वृत्त्यादिसाक्षि न भवति यथा वृत्त्यादि ॥ विमतः ॥ सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वाद् रज्जत्वाधिष्ठान शुक्तिवत् । विमतश्चिद्रूपः जडमात्राव

असत्यालंबनत्वेन सत्यः सर्वजडस्य तु साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ॥५७॥

आनंदरूपः सर्वार्थसाधकत्वेन हेतुना ॥ सर्वसंबंधवत्त्वेन संपूर्णः शिवसंज्ञितः ॥५८॥

भासकत्वाद्यच्चिद्रूपं न भवति तत्सर्वजडावभासकमपि न भवति यथा घटादिः । विमतः परमानंदरूपः परप्रेमास्पदत्वाद्यत्परमानंदरूपं न भवति तत्परप्रेमास्पदमपि न भवतीति यथा घटादि विमतः परिपूर्णः सर्वसंबंधित्वाद्गगनवत् सर्वसंबंधित्वं च सर्वार्थसाधकत्वेन ॥ विमतः सर्वसंबंधवान्सर्वावभासकत्वात् यत्सर्वसंबंधवान्न भवति स सर्वावभासकोऽपि न भवति यथा दीपादिरिति ॥५९॥

वं
कू
॥१३॥

उदाहृतपुराणवाक्यस्यतात्पर्यमाह॥ इतीति इत्येवंप्रकारेणसूतसंहितादिषुपुराणेषुजीवेशत्वादिकल्पनार
हितः। केवलोद्वितीयः स्वप्रभः स्वयंप्रकाशचैतन्यरूपः शिवः कूटस्थो विवेचितइत्यन्वयः॥ परे॥ जीवे
शत्वादिरहितत्वंकुतइत्याशंक्यश्रुत्यातयोर्मायिकत्वप्रदर्शनादित्याह॥ मायेति॥ जीवेशावाभासेनकरो

इति शैवपुराणेषुकूटस्थः प्रविवेचितः॥ जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः॥ परे॥
मायाभासेनजीवेशौकरोतीतिश्रुतत्वतः॥ मायिकावेवजीवेशौस्वच्छौकाचघटौभवतः १०॥

प्रकृति॥

तिमायावाविद्याचस्वयमेवभवतीतिश्रुतिर्मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वंप्रतिपादयति इति
भावः॥ मायाकत्वेतयोर्देहादिभ्योवैलक्षण्यंनस्यादित्याशंक्य पार्थिवात्गविशेषे पिकाचकुंभस्यघटा।
दिभ्योवैलक्षण्यमिवाऽनयोरपिस्यादित्याह॥ स्वच्छौताविति॥१०॥ रामरामरामराम रामराम

ननु घटकाशचकं भारंभकयोर्मध्ये विशेषयोर्भेदात्तद्वैलक्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वान्न
योर्जगतोर्वैलक्षण्यमनुचितमित्याशंक्य अन्नजन्ययोर्देहमनसोर्यथा वैलक्षण्यं एवं तद्विदित्याह ॥ अन्न
जन्येति ॥ ६९ ॥ भवतु काचादिवत्स्वच्छत्वं चित्वं तु कुत इत्याशंक्यानुभवादित्याह चिद्रूपत्वमिति

अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तथैव तौ ॥ मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ॥ ६९ ॥
चिद्रूपत्वं च संभाव्यं चित्त्वेनैव प्रकाशनात् ॥ सर्वकल्पनशक्ताया मायाया दुःशकं न हि ॥ ७० ॥ कर
अस्मिन्विद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् ॥ महामाया सृजेतावित्याश्चर्यं किमत्र ते ॥ ७१ ॥

चित्त्वेन प्रकाशनमपि मायिकयोरनुपपन्नमित्याशंक्य तस्या दुर्घटकारित्वादुपपन्नमित्याह ॥ सर्वेति
॥ ७० ॥ उक्तमर्थं कैमुतिकन्यायेन द्रढयति ॥ अस्मिन्निद्रेति ॥ ७१ ॥ रामरामरामरामरामरामराम ॥ १ ॥ रूप्यायन·

र

पं० कू०
॥ २९॥

ईश्वरस्यापि मायिकत्वे तस्य जीववदसर्वज्ञत्वादिकं स्यादित्याशङ्क्य सर्वज्ञत्वादिकमपि मायैव कल्पयि
ष्यतीत्याह॥ सर्वज्ञत्वादिकमिति॥ तत्रोपपत्तिमाह॥ धर्मिणमिति॥६४॥ ननु जीवेशयोरिव कूटस्थस्या
पि मायिकत्वं प्रसज्येतेति शङ्कते॥ कूटस्थेपीति॥ प्रमाणाभावात्तन्नैवमिति परिहरति॥ नातिशङ्क्यतामि

ईश्वरं

सर्वज्ञत्वादिके चेशो कल्पयित्वा प्रदर्शयेत्‌। धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने॥६४॥
कूटस्थेप्यतिशङ्का स्यादिति चेन्नातिशङ्क्यतां॥ कूटस्थमायिकत्वे तु प्रमाणं नहि विद्यते॥६५॥
वस्तुत्वं घोषयंत्यस्य वेदांताः सकला अपि॥ सपत्नरूपं वस्त्वन्यन्न सहंते त्र किंचन॥६६॥

॥६५॥ कूटस्थस्य वास्तवत्वेपि प्रमाणं नोपलभ्यत इत्याशङ्क्य श्रुतयः सर्वा अपि प्रमाणमित्याह॥ वस्तु
त्वमिति॥ अत्र कूटस्थस्य पारमार्थिकत्वे प्रतिपद्यमाने तमन्यद्वस्तु किंचन न सहन्त इत्यर्थः॥६६॥ समा॥

२९

ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वाऽवास्तवत्वसाधने श्रुतय एव पठ्यंते न तु तर्कैः किंचिदपि साध्यत इत्या
शंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वान्न तर्कोपन्यास इत्याह ॥ श्रुत्यर्थमिति ॥७॥ ततः
किमित्यत आह ॥ तस्मादिति मुमुक्षुणां श्रुत्यर्थः कीदृशोनुसंधेय इत्यत आह ॥ श्रुताविति श्रुतिषु जी
वेशयोर्मायोपाधिकत्वमीक्षणप्रवेशांतायाः सृष्टेरीश्वरकर्तृकत्वं जाग्रत्स्वप्नसुषुप्तिबंधमोक्षलक्षणस्य

श्रुत्यर्थं विशदीकुर्मो न तर्काद्वच्मि किंचन ॥ तेन तार्किकशंकानामत्र कोवसरो वद ॥७॥
तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् ॥ श्रुतौ तु मायया जीवेशौ करोतीति प्रदर्शितं ॥८॥
ईक्षणादिप्रवेशांता सृष्टिरीशकृता भवेत् ॥ जाग्रदादिविमोक्षांतः संसारो जीवकर्तृकः ॥९॥
असंग एव कूटस्थः सर्वदा नास्य कश्चन ॥ भवत्यतिशयस्तेन मनस्येवं विचार्यतां ॥१०॥

संसारस्य जीवकर्तृत्वे कूटस्थस्याऽसंगत्वादिकं प्रतिजन्मादिलक्षणस्य व्यवहारजातस्याऽसत्यत्वं च प्र
त
तिपादितं मतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभिप्रायः ॥ ॥१०॥ रामरामरामरामरामरामरामराम

पं० कृं० ॥२५॥

कूटस्थस्य स्वजन्माद्युत्पत्तिप्रयासाभावः कुतोऽवगम्यते इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति न निरो
ध इति ॥२१॥ ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्याऽवाङ्मनसागो
चरस्यात्मनोऽवबोधनायेत्याह अवाङ्मनसेति ॥२२॥ ननु तत्त्वस्यैकरूपश्रुतिबोध्यत्वे श्रुतिषु विगानं विवादः

न निरोधो न चोत्पत्तिर्न बद्धो नापि साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥२१॥
अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा ॥ जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेत् ॥२२॥
यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ॥ सा सैव प्रक्रियेह स्यात्साध्वीत्याचार्यभाषितं ॥२३॥

कुतो दृश्यते इत्याशंक्य न तत्त्वे विगानमस्त्यपि तु तत्प्रबोधनप्रकारे तदपि बोध्यपुरुषचित्तवैषम्यानु
सारेण सुरेश्वराचार्यैरुक्तमित्याह ॥ यथा यथेति ॥२३॥ सूर्याय नमः भास्कराय नमः प्रभाकराय नमः

पं॰
कू॰
॥१६॥

श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादनामामेव कुतो गम्यते विप्रतिपत्तिरित्याशंक्य श्रुतितात्पर्यबोधशून्याना
मेव विप्रतिपत्तिर्न तत्त्वविदामित्याह ॥ श्रुतितात्पर्यमिति ॥७४॥ तर्हि विवेकिनो निश्चयः कीदृश इ

श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः ॥ विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंदवारिधौ ॥७४॥
मायामेघो जगन्नीरं वर्षत्वेष यथा तथा ॥ चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥७५॥
इमं कूटस्थदीपं योऽनुसंधत्ते निरंतरं स्वयं कूटस्थरूपेण दीप्यते सौ निरंतरं ७६॥ इति कूटस्थ

त्याकांक्षायामाह ॥ मायामेघ इति ॥७५॥ ग्रंथाभ्यासफलमाह इममिति ॥७६॥ इति श्रीमत्प
रमहंसपरिव्राजकाचार्यवर्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदु ॥१६॥
विदुषा विरचिता दीपव्याख्या शुभंभूयात् ॥८॥ रामरामरामरामरामरामरामरामरामरामरामरामरामरास रूपांयन॰

कूटस्थः

...शी·कूटदीप·पत्रे१६११